# Buddha's Biography by Ashvaghosha - Buddhacharita

# બુદ્ધચરિતમ્

## Document Information

Text title : buddhacarita

File name : buddhacharita.itx

Category : deities_misc

Location : doc_deities_misc

Author : Ashvaghosha

Proofread by : Anandajoti Bhikkhu (received from "Ryan Brizendine" <brizendine at uchicago.edu>) which are needed for devanaagarii output and formatting.

Description-comments : Available at http://www.ancient-buddhist-texts.net/Texts-and-Translations/Buddhacarita/index.htm

Latest update : February 2, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# બુદ્ધચરિતમ્

Book I [ભગવત્પ્રસૂતિઃ]
શ્રિયં પરાર્ધ્યાં વિદધદ્વિધાતૃજિત્ તમો નિરસ્યન્નભિભૂતભાનુભૃત્ ।
નુદન્નિદાઘં જિતચારુચન્દ્રમાઃ સ વન્દ્યતેઽર્હન્નિહ યસ્ય નોપમા ॥ ૧।૧*
આસીદ્વિશાલોન્નતસાનુલક્ષ્મ્યા પયોદપઙ્ક્ત્યેવ પરીતપાર્શ્વમ્ ।
ઉદગ્રધિષ્ણ્યં ગગણેઽવગાઢં પુરં મહર્ષેઃ કપિલસ્ય વસ્તુ ॥ ૧।૨*
સિતોન્નતેનેવ નયેન હૃત્વા કૈલાસશૈલસ્ય યદભ્રશોભામ્ ।
ભ્રમાદુપેતાન્ વહદમ્બુવાહાન્ સંભાવનાં વા સફલીચકાર ॥ ૧।૩*
રત્નપ્રભોદ્ભાસિનિ યત્ર લેભે તમો ન દારિદ્ર્યમિવાવકાશમ્ ।
પરાર્ધ્યપૌરૈઃ સહવાસતોષાત્ કૃતસ્મિતેવાતિરરાજ લક્ષ્મીઃ ॥ ૧।૪*
યદ્વેદિકાતોરણસિંહકર્ણૈરત્નૈર્દધાનં પ્રતિવેશમ શોભામ્ ।
જગત્યદૃષ્ટ્વેવ સમાનમન્યત્સ્પર્ધાં સ્વગેહૈર્મિથ એવ ચક્રે ॥ ૧।૫*
રામામુખેન્દૂન્ પરિભૂતપદ્માન્ યત્રાપયાતોઽપ્યવિમન્ય ભાનુઃ ।
સન્તાપયોગાદિવ વારિ વેષ્ટું પશ્ચાત્સમુદ્રાભિમુખઃ પ્રતસ્થે ॥ ૧।૬*
શક્યાર્જિતાનાં યશસાં જનેન દૃષ્ટાન્તભાવં ગમિતોઽયમિન્દ્રઃ ।
ઇતિ ધ્વજૈશ્ચારુચલત્પતાકૈર્યન્માર્ષ્ટુમસ્યાઙ્કમિવોદયચ્છત્ ॥ ૧।૭*
કૃત્વાપિ રાત્રૌ કુમુદપ્રહાસમિન્દોઃ કરૈર્યદ્રજતાલયસ્થૈઃ ।
સૌવર્ણહર્મ્યેષુ ગતાર્કપાદૈર્દિવા સરોજદ્યુતિમાલલમ્બે ॥ ૧।૮*
મહીભૃતાં મૂર્ધ્નિ કૃતાભિષેકઃ શુદ્ધોદનો નામ નૃપોઽર્કબન્ધુઃ ।
અધ્યાશયો વા સ્ફુટપુદરીકં પુરાધિરાજં તદલઞ્ચકાર ॥ ૧।૯*
ભૂભૃત્પરાર્ધ્યોઽપિ સપક્ષ એવ પ્રવૃત્તદાનોઽપિ મદાનુપેતઃ ।
ઈશોઽપિ નિત્યં સમદૃષ્ટિપાતઃ સૌમ્યસ્વભાવોઽપિ પૃથુપ્રતાપઃ ॥ ૧।૧૦*
ભુજેન યસ્યાભિહતાઃ પતન્તો દ્વિષદ્દ્વિપેન્દ્રાઃ સમરાઙ્ગણેષુ ।
ઉદ્વાન્તમુક્તાપ્રકરૈઃ શિરોભિર્ભક્ત્યેવ પુષ્પાઞ્જલિભિઃ પ્રણેમુઃ ॥ ૧।૧૧*
અતિપ્રતાપાદવધૂય શત્રૂન્મહોપરાગાનિવ તિગ્મભાનુઃ ।
ઉદ્યોતયામાસ જનં સમન્તાત્પ્રદર્શયન્નાશ્રયણીયમાર્ગાન્ ॥ ૧।૧૨*

ધર્માર્થકામા વિષયં મિથોઽન્યં ન વેશમાચક્રમુરસ્ય નીત્યા ।
વિસ્પર્ધમાના ઇવ તૂગ્રસિદ્ધેઃ સુગોચરે દીપ્તતરા બભૂવુઃ ॥ ૧।૧૩*
ઉદારસઙ્ખ્યૈઃ સચિવાઇરસઙ્ખ્યૈઃ કૃતાગ્રભાવઃ સ ઉદગ્રભાવઃ ।
શશી યથા ભૈરકૃતાન્યથાભૈઃ શક્યેન્દ્રરાજઃ સુતરાં રરાજ ॥ ૧।૧૪*
તસ્યાતિશોભાવિસૃતાતિશોભા રવિપ્રભેવાસ્તતમઃ પ્રભાવા ।
સમગ્રદેવીનિવહાગ્રદેવી બભૂવ માયાપગતેવ માયા ॥ ૧।૧૫*
પ્રજાસુ માતેવ હિતપ્રવૃત્તા ગુરૌ જને ભક્તિરિવાનુવૃત્તા ।
લક્ષ્મીરિવાધીશકુલે કૃતાભા જગત્યભૂદુત્તમદેવતા યા ॥ ૧।૧૬*
કામં સદા સ્ત્રીચરિતં તમિસ્રં તથાપિ તાં પ્રપ્ય ભૃશં વિરેજે ।
ન હીન્દુલેખામુપગમ્ય શુભાં નક્તં તથા સન્તમસત્વમેતિ ॥ ૧।૧૭*
અતીન્દ્રિયેનાત્મનિ દુષ્કુહોઽયં મયા જનો યોજયિતું ન શક્યઃ ।
ઇતીવ સૂક્ષ્માં પ્રકૃતિં વિહાય ધર્મેણ સાક્ષાદ્વિહિતા સ્વમૂર્તિઃ ॥ ૧।૧૮*
ચ્યુતોઽથ કાયાત્તુષિતાત્ ત્રિલોકીમુદ્યોતયન્નુત્તમબોધિસત્ત્વઃ ।
વિવેશ તસ્યાઃ સ્મૃત એવ કુક્ષૌ નન્દાગુહાયામિવ નાગરાજઃ ॥ ૧।૧૯*
ધૃત્વા હિમાદ્રિધવલં ગુરુ ષડ્વિષાણાં
દાનાધિવાસિતમુખં દ્વિરદસ્ય રૂપમ્ ।
શુદ્ધોદનસ્ય વસુધાધિપતેર્મહિષ્યાઃ
કુક્ષિં વિવેશ સ જગદ્વ્યસનક્ષયાય ॥ ૧।૨૦*
રક્ષાવિધાનં પ્રતિ લોકપાલા લોકૈકનાથસ્ય દિવોઽભિજગ્મુઃ ।
સર્વત્ર ભાન્તોઽપિ હિ ચન્દ્રપાદા ભજન્તિ કૈલાસગિરૌ વિશેષમ્ ॥ ૧।૨૧*
મયાપિ તં કુક્ષિગતં દધાના વિદ્યુદ્વિલાસં જલદાવલીવ ।
દાનાભિવર્ષૈઃ પરિતો જનાનાં દારિદ્યતાપં શમયાઞ્ચકાર ॥ ૧।૨૨*
સાતઃ પુરજના દેવી કદાચિદથ લુમ્બિનીમ્ ।
જગામાનુમતે રાજ્ઞઃ સમ્ભૂતોત્તમદોહદા ॥ ૧।૨૩*
શાખામાલમ્બમાનાયાઃ પુષ્પભારાવલંબિનીમ્ ।
દેવ્યાઃ કુક્ષિં વિભિદ્યાશુ બોધિસત્ત્વો વિનિર્યયૌ ॥ ૧।૨૪*
તતઃ પ્રસન્નશ્ચ બભૂવ પુષ્યસ્તસ્યાશ્ચ દેવ્યા વ્રતસંસ્કૃતાયાઃ ।
પાર્શ્વાત્સુતો લોકહિતાય જજ્ઞે નિર્વેદનં ચૈવ નિરામયં ચ ॥ ૧।૨૫ (૧।૯)
પ્રાતઃ પયોદાદિવ તિગ્મભાનુઃ સમુદ્ભવન્સોઽપિ ચ માતૃકુક્ષેઃ ।
સ્ફુરન્મયૂખૈર્વિહતાન્ધકારૈશ્ચકાર લોકં કનકાવદાતમ્ ॥ ૧।૨૬*
તં જાતમાત્રમથ કાઞ્ચનયૂપગૌરં
પ્રીતઃ સહસ્રનયણઃ શનકૈરગૃહ્ણાત્

મન્દારપુષ્પનિકરૈઃ સહ તસ્ય મૂર્ધ્નિ
ખાન્નિર્મલે ચ વિનિપેતતુરમ્બુધારે ॥ ૧।૨૭*
સુરપ્રધાનૈઃ પરિધાર્યમાણો દેહાંશુજાલૈરનુરઞ્જયંસ્તાન્ ।
સન્ધ્યાભ્રજાલોપરિસન્નિવિષ્ટં નવોડુરાજં વિજિગાય લક્ષ્મ્યા ॥ ૧।૨૮*
ઊરોર્યથૌર્વસ્ય પૃથોશ્ચ હસ્તાન્માન્ધાતુરિન્દ્રપ્રતિમસ્ય મૂર્ધ્નઃ ।
કક્ષીવતશ્ચૈવ ભુજાંસદેશાત્તથાવિધં તસ્ય બભૂવ જન્મ ॥ ૧।૨૯ (૧।૧૦)
ક્રમેણ ગર્ભાદભિનિઃસૃતઃ સન્ બભૌ ગતઃ ખાદિવ યોન્યજાતઃ ।
કલ્પેષ્વનેકેષ્વિવ ભાવિતાત્મા યઃ સમ્પ્રજાનન્ સુષુવે ન મૂઢઃ ॥ ૧।૩૦ (૧।૧૧)
દીપ્ત્યા ચ ધૈર્યેણ ચ યો રરાજ બાલો રવિર્ભૂમિમિવાવતીર્ણઃ ।
તથાતિદીપ્તોઽપિ નિરીક્ષ્યમાણો જહાર ચક્ષૂંષિ યથા શશાઙ્કઃ ॥ ૧।૩૧ (૧।૧૨)
સ હિ સ્વગાત્રપ્રભયોજ્જ્વલન્ત્યા દીપપ્રભાં ભાસ્કરવન્મુમોષ ।
મહાર્હજામ્બૂનદચારુવર્ણો વિદ્યોતયામાસ દિશશ્ચ સર્વાઃ ॥ ૧।૩૨ (૧।૧૩)
અનાકુલાન્યબ્જસમુદ્ગતાનિ નિષ્પેષવન્ત્યાયતવિક્રમાણિ ।
તથૈવ ધીરાણિ પદાનિ સપ્ત સપ્તર્ષિતારાસદૃશો જગામ ॥ ૧।૩૩ (૧।૧૪)
બોધાય જાતોઽસ્મિ જગદ્ધિતાર્થમન્ત્યા તથોત્પત્તિરિયં મમેતિ ।
ચતુર્દિશં સિંહગતિર્વિલોક્ય વાણીં ચ ભવ્યાર્થકરીમુવાચ ॥ ૧।૩૪ (૧।૧૫)
ખાત્પ્રસ્રુતે ચન્દ્રમરીચિશુભ્રે દ્વે વારિધારે શિશિરોષ્ણવીર્યે ।
શરીરસૌખ્યાર્થમનુત્તરસ્ય નિપેતતુર્મૂર્ધનિ તસ્ય સૌમ્યે ॥ ૧।૩૫ (૧।૧૬)
શ્રીમદ્વિતાને કનકોજ્જ્વલાઙ્ગે વૈડૂર્યપાદે શયને શયાનમ્ ।
યદ્ગૌરવાત્કાઞ્ચનપદ્મહસ્તા યક્ષાધિપાઃ સમ્પરિવાર્ય તસ્થુઃ ॥ ૧।૩૬ (૧।૧૭)
માયાતનૂજસ્ય દિવૌકસઃ ખે યસ્ય પ્રભાવાત્પ્રણતૈઃ શિરોભિઃ ।
આધારયન્ પાણ્ડરમાતપત્રં બોધાય જેપુઃ પરમાશિષશ્ચ ॥ ૧।૩૭ (૧।૧૮)
મહોરગા ધર્મવિશેષતર્ષાદ્બુદ્ધેષ્વતીતેષુ કૃતાધિકારાઃ ।
યમવ્યજન્ ભક્તિવિશિષ્ટનેત્રા મન્દારપુષ્પૈઃ સમવાકિરંશ્ચ ॥ ૧।૩૮ (૧।૧૯)
તથાગતોત્પાદગુણેન તુષ્ટાઃ શુદ્ધાધિવાસાશ્ચ વિશુદ્ધસત્ત્વાઃ ।
દેવા નનન્દુર્વિગતેઽપિ રાગે મગ્નસ્ય દુઃખે જગતો હિતાય ॥ ૧।૩૯ (૧।૨૦)
યસ્મિન્ પ્રસૂતે ગિરિરાજકીલા વાતાહતા નૌરિવ ભૂશ્ચચાલ ।
સચન્દના ચોત્પલપદ્મગર્ભા પપાત વૃષ્ટિર્ગગણાદનભ્રાત્ ॥ ૧।૪૦ (૧।૨૧)
વાતા વવુઃ સ્પર્શસુખા મનોજ્ઞા દિવ્યાનિ વાસાંસ્યવપાતયન્તઃ ।
સૂર્યઃ સ એવાભ્યધિકં ચકાશે જજ્વાલ સૌમ્યાર્ચિરનીરિતોઽગ્નિઃ ॥ ૧।૪૧ (૧।૨૨)
પ્રાગુત્તરે ચાવસથપ્રદેશે કૂપઃ સ્વયં પ્રાદુરભૂત્સિતામ્બુઃ ।
અન્તઃ પુરાણ્યાગતવિસ્મયાનિ યસ્મિન્ ક્રિયાસ્તીર્થ ઇવ પ્રચક્રુઃ ॥ ૧।૪૨ (૧।૨૩)

ધર્માર્થિભિર્ભૂતગણૈશ્ચ દિવ્યૈસ્તદ્દર્શનાર્થં બલમાપ પૂરઃ ।
કૌતૂહલેનૈવ ચ પાદપૈશ્ચ પ્રપૂજયામાસ સગન્ધપુષ્પૈઃ ॥ ૧।૪૩ (૧।૨૪)
પુષ્પદ્રુમાઃ સ્વં કુસુમં પુકુલ્લુઃ સસીરણોદ્ભ્રામિતદિક્સુગન્ધિ ।
સુસમ્ભ્રમદ્ભૃગવધૂપગીતં ભુજઙ્ગંવૃદાપિહિતાત્તવાતમ્ ॥ ૧।૪૪*
ક્વચિત્ ક્વણત્તૂર્યમૃદઙ્ગગીતૈર્વીણામુકુન્દામુરજાદિભિશ્ચ ।
સ્વીણાં ચલત્કુણ્ડલભૂષિતાનાં વિરાજિતં ચોભયપાર્શ્વતસ્તત્ ॥ ૧।૪૫*
યદ્રાજશાસ્ત્રં ભૃગુરઙ્ગિરા વા ન ચક્રતુર્વંશકરાવૃષી તૌ ।
તયોઃ સુતૌ તૌ ચ સસર્જતુસ્તત્કાલેન શુક્રશ્ચ બૃહસ્પતિશ્ચ ॥ ૧।૪૬ (૧।૪૧)
સારસ્વતશ્ચાપિ જગાદ નષ્ટં વેદં પુનર્યં દદૃશુર્ન પૂર્વમ્ ।
વ્યાસસ્તથૈનં બહુધા ચકાર ન યં વશિષ્ઠઃ કૃતવાનશક્તિઃ ॥ ૧।૪૭ (૧।૪૨)
વાલ્મીકિનાદશ્ચ સસર્જ પદ્યં જગ્રન્થ યન્ન ચ્યવનો મહાર્ષિઃ ।
ચિકિત્સિતં યચ્છ ચકાર નાત્રિઃ પશ્ચાત્તદાત્રેય ઋષિર્જગાદ ॥ ૧।૪૮ (૧।૪૩)
યચ્ચ દ્વિજત્વં કુશિકો ન લેભે તદ્ગાધનઃ સૂનુરવાપ રાજન્ ।
વેલાં સમુદ્રે સગરશ્ચ દધ્રે નેક્ષ્વાકવો યાં પ્રથમં બબન્ધુઃ ॥ ૧।૪૯ (૧।૪૪)
આચાર્યકં યોગવિધૌ દ્વિજાનામપ્રાપ્તમન્યૈર્જનકો જગામ ।
ખ્યાતાનિ કર્માણિ ચ યાનિ શૌરેઃ શૂરાદયસ્તેષ્વબલા બભૂવુઃ ॥ ૧।૫૦ (૧।૪૫)
તસ્માત્પ્રમાણં ન વયો ન કાલઃ કશ્ચિત્ક્વચિચ્છ્રૈષ્ઠ્યમુપૈતિ લોકે ।
રાજ્ઞામૃષીણાં ચ હિતાનિ તાનિ કૃતાનિ પુત્રૈરકૃતાનિ પૂર્વૈઃ ॥ ૧।૫૧ (૧।૪૬)
એવં નૃપઃ પ્રત્યયિતૈર્દ્વિજૈસ્તૈરાશ્વાસિતશ્ચાપ્યભિનન્દિતશ્ચ ।
શઙ્કામનિષ્ટાં વિજહૌ મનસ્તઃ પ્રહર્ષમેવાધિકમારુરોહ ॥ ૧।૫૨ (૧।૪૭)
પ્રીતશ્ચ તેભ્યો દ્વિજસત્તમેભ્યઃ સત્કારપૂર્વં પ્રદદૌ ધનાનિ ।
ભૂયાદયં ભૂમિપતિર્યથોક્તો યાયાજ્જરામેત્ય વનાનિ ચેતિ ॥ ૧।૫૩ (૧।૪૮)
અથૌ નિમિત્તૈશ્ચ તપોબલાચ્છ તજ્જન્મ જન્માન્તકરસ્ય બુદ્ધ્વા ।
શાક્યેશ્વરસ્યાલયમાજગામ સદ્ધર્મતર્ષાદસિતો મહાર્ષિઃ ॥ ૧।૫૪ (૧।૪૯)
તં બ્રહ્મવિદ્બ્રહ્મવિદાં જ્વલન્તં બ્રાહ્મ્યા શ્રિયા ચૈવ તપઃશ્રિયા ચ ।
રાજ્ઞો ગુરુર્ગૌરવસત્ક્રિયાભ્યાં પ્રવેશયામાસ નરેન્દ્રસદ્મ ॥ ૧।૫૫ (૧।૫૦)
સ પાર્થિવાન્તઃપુરસન્નિકર્ષં કુમારજન્માગતહર્ષવેગમ્ ।
વિવેશ ધીરો બલસઞ્જ્ઞયૈવ તપઃપ્રકર્ષાચ્ચ જરાશ્રયાચ્છ ॥ ૧।૫૬ (૧।૫૧)
તતો નૃપસ્તં મુનિમાસનસ્થં પાદ્યાર્ઘ્યપૂર્વં પ્રતિપૂજ્ય સમ્યક્ ।
નિમન્ત્રયામાસ યથોપચારં પુરા વસિષ્ઠં સ ઇવાન્તિદેવઃ ॥ ૧।૫૭ (૧।૫૨)
ધન્યોઽસ્મ્યનુગ્રાહ્યમિદં કુલં મે યન્માં દિદૃક્ષુર્ભગવાનુપેતઃ ।
આજ્ઞાપ્યતાં કિં કરવાણિ સૌમ્ય શિષ્યોઽસ્મિ વિશ્રમ્ભિતુમર્હસીતિ ॥ ૧।૫૮ (૧।૫૩)

એવં નૃપેણોપનિમન્ત્રિતઃ સન્સર્વેણ ભાવેન મુનિર્યથાવત્ ।
સવિસ્મયોત્ફુલ્લવિશાલદૃષ્ટિર્ગમ્ભીરધીરાણિ વચાંસ્યુવાચ ॥ ૧।૫૯ (૧।૫૪)
મહાત્મનિ ત્વય્યુપપન્નમેતત્ પ્રિયાતિથૌ ત્યાગિનિ ધર્મકામે ।
સત્ત્વાન્વયજ્ઞાનવયોઽનુરૂપા સ્નિગ્ધા યદેવં મયિ તે મતિઃ સ્યાત્ ॥ ૧।૬૦ (૧।૫૫)
એતચ્ચ તદ્યેન નૃપર્ષયસ્તે ધર્મેણ સૂક્ષ્માણિ ધનાન્યપાસ્ય ।
નિત્યં ત્યજન્તો વિધિવદ્બભૂવુસ્તપોભિરાઢ્યા વિભવૈર્દરિદ્રાઃ ॥ ૧।૬૧ (૧।૫૬)
પ્રયોજનં યત્તુ મમોપયાને તન્મે શૃણુ પ્રીતિમુપેહિ ચ ત્વમ્ ।
દિવ્યા મયા દિવ્યપથે શ્રુતા વાગ્બોધાય જાતસ્તનયસ્તવેતિ ॥ ૧।૬૨ (૧।૫૭)
શ્રુત્વા વચસ્તચ્છ મનશ્ચ યુક્ત્વા જ્ઞાત્વા નિમિત્તૈશ્ચ તતોઽસ્મ્યુપેતઃ ।
દિદૃક્ષયા શાક્યકુલધ્વજસ્ય શક્રધ્વજસ્યેવ સમુચ્છ્રિતસ્ય ॥ ૧।૬૩ (૧।૫૮)
ઇત્યેતદેવં વચનં નિશમ્ય પ્રહર્ષસમ્ભ્રાન્તગતિર્નરેન્દ્રઃ ।
આદાય ધાત્ર્યઙ્કગતં કુમારં સન્દર્શયામાસ તપોધનાય ॥ ૧।૬૪ (૧।૫૯)
ચક્રાઙ્કપાદં સ તથા મહાર્ષિર્જાલાવનદ્ધાઙ્ગુલિપાણિપાદમ્ ।
સોર્ણભ્રુવં વારણવસ્તિકોશં સવિસ્મયં રાજસુતં દદર્શ ॥ ૧।૬૫ (૧।૬૦)
ધાત્ર્યઙ્કસંવિષ્ટમવેક્ષ્ય ચૈનં દેવ્યઙ્કસંવિષ્ટમિવાગ્નિસૂનુમ્ ।
બભૂવ પક્ષ્માન્તરિવાઞ્ચિતાશ્રુર્નિશ્વસ્ય ચૈવં ત્રિદિવોન્મુખોઽભૂત્ ॥ ૧।૬૬ (૧।૬૧)
દૃષ્ટ્વાસિતં ત્વશ્રુપરિપ્લુતાક્ષં સ્નેહાત્તુ પુત્રસ્ય નૃપશ્ચકમ્પે ।
સગદ્ગદં બાષ્પકષાયકણ્ઠઃ પપ્રચ્ચ ચ પ્રાઞ્જલિરાનતાઙ્ગઃ ॥ ૧।૬૭ (૧।૬૨)
સ્વલ્પાન્તરં યસ્ય વપુર્મુનેઃ સ્યાદ્બહ્વદ્ભુતં યસ્ય ચ જન્મ દીપ્તમ્ ।
યસ્યોત્તમં ભાવિનમાત્થ ચાર્થં તં પ્રેક્ષ્ય કસ્માત્તવ ધીર વાષ્પઃ ॥ ૧।૬૮ (૧।૬૩)
અપિ સ્થિરાયુર્ભગવન્ કુમારઃ કચ્ચિન્ન શોકાય મમ પ્રસૂતઃ ।
લબ્ધઃ કથઞ્ચિત્ સલિલાઞ્જલિર્મે ન ખલ્વિમં પાતુમુપૈતિ કાલઃ ॥ ૧।૬૯ (૧।૬૪)
અપ્યક્ષયં મે યશસો નિધાનં કચ્ચિદ્ધ્રુવો મે કુલહસ્તસારઃ ।
અપિ પ્રયાસ્યામિ સુખં પરત્ર સુપ્તેઽપિ પુત્રેઽનિમિષૈકચક્ષુઃ ॥ ૧।૭૦ (૧।૬૫)
કચ્ચિન્ન મે જાતમફુલ્લમેવ કુલપ્રબાલં પરિશોષભાગિ ।
ક્ષિપ્રં વિભો બ્રૂહિ ન મેઽસ્તિ શાન્તિઃ સ્નેહં સુતે વેત્સિ હિ બાન્ધવાનામ્ ॥ ૧।૭૧ (૧।૬૬)
ઇત્યાગતાવેગમનિષ્ટબુદ્ધ્યા બુદ્ધ્વા નરેન્દ્રં સ* મુનિર્બભાષે ।
મા ભૂન્મતિસ્તે નૃપ કાચિદન્યા નિઃસંશયં તદ્યદવોચમસ્મિ ॥ ૧।૭૨ (૧।૬૭)
નાસ્યાન્યથાત્વં પ્રતિ વિક્રિયા મે સ્વાં વઞ્ચનાં તુ પ્રતિ વિક્લવોઽસ્મિ ।
કાલો હિ મે યાતુમયં ચ જાતો જાતિક્ષયસ્યાસુલભસ્ય બોદ્ધા ॥ ૧।૭૩ (૧।૬૮)
વિહાય રાજ્યં વિષયેષ્વનાસ્થસ્તીવ્રૈઃ પ્રયત્નૈરધિગમ્ય તત્ત્વમ્ ।
જગત્યયં મોહતમો નિહન્તું જ્વલિષ્યતિ જ્ઞાનમયો હિ સૂર્યઃ ॥ ૧।૭૪ (૧।૬૯)

દુઃખાર્ણવાદ્વ્યાધિવિકીર્ણફેનાજ્જરાતરઙ્ગાન્મરણોગ્રવેગાત્ ।
ઉત્તારયિષ્યત્યયમુહ્યમાનમાર્ત્તં જગજ્જ્ઞાનમહાપ્લવેન ॥ ૧।૭૫ (૧।૭૦)
પ્રજ્ઞામ્બુવેગાં સ્થિરશીલવપ્રાં સમાધિશીતાં વ્રતચક્રવાકામ્ ।
અસ્યોત્તમાં ધર્મનદીં પ્રવૃત્તાં તૃષ્ણાર્દિતઃ પાસ્યતિ જીવલોકઃ ॥ ૧।૭૬ (૧।૭૧)
દુઃખાર્દિતેભ્યો વિષયાવૃતેભ્યઃ સંસારકાન્તારપથસ્થિતેભ્યઃ ।
આખ્યાસ્યતિ હ્યેષ વિમોક્ષમાર્ગં માર્ગપ્રનષ્ટેભ્ય ઇવાધ્વગેભ્યઃ ॥ ૧।૭૭ (૧।૭૨)
વિદહ્યમાનાય જનાય લોકે રાગાગ્નિનાયં વિષયેન્ધનેન ।
પ્રહ્લાદમાધાસ્યતિ ધર્મવૃષ્ટ્યા વૃષ્ટ્યા મહામેઘ ઇવાતપાન્તે ॥ ૧।૭૮ (૧।૭૩)
તૃષ્ણાર્ગલં મોહતમઃકપાટં દ્વારં પ્રજાનામપયાનહેતોઃ ।
વિપાટયિષ્યત્યયમુત્તમેન સદ્ધર્મતાડેન દુરાસદેન ॥ ૧।૭૯ (૧।૭૪)
સ્વૈર્મોહપાશૈઃ પરિવેષ્ટિતસ્ય દુઃખાભિભૂતસ્ય નિરાશ્રયસ્ય ।
લોકસ્ય સમ્બુધ્ય ચ ધર્મરાજઃ કરિષ્યતે બન્ધનમોક્ષમેષઃ ॥ ૧।૮૦ (૧।૭૫)
તન્મા કૃથાઃ શોકમિમં પ્રતિ ત્વમ્ તત્સૌમ્ય શોચ્યે હિ મનુષ્યલોકે ।
મોહેન વા કામસુખૈર્મદાદ્વા યો નૈષ્ઠિકં શ્રોષ્યતિ નાસ્ય ધર્મમ્ ॥ ૧।૮૧ (૧।૭૬)
ભ્રષ્ટસ્ય તસ્માચ્ચ ગુણાદતો મે ધ્યાનાનિ લબ્ધ્વાપ્યકૃતાર્થતૈવ ।
ધર્મસ્ય તસ્યાશ્રવણાદહં હિ મન્યે વિપત્તિં ત્રિદિવેઽપિ વાસમ્ ॥ ૧।૮૨ (૧।૭૭)
ઇતિ શ્રુતાર્થઃ સસુહૃત્સદારસ્ત્યક્ત્વા વિષાદં મુમુદે નરેન્દ્રઃ ।
એવંવિધોઽયં તનયો મમેતિ મેને સ હિ સ્વામપિ સારમત્તામ્ ॥ ૧।૮૩ (૧।૭૮)
આર્યેણ માર્ગેણ તુ યાસ્યતીતિ ચિન્તાવિધેયં હૃદયં ચકાર ।
ન ખલ્વસૌ ન પ્રિયધર્મપક્ષઃ સન્તાનનાશાત્તુ ભયં દદર્શ ॥ ૧।૮૪ (૧।૭૯)
અથ મુનિરસિતો નિવેદ્ય તત્ત્વં સુતનિયતં સુતવિક્લવાય રાજ્ઞે ।
સબહુમતમુદીક્ષ્યમાણરૂપઃ પવનપથેન યથાગતં જગામ ॥ ૧।૮૫ (૧।૮૦)
કૃતમતિરનુજાસુતં ચ દૃષ્ટ્વા મુનિવચનશ્રવણે પિ તન્મતૌ ચ ।
બહુવિધમનુકમ્પયા સ સાધુઃ પ્રિયસુતવદ્વિનિયોજયાઞ્ચકાર ॥ ૧।૮૬ (૧।૮૧)
નરપતિરપિ પુત્રજન્મતુષ્ટો વિષયમતાનિ વિમુચ્ય બન્ધનાનિ ।
કુલસદૃશમચીકરદ્યથાવત્પ્રિયતનયં તનયસ્ય જાતકર્મ ॥ ૧।૮૭ (૧।૮૨)
દશસુ પરિણતેષ્વહઃસુ ચૈવં પ્રયતમનાઃ પરયા મુદા પરીતઃ ।
અકુરુત જપહોમમઙ્ગલાદ્યાઃ પરમતમાઃ સ સુતસ્ય દેવતેજ્યાઃ ॥ ૧।૮૮ (૧।૮૩)
અપિ ચ શતસહસ્રપૂર્ણસઙ્ખ્યાઃ સ્થિરબલવત્તનયાઃ સહેમશ઼ૃઙ્ગીઃ ।
અનુપગતજરાઃ પયસ્વિનીર્ગાઃ સ્વયમદદાત્સુતવૃદ્ધયે દ્વિજેભ્યઃ ॥ ૧।૮૯ (૧।૮૪)
બહુવિધવિષયાસ્તતો યતાત્મા સ્વહૃદયતોષકરીઃ ક્રિયા વિધાય ।
ગુણવતિ દિવસે શિવે મુહૂર્તે મતિમકરોન્મુદિતઃ પુરપ્રવેશે ॥ ૧।૯૦ (૧।૮૫)

દ્વિરદરદમયીમથો મહાર્હાં સિતસિતપુષ્પભૃતાં મણિપ્રદીપામ્ ।
અભજત શિવિકાં શિવાય દેવી તનયવતી પ્રણિપત્ય દેવતાભ્યઃ ॥ ૧।૯૧ (૧।૮૬)
પુરમથ પુરતઃ પ્રવેશ્ય પત્નીં સ્થવિરજનાનુગતામપત્યનાથામ્ ।
નૃપતિરપિ જગામ પૌરસઙ્ઘૈર્દિવમમરૈર્મઘવાનિવાર્ચ્યમાનઃ ॥ ૧।૯૨ (૧।૮૭)
ભવનમથ વિગાહ્ય શાક્યરાજો ભવ ઇવ ષણ્મુખજન્મના પ્રતીતઃ ।
ઇદમિદમિતિ હર્ષપૂર્ણવક્ત્રો બહુવિધપુષ્ટિયશસ્કરં વ્યધત્ત ॥ ૧।૯૩ (૧।૮૮)
ઇતિ નરપતિપુત્રજન્મવૃદ્ધ્યા સજનપદં કપિલાહ્વયં પુરં તત્ ।
ધનદપુરમિવાપ્સરોઽવકીર્ણં મુદિતમભૂન્નલકૂવરપ્રસૂતૌ ॥ ૧।૯૪ (૧।૮૯)
ઇતિ શ્રીબુદ્ધચરિતે મહાકાવ્યે ભગવત્પ્રસૂતિર્નામ પ્રથમઃ સર્ગઃ ॥ ૧ ॥

---

Book II [આન્તઃપુરવિહારો]
આ જન્મનો જન્મજરાન્તકસ્ય તસ્યાત્મજસ્યાત્મજિતઃ સ રાજા ।
અહન્યહન્યર્થગજાશ્વમિત્રૈર્વૃદ્ધિં યયૌ સિન્ધુરિવામ્બુવેગૈઃ ॥ ૨।૧
ધનસ્ય રત્નસ્ય ચ તસ્ય તસ્ય કૃતાકૃતસ્યૈવ ચ કાઞ્ચનસ્ય ।
તદા હિ નૈકાત્મનિધીનવાપિ મનોરથસ્યાપ્યતિભારભૂતાન્ ॥ ૨।૨
યે પદ્મકલ્પૈરપિ ચ દ્વિપેન્દ્રૈર્ન મણ્ડલં શક્યમિહાભિનેતુમ્ ।
મદોત્કટા હૈમવતા ગજાસ્તે વિનાપિ યત્નાદુપતસ્થુરેનમ્ ॥ ૨।૩
નાનાઙ્કચિહ્નૈર્નવહેમભાણ્ડૈરભૂષિતૈર્લમ્બસટૈસ્તથાન્યૈઃ ।
સઞ્ચુક્ષુભે ચાસ્ય પુરં તુરઙ્ગૈર્બલેન મૈત્ર્યા ચ ધનેન ચાપ્તૈઃ ॥ ૨।૪
પુષ્ટાશ્ચ તુષ્ટાશ્ચ તદાસ્ય રાજ્યે સાધ્વ્યોઽરજસ્કા ગુણવત્પયસ્કાઃ ।
ઉદગ્રવત્સૈઃ સહિતા બભૂવુર્બહ્વ્યો બહુક્ષીરદુહશ્ચ ગાવઃ ॥ ૨।૫
મધ્યસ્થતાં તસ્ય રિપુર્જગામ મધ્યસ્વભાવઃ પ્રયયૌ સુહૃત્ત્વમ્ ।
વિશેષતો દાર્ઢ્યમિયાય મિત્રં દ્વાવસ્ય પક્ષાવપરસ્તુ નાશમ્ ॥ ૨।૬
તથાસ્ય મન્દાનિલમેઘશબ્દઃ સૌદામિનીકુણ્ડલમણ્ડિતાઙ્ગઃ ।
વિનાશ્મવર્ષાશનિપાતદોષૈઃ કાલે ચ દેશે પ્રવવર્ષ દેવઃ ॥ ૨।૭
રુરોહ સંયક્ ફલવદ્યથાર્તુ તદાકૃતેનાપિ કૃષિશ્રમેણ ।
તા એવ ચૈવૌષધયો રસેન સારેણ ચૈવાભ્યધિકા બભૂવુઃ ॥ ૨।૮
શરીરસન્દેહકરેઽપિ કાલે સઙ્ગ્રામસમ્મર્દ ઇવ પ્રવૃત્તે ।
સ્વસ્થાઃ સુખં ચૈવ નિરામયં ચ પ્રજજ્ઞિરે ગર્ભધરાશ્ચ નાર્યઃ ॥ ૨।૯
યચ્ચ પ્રતિભ્વો વિભવેઽપિ શક્યે ન પ્રાર્થયન્તિ સ્મ નરાઃ પરેભ્યઃ ।
અભ્યર્થિતઃ સૂક્ષ્મધનોઽપિ ચાર્યં તદા ન કશ્ચિદ્વિમુખો બભૂવ ॥ ૨।૧૦

નાશે વધો બન્ધુષુ નાપ્યદાતા નૈવાવ્રતો નાનૃતિકો ન હિંસ્રઃ ।
આસીત્તદા કશ્ચન તસ્ય રાજ્યે રાજ્ઞો યયાતેરિવ નાહુષસ્ય ॥ ૨।૧૧
ઉદ્યાનદેવાયતનાશ્રમાણાં કૂપપ્રપાપુષ્કરિણીવનાનામ્ ।
ચક્રુઃ ક્રિયાસ્તત્ર ચ ધર્મકામાઃ પ્રત્યક્ષતઃ સ્વર્ગમિવોપલભ્ય ॥ ૨।૧૨
મુક્તશ્ચ દુર્ભિક્ષભયામયેભ્યો હૃષ્ટો જનઃ સ્વર્ગમિવાભિરેમે ।
પત્નીં પતિર્વા મહિષી પતિં વા પરસ્પરં ન વ્યભિચેરતુશ્ચ ॥ ૨।૧૩
કશ્ચિત્સિષેવે રતયે ન કામં કામાર્થમર્થં ન જુગોપ કશ્ચિત્ ।
કશ્ચિદ્ધનાર્થં ન ચચાર ધર્મં ધર્માય કશ્ચિન્ન ચકાર હિંસામ્ ॥ ૨।૧૪
સ્તેયાદિભિશ્ચાપ્યભિતશ્ચ નષ્ટં સ્વસ્થં સ્વચક્રં પરચક્રમુક્તમ્ ।
ક્ષેમં સુભિક્ષં ચ બભૂવ તસ્ય પુરાણ્યરણ્યાનિ યથૈવ રાષ્ટ્રે ॥ ૨।૧૫
તદા હિ તજ્જન્મનિ તસ્ય રાજ્ઞો મનોરિવાદિત્યસુતસ્ય રાજ્યે ।
ચચાર હર્ષઃ પ્રણનાશ પાપ્મા જજ્વાલ ધર્મઃ કલુષઃ શશામ ॥ ૨।૧૬
એવંવિધા રાજસુતસ્ય તસ્ય સર્વાર્થસિદ્ધિશ્ચ યતો બભૂવ ।
તતો નૃપસ્તસ્ય સુતસ્ય નામ સર્વાર્થસિદ્ધોઽયમિતિ પ્રચક્રે ॥ ૨।૧૭
દેવી તુ માયા વિબુધર્ષિકલ્પં દૃષ્ટ્વા વિશાલં તનયપ્રભાવમ્ ।
જાતં પ્રહર્ષં ન શશાક સોઢું તતોઽવિનાશાય દિવં જગામ ॥ ૨।૧૮
તતઃ કુમારં સુરગર્ભકલ્પં સ્નેહેન ભાવેન ચ નિર્વિશેષમ્ ।
માતૃષ્વસા માતૃસમપ્રભાવા સંવર્ધયામાત્મજવદ્બભૂવ ॥ ૨।૧૯
તતઃ સ બાલાર્ક ઇવોદયસ્થઃ સમીરિતો વહ્નિરિવાનિલેન ।
ક્રમેણ સમ્યગ્વવૃધે કુમારસ્તારાધિપઃ પક્ષ ઇવાતમસ્કે ॥ ૨।૨૦
તતો મહાર્હાણિ ચ ચન્દનાનિ રત્નાવલીશ્ચૌષધિભિઃ સગર્ભાઃ ।
મૃગપ્રયુક્તાન્રથકાંશ્ચ હૈમાનાચક્રિરેઽસ્મૈ સુહૃદાલયેભ્યઃ ॥ ૨।૨૧
વયોઽનુરૂપાણિ ચ ભૂષણાનિ હિરણ્મયા હસ્તિમૃગાશ્વકાશ્ચ ।
રથાશ્ચ ગાવો વસનપ્રયુક્તા ગન્ત્રીશ્ચ ચામીકરરૂપ્યચિત્રાઃ ॥ ૨।૨૨
એવં સ તૈસ્તૈર્વિષયોપચારૈર્વયોઽનુરૂપૈરુપચર્યમાણઃ ।
બાલોઽપ્યબાલપ્રતિમો બભૂવ ધૃત્યા ચ શૌચેન ધિયા શ્રિયા ચ ॥ ૨।૨૩
વયશ્ચ કૌમારમતીત્ય મધ્યં સમ્પ્રાપ્ય બાલઃ સ હિ રાજસૂનુઃ ।
અલ્પૈરહોભિર્બહુવર્ષગમ્યા જગ્રાહ વિદ્યાઃ સ્વકુલાનુરૂપાઃ ॥ ૨।૨૪
નૈઃશ્રેયસં તસ્ય તુ ભવ્યમર્થં શ્રુત્વા પુરસ્તાદસિતાન્મહાર્ષેઃ ।
કામેષુ સઙ્ગં જનયામ્બભૂવ વૃદ્ધિર્ભવચ્ચાક્યકુલસ્ય રાજ્ઞઃ ॥ ૨।૨૫
કુલાત્તતોઽસ્મૈ સ્થિરશીલયુક્તાત્સાધ્વીં વપુર્હ્રીવિનયોપપન્નામ્ ।
યશોધરાં નામ યશોવિશાલાં તુલ્યાભિધાનં શ્રિયમાજુહાવ ॥ ૨।૨૬

અથાપરં ભૂમિપતેઃ પ્રિયોઽયં સનત્કુમારપ્રતિમઃ કુમારઃ ।
સાર્ધં તયા શાક્યનરેન્દ્રવધ્વા શચ્યા સહસ્રાક્ષ ઇવાભિરેમે ॥ ૨।૨૭
કિઞ્ચિન્મનઃક્ષોભકરં પ્રતીપં કથઞ્ચ પશ્યેદિતિ સોઽનુચિન્ત્ય ।
વાસં નૃપો વ્યાદિશતિ સ્મ તસ્મૈ હર્મ્યોદરેષ્વેવ ન ભૂપ્રચારમ્ ॥ ૨।૨૮
તતઃ શરત્તોયદપાણ્ડરેષુ ભૂમૌ વિમાનેષ્વિવ રઞ્જિતેષુ ।
હર્મ્યેષુ સર્વર્તુસુખાશ્રયેષુ સ્ત્રીણામુદારૈર્વિજહાર તૂર્યૈઃ ॥ ૨।૨૯
કલૈર્હિ ચામીકરબદ્ધકક્ષૈર્નારીકરાગ્રાભિહતૈર્મૃદઙ્ગૈઃ ।
વરાપ્સરોનૃત્યસમૈશ્ચ નૃત્યૈઃ કૈલાસવત્તદ્ભવનં રરાજ ॥ ૨।૩૦
વાગ્ભિઃ કલાભિર્લલિતૈશ્ચ હારૈર્મદૈઃ સખેલૈર્મધુરૈશ્ચ હાસૈઃ ।
તં તત્ર નાર્યો રમયામ્બભૂવુર્ભ્રૂવઞ્ચિતૈરર્ધનિરીક્ષિતૈશ્ચ ॥ ૨।૩૧
તતશ્ચ કામાશ્રયપણ્ડિતાભિઃ સ્ત્રીભિર્ગૃહીતો રતિકર્કશાભિઃ ।
વિમાનપૃષ્ઠાન્ન મહીં જગામ વિમાનપૃષ્થાદિવ પુણ્યકર્મા ॥ ૨।૩૨
નૃપસ્તુ તસ્યૈવ વિવૃદ્ધિહેતોસ્તદ્ભાવિનાર્થેન ચ ચોદ્યમાનઃ ।
શમેઽભિરેમે વિરરામ પાપાદ્ભેજે દમં સંવિબભાજ સાધૂન્ ॥ ૨।૩૩
નાધીરવત્ કામસુખે સસઞ્જે ન સંરરઞ્જે વિષમં જનન્યામ્ ।
ધૃત્યેન્દ્રિયાશ્વાંશ્ચપલાન્ વિજિગ્યે બન્ધૂંશ્ચ પૌરાંશ્ચ ગુણૈર્જિગાય ॥ ૨।૩૪
નાધ્યૈષ્ટ દુઃખાય પરસ્ય વિદ્યાં જ્ઞાનં શિવં યત્તુ તદધ્યગીષ્ટ ।
સ્વાભ્યઃ પ્રજાભ્યો હિ યથા તથૈવ સર્વપ્રજાભ્યઃ શિવમાશશંસે ॥ ૨।૩૫
તં ભાસુરં ચાઙ્ગિરસાધિદેવં યથાવદાનર્ચ તદાયુષે સઃ ।
જુહાવ હવ્યાન્યકૃશે કૃશાનૌ દદૌ દ્વિજેભ્યઃ કૃશનં ચ ગાશ્ચ ॥ ૨।૩૬
સસ્નૌ શરીરં પવિતું મનશ્ચ તીર્થામ્બુભિશ્ચૈવ ગુણાંબુભિશ્ચ ।
વેદોપદિષ્ટં સમમાત્મજં ચ સોમં પપૌ શાન્તિસુખં ચ હાર્દમ્ ॥ ૨।૩૭
સાન્ત્વં બભાષે ન ચ નાર્થવદ્યજ્જજલ્પ તત્ત્વં ન ચ વિપ્રિયં યત્ ।
સાન્ત્વં હ્યતત્વં પરુષં ચ તત્ત્વં હ્રિયાશકન્નાત્મન એવ વક્તુમ્ ॥ ૨।૩૮
ઇષ્ટેષ્વનિષ્ટેષુ ચ કાર્યવત્સુ ન રાગદોષાશ્રયતાં પ્રપેદે ।
શિવં સિષેવેઽવ્યવહારલબ્ધં યજ્ઞં હિ મેને ન તથા યથાવત્ ॥ ૨।૩૯
આશાવતે ચાભિગતાય સદ્યો દેયામ્બુભિસ્તર્ષમચેચ્છિદિષ્ટ ।
યુદ્ધાદૃતે વૃત્તપરશ્વધેન દ્વિદ્દર્પમુદ્વૃત્તમબેભિદિષ્ટ ॥ ૨।૪૦
એકં વિનિન્યે સ જુગોપ સપ્ત સપ્તૈવ તત્યાજ રરક્ષ પઞ્ચ ।
પ્રાપ ત્રિવર્ગં બુબુધે ત્રિવર્ગં જજ્ઞે દ્વિવર્ગં પ્રજહૌ દ્વિવર્ગમ્ ॥ ૨।૪૧
કૃતાગસોઽપિ પ્રતિપાદ્ય વધ્યાન્નાજીઘનન્નાપિ રુષા દદર્શ ।
બબન્ધ સાન્ત્વેન ફલેન ચૈતાંસ્ત્યાગોઽપિ તેષાં હ્યનપાયદૃષ્ટઃ ॥ ૨।૪૨

આર્ષાણ્યચારીત્પરમવ્રતાનિ વૈરાણ્યહાસીચ્ચિરસમ્ભૃતાનિ ।
યશાંસિ ચાપદ્ગુણગન્ધવન્તિ રજાંસ્યહાસીન્મલિનીકરાણિ ॥ ૨।૪૩
ન ચાજિહીર્ષીદ્બલિમપ્રવૃત્તં ન ચાચિકીર્ષીત્પરવસ્ત્વભિધ્યામ્ ।
ન ચાવિવક્ષીદ્દ્વિષતામધર્મં ન ચાદિધક્ષીદ્ધૃદયેન મન્યુમ્ ॥ ૨।૪૪
તસ્મિંસ્તથા ભૂમિપતૌ પ્રવૃત્તે ભૃત્યાશ્ચ પૌરાશ્ચ તથૈવ ચેરુઃ ।
શમાત્મકે ચેતસિ વિપ્રસન્ને પ્રયુક્તયોગસ્ય યથેન્દ્રિયાણિ ॥ ૨।૪૫
કાલે તતશ્ચારુપયોધરાયાં યશોધરાયાં સુયશોધરાયામ્ ।
શૌદ્ધોદનેરાહુસપત્નવક્ત્રો જજ્ઞે સુતો રાહુલ એવ નામ્ના ॥ ૨।૪૬
અથેષ્ટપુત્રઃ પરમપ્રતીતઃ કુલસ્ય વૃદ્ધિં પ્રતિ ભૂમિપાલઃ ।
યથૈવ પુત્રપ્રસવે નનન્દ તથૈવ પૌત્રપ્રસવે નનન્દ ॥ ૨।૪૭
પૌત્રસ્ય મે પુત્રગતો મમૈવ સ્નેહઃ કથં સ્યાદિતિ જાતહર્ષઃ ।
કાલે સ તં તં વિધિમાલલમ્બે પુત્રપ્રિયઃ સ્વર્ગમિવારુરુક્ષન્ ॥ ૨।૪૮
સ્થિત્વા પથિ પ્રાથમકલ્પિકાનાં રાજર્ષભાણાં યશસાન્વિતાનામ્ ।
શુક્લાન્યમુક્ત્વાપિ તપાંસ્યતપ્ત યજ્ઞૈ ચ હિંસારહિતૈરયષ્ટ ॥ ૨।૪૯
અજાજ્વલિષ્ટાથ સ પુણ્યકર્મા નૃપશ્રિયા ચૈવ તપઃશ્રિયા ચ ।
કુલેન વૃત્તેન ધિયા ચ દીપ્તસ્તેજઃ સહસ્રાંશુરિવોત્સિસૃક્ષુઃ ॥ ૨।૫૦
સ્વાયમ્ભુવં ચાર્ચિકમર્ચયિત્વા જજાપ પુત્રસ્થિતયે સ્થિતશ્રીઃ ।
ચકાર કર્માણિ ચ દુષ્કરાણિ પ્રજાઃ સિસૃક્ષુઃ ક ઇવાદિકાલે ॥ ૨।૫૧
તત્યાજ શસ્ત્રં વિમમર્શ શાસ્ત્રં શમં સિષેવે નિયમં વિષેહે ।
વશીવ કઞ્ચિદ્વિષયં ન ભેજે પિતેવ સર્વાન્વિષયાન્ દદર્શ ॥ ૨।૫૨
બભાર રાજ્યં સ હિ પુત્રહેતોઃ પુત્રં કુલાર્થં યશસે કુલં તુ ।
સ્વર્ગાય શબ્દં દિવમાત્મહેતોર્ધર્માર્થમાત્મસ્થિતિમાચકાઙ્ક્ષ ॥ ૨।૫૩
એવં સ ધર્મં વિવિધં ચકાર સદ્ભિર્નિપાતં શ્રુતિતશ્ચ સિદ્ધમ્ ।
દૃષ્ટ્વા કથં પુત્રમુખં સુતો મે વનં ન યાયાદિતિ નાથમાનઃ ॥ ૨।૫૪
રિરક્ષિષન્તઃ શ્રિયમાત્મસંસ્થા રક્ષન્તિ પુત્રાન્ ભુવિ ભૂમિપાલાઃ ।
પુત્રં નરેન્દ્રઃ સ તુ ધર્મકામો રરક્ષ ધર્માદ્વિષયેષ્વમુઞ્ચત્ ॥ ૨।૫૫
વનમનુપમસત્ત્વા બોધિસત્ત્વાસ્તુ સર્વે
વિષયસુખરસજ્ઞા જગ્મુરુત્પન્નપુત્રાઃ ।
અત ઉપચિતકર્મા રૂઢમૂલેऽપિ હેતૌ
સ રતિમુપસિષેવે બોધિમાપન્નયાવત્ ॥ ૨।૫૬
ઇતિ શ્રીબુદ્ધચરિતે મહાકાવ્યેऽન્તઃપુરવિહારો નામ દ્વિતીયઃ સર્ગઃ ॥ ૨ ॥

Book III [સંવેગોત્પત્તિઃ]

તતઃ કદાચિન્મૃદુશાદ્વલાનિ પુંસ્કોકિલોન્નાદિતપાદપાનિ ।
શુશ્રાવ પદ્માકરમણ્ડિતાનિ શીતે નિબદ્ધાનિ સ કાનનાનિ ॥ ૩।૧
શ્રુત્વા તતઃ સ્ત્રીજનવલ્લભાનાં મનોજ્ઞભાવં પુરકાનનાનામ્ ।
બહિઃપ્રયાણાય ચકાર બુદ્ધિમન્તર્ગૃહે નાગ ઇવાવરુદ્ધઃ ॥ ૩।૨
તતો નૃપસ્તસ્ય નિશમ્ય ભાવં પુત્રાભિધાનસ્ય મનોરથસ્ય ।
સ્નેહસ્ય લક્ષ્મ્યા વયસશ્ચ યોગ્યામ્-આજ્ઞાપયામાસ વિહારયાત્રામ્ ॥ ૩।૩
નિવર્તયામાસ ચ રાજમાર્ગે સમ્પાતમાર્તસ્ય પૃથગ્જનસ્ય ।
મા ભૂત્કુમારઃ સુકુમારચિત્તઃ સંવિગ્નચેતા ઇવ મન્યમાનઃ ॥ ૩।૪
પ્રત્યઙ્ગહીનાન્ વિકલેન્દ્રિયાંશ્ચ જીર્ણાતુરાદીન્ કૃપણાંશ્ચ ભિક્ષૂન્ ।
તતઃ સમુત્સાર્ય પરેણ સામ્ના શોભાં પરા રાજપથસ્ય ચક્રુઃ ॥ ૩।૫
તતઃ કૃતે શ્રીમતિ રાજમાર્ગે શ્રીમાન્ વિનીતાનુચરઃ કુમારઃ ।
પ્રાસાદપૃષ્ઠાદવતીર્ય કાલે કૃતાભ્યનુજ્ઞો નૃપમભ્યગચ્છત્ ॥ ૩।૬
અથો નરેન્દ્રઃ સુતમાગતાશ્રુઃ શિરસ્યુપાઘ્રાય ચિરં નિરીક્ષ્ય ।
ગચ્છેતિ ચાજ્ઞાપયતિ સ્મ વાચા સ્નેહાન્ન ચૈનં મનસા મુમોચ ॥ ૩।૭
તતઃ સ જામ્બૂનદભાણ્ડભૃદ્ભિર્યુક્તં ચતુર્ભિર્નિભૃતૈસ્તુરઙ્ગૈઃ ।
અક્લીવવિદ્યુચ્છુચિરશ્મિધારં હિરણ્મયં સ્યન્દનમારુરોહ ॥ ૩।૮
તતઃ પ્રકીર્ણોજ્જ્વલપુષ્પજાલં વિષક્તમાલ્યં પ્રચલત્પતાકમ્ ।
માર્ગં પ્રપેદે સદૃશાનુયાત્રશ્ચન્દ્રઃ સનક્ષત્ર ઇવાન્તરીક્ષમ્ ॥ ૩।૯
કૌતૂહલાત્સ્ફીततરૈશ્ચ નેત્રૈર્નીલોત્પલાભૈરિવ કીર્યમાણઃ ।
શનૈઃ શનૈ રાજપથં જગાહે પૌરૈઃ સમન્તાદભિવીક્ષ્યમાણઃ ॥ ૩।૧૦
તં તુષ્ટુવુઃ સૌમ્યગુણેન કેચિદ્વવન્દિરે દીપ્તતયા તથાન્યે ।
સૌમુખ્યતસ્તુ શ્રિયમસ્ય કેચિદ્વૈપુલ્યમાશંસિષુરાયુષશ્ચ ॥ ૩।૧૧
નિઃસૃત્ય કુબ્જાશ્ચ મહાકુલેભ્યો વ્યૂહાશ્ચ કૈરાતકવામનાનામ્ ।
નાર્યઃ કૃશેભ્યશ્ચ નિવેશનેભ્યો દેવાનુયાનધ્વજવત્ પ્રણેમુઃ ॥ ૩।૧૨
તતઃ કુમારઃ ખલુ ગચ્છતીતિ શ્રુત્વા સ્ત્રિયઃ પ્રેષ્યજનાત્પ્રવૃત્તિમ્ ।
દિદૃક્ષયા હર્મ્યતલાનિ જગ્મુર્જનેન માન્યેન કૃતાભ્યનુજ્ઞાઃ ॥ ૩।૧૩
તાઃ સ્રસ્તકાઞ્ચીગુણવિઘ્નિતાશ્ચ સુપ્તપ્રબુદ્ધાકુલલોચનાશ્ચ ।
વૃત્તાન્તવિન્યસ્તવિભૂષણાશ્ચ કૌતૂહલેનાપિ ભૃતાઃ પરીયુઃ ॥ ૩।૧૪
પ્રાસાદસોપાનતલપ્રણાદૈઃ કાઞ્ચીરવૈર્નૂપુરનિસ્વનૈશ્ચ ।
વિભ્રામયન્ત્યો ગૃહપક્ષિસઙ્ઘાનન્યોન્યવેગાંશ્ચ સમાક્ષિપન્ત્યઃ ॥ ૩।૧૫

કાસાઞ્ચિદાસાં તુ વરાઙ્ગનાનાં જાતત્વરાણામપિ સોત્સુકાનામ્ ।
ગતિં ગુરુત્વાજ્જગૃહુર્વિશાલાઃ શ્રોણીરથાઃ પીનપયોધરાશ્ચ ॥ ૩।૧૬
શીઘ્રં સમર્થાપિ તુ ગન્તુમન્યા ગતિં નિજગ્રાહ યયૌ ન તૂર્ણમ્ ।
હ્રિયા પ્રગલ્ભાનિ નિગૂહમાના રહઃ પ્રયુક્તાનિ વિભૂષણાનિ ॥ ૩।૧૭
પરસ્પરોત્પીડનપિણ્ડિતાનાં સમ્મર્દસંક્ષોભિતકુણ્ડલાનામ્ ।
તાસાં તદા સસ્વનભૂષણાનાં વાતાયનેષ્વપ્રશમો બભૂવ ॥ ૩।૧૮
વાતાયનેભ્યસ્તુ વિનિઃસૃતાનિ પરસ્પરોપાસિતકુણ્ડલાનિ ।
સ્ત્રીણાં વિરેજુર્મુખપઙ્કજાનિ સક્તાનિ હર્મ્યેષ્વિવ પઙ્કજાનિ ॥ ૩।૧૯
તતો વિમાનૈર્યુવતીકલાપૈઃ કૌતૂહલોદ્ઘાટિતવાતયાનૈઃ ।
શ્રીમત્સમન્તાન્નગરં બભાસે વિયદ્વિમાનૈરિવ સાપ્સરોભિઃ ॥ ૩।૨૦
વાતાયનાનામવિશાલભાવાદન્યોન્યગણ્ડાર્પિતકુણ્ડલાનિ ।
મુખાનિ રેજુઃ પ્રમદોત્તમાનાં બદ્ધાઃ કલાપ ઇવ પઙ્કજાનામ્ ॥ ૩।૨૧
તસ્મિન્ કુમારં પથિ વીક્ષમાણાઃ સ્ત્રિયો બભુર્ગામિવ ગન્તુકામાઃ ।
ઊર્ધ્વોન્મુખાશ્ચૈનમુદીક્ષમાણા નરા બભુર્દ્યામિવ ગન્તુકામાઃ ॥ ૩।૨૨
દૃષ્ટ્વા ચ તં રાજસુતં સ્ત્રિયસ્તા જાજ્વલ્યમાનં વપુષા શ્રિયા ચ ।
ધન્યાસ્ય ભાર્યેતિ શનૈરવોચઞ્શુદ્ધૈર્મનોભિઃ ખલુ નાન્યભાવાત્ ॥ ૩।૨૩
અયં કિલ વ્યાયતપીનબાહૂ રૂપેણ સાક્ષાદિવ પુષ્પકેતુઃ ।
ત્યક્ત્વા શ્રિયં ધર્મમુપૈષ્યતીતિ તસ્મિન્ હિતા ગૌરવમેવ ચક્રુઃ ॥ ૩।૨૪
કીર્ણં તથા રાજપથં કુમારઃ પૌરૈર્વિનીતૈઃ શુચિધીરવેષૈઃ ।
તત્પૂર્વમાલોક્ય જહર્ષ કિઞ્ચિન્મેને પુનર્ભાવમિવાત્મનશ્ચ ॥ ૩।૨૫
પુરં તુ તત્સ્વર્ગમિવ પ્રહૃષ્ટં શુદ્ધાધિવાસાઃ સમવેક્ષ્ય દેવાઃ ।
જીર્ણં નરં નિર્મમિરે પ્રયાતું સઞ્ચોદનાર્થં ક્ષિતિપાત્મજસ્ય ॥ ૩।૨૬
તતઃ કુમારો જરયાભિભૂતં દૃષ્ટ્વા નરેભ્યઃ પૃથગાકૃતિં તમ્ ।
ઉવાચ સઙ્ગ્રાહકમાગતાસ્થસ્તત્રૈવ નિષ્કમ્પનિવિષ્ટદૃષ્ટિઃ ॥ ૩।૨૭
ક એષ ભોઃ સૂત નરોઽભ્યુપેતઃ કેશૈઃ સિતૈર્યષ્ટિવિષક્તહસ્તઃ ।
ભ્રૂસંવૃતાક્ષઃ શિથિલાનતાઙ્ગઃ કિં વિક્રિયૈષા પ્રકૃતિર્યદૃચ્છા ॥ ૩।૨૮
ઇત્યેવમુક્તઃ સ રથપ્રણેતા નિવેદયામાસ નૃપાત્મજાય ।
સંરક્ષ્યમપ્યર્થમદોષદર્શી તૈરેવ દેવૈઃ કૃતબુદ્ધિમોહઃ ॥ ૩।૨૯
રૂપસ્ય હર્ત્રી વ્યસનં બલસ્ય શોકસ્ય યોનિર્નિધનં રતીનામ્ ।
નાશઃ સ્મૃતીનાં રિપુરિન્દ્રિયાણામેષા જરા નામ યયૈષ ભગ્નઃ ॥ ૩।૩૦
પીતં હ્યનેનાપિ પયઃ શિશુત્વે કાલેન ભૂયઃ પરિમૃષ્ટમુર્વ્યામ્ ।
ક્રમેણ ભૂત્વા ચ યુવા વપુષ્માન્ ક્રમેણ તેનૈવ જરામુપેતઃ ॥ ૩।૩૧

ઇત્યેવમુક્તે ચલિતઃ સ કિઞ્ચિદ્રાજાત્મજઃ સૂતમિદં બભાષે ।
કિમેષ દોષો ભવિતા મમાપીત્યસ્મૈ તતઃ સારથિરભ્યુવાચ ॥ ૩।૩૨
આયુષ્મતોઽપ્યેષ વયઃપ્રકર્ષાન્નિઃસંશયં કાલવશેન ભાવી ।
એવં જરાં રૂપવિનાશયિત્રીં જાનાતિ ચૈવેચ્છતિ ચૈષ લોકઃ ॥ ૩।૩૩
તતઃ સ પૂર્વાશયશુદ્ધબુદ્ધિર્વિસ્તીર્ણકલ્પાચિતપુણ્યકર્મા ।
શ્રુત્વા જરાં સંવિવિજે મહાત્મા મહાશનેર્ઘોષમિવાન્તિકે ગૌઃ ॥ ૩।૩૪
નિઃશ્વસ્ય દીર્ઘં સ શિરઃ પ્રકમ્પ્ય તસ્મિંશ્ચ જીર્ણે વિનિવેશ્ય ચક્ષુઃ ।
તાં ચૈવ દૃષ્ટ્વા જનતાં સહર્ષાં વાક્યં સ સંવિગ્નમિદં જગાદ ॥ ૩।૩૫
એવં જરા હન્તિ ચ નિર્વિશેષં સ્મૃતિં ચ રૂપં ચ પરાક્રમં ચ ।
ન ચૈવ સંવેગમુપૈતિ લોકઃ પ્રત્યક્ષતોઽપીદૃશમીક્ષમાણઃ ॥ ૩।૩૬
એવં ગતે સૂત નિવર્તયાશ્વાન્ શીઘ્રં ગૃહાણ્યેવ ભવાન્પ્રયાતુ ।
ઉદ્યાનભૂમૌ હિ કુતો રતિર્મે જરાભયે ચેતસિ વર્તમાને ॥ ૩।૩૭
અથાજ્ઞયા ભર્તૃસુતસ્ય તસ્ય નિવર્તયામાસ રથં નિયન્તા ।
તતઃ કુમારો ભવનં તદેવ ચિન્તાવશઃ શૂન્યમિવ પ્રપેદે ॥ ૩।૩૮
યદા તુ તત્રૈવ ન શર્મ લેભે જરા જરેતિ પ્રપરીક્ષમાણઃ ।
તતો નરેન્દ્રાનુમતઃ સ ભૂયઃ ક્રમેણ તેનૈવ બહિર્જગામ ॥ ૩।૩૯
અથાપરં વ્યાધિપરીતદેહં ત એવ દેવાઃ સસૃજુર્મનુષ્યમ્ ।
દૃષ્ટ્વા ચ તં સારથિમાબભાષે શૌદ્ધોદનિસ્તદ્ગતદૃષ્ટિરેવ ॥ ૩।૪૦
સ્થૂલોદરઃ શ્વાસચલચ્છરીરઃ સ્રસ્તાંસબાહુઃ કૃશપાણ્ડુગાત્રઃ ।
અમ્બેતિ વાચં કરુણં બ્રુવાણઃ પરં સમાશ્રિષ્ય નરઃ ક એષઃ ॥ ૩।૪૧
તતોઽબ્રવીત્સારથિરસ્ય સૌમ્ય ધાતુપ્રકોપપ્રભવઃ પ્રવૃદ્ધઃ ।
રોગાભિધાનઃ સુમહાનનર્થઃ શક્રોઽપિ યેનૈષ કૃતોઽસ્વતન્ત્રઃ ॥ ૩।૪૨
ઇત્યૂચિવાન્ રાજસુતઃ સ ભૂયસ્તં સાનુકમ્પો નરમીક્ષમાણઃ ।
અસ્યૈવ જાતઃ પૃથગેષ દોષઃ સામાન્યતો રોગભયં પ્રજાનામ્ ॥ ૩।૪૩
તતો બભાષે સ રથપ્રણેતા કુમાર સાધારણ એષ દોષઃ ।
એવં હિ રોગૈઃ પરિપીડ્યમાનો રુજાતુરો હર્ષમુપૈતિ લોકઃ ॥ ૩।૪૪
ઇતિ શ્રુતાર્થઃ સ વિષણ્ણચેતાઃ પ્રાવેપતામ્બૂર્મિગતઃ શશીવ ।
ઇદં ચ વાક્યં કરુણાયમાનઃ પ્રોવાચ કિઞ્ચિન્મૃદુના સ્વરેણ ॥ ૩।૪૫
ઇદં ચ રોગવ્યસનં પ્રજાનાં પશ્યંશ્ચ વિશ્રમ્ભમુપૈતિ લોકઃ ।
વિસ્તીર્ણવિજ્ઞાનમહો નરાણાં હસન્તિ યે રોગભયૈરમુક્તાઃ ॥ ૩।૪૬
નિવર્ત્યતાં સૂત વહિઃપ્રયાણાન્નરેન્દ્રસદ્મૈવ રથઃ પ્રયાતુ ।
શ્રુત્વા ચ મે રોગભયં રતિભ્યઃ પ્રત્યાહતં સઙ્કુચતીવ ચેતઃ ॥ ૩।૪૭

તતો નિવૃત્તઃ સ નિવૃત્તહર્ષઃ પ્રધ્યાનયુક્તઃ પ્રવિવેશ સદ્મ ।
તં દ્વિસ્તથા પ્રેક્ષ્ય ચ સન્નિવૃત્તં પુર્યાગમં ભૂમિપતિશ્ચકાર ॥ ૩।૪૮
શ્રુત્વા નિમિત્તં તુ નિવર્તનસ્ય સન્ત્યક્તમાત્માનમનેન મેને ।
માર્ગસ્ય શૌચાધિકૃતાય ચૈવ ચુક્રોશ રુષ્ટોઽપિ ચ નોગ્રદણ્ડઃ ॥ ૩।૪૯
ભૂયશ્ચ તસ્મૈ વિદધે સુતાય વિશેષયુક્તં વિષયપ્રકારમ્ ।
ચલેન્દ્રિયત્વાદપિ નાપિ શક્તો નાસ્માન્વિજહ્યાદિતિ નાથમાનઃ ॥ ૩।૫૦
યદા ચ શબ્દાદિભિરિન્દ્રિયાર્થૈરન્તઃપુરે નૈવ સુતોઽસ્ય રેમે ।
તતો વહિર્વ્યાદિશતિ સ્મ યાત્રાં રસાન્તરં સ્યાદિતિ મન્યમાનઃ ॥ ૩।૫૧
સ્નેહાચ્ચ ભાવં તનયસ્ય બુદ્ધ્વા સંવેગદોષાનવિચિન્ત્ય કાંશ્ચિત્ ।
યોગ્યાઃ સમાજ્ઞાપયતિ સ્મ તત્ર કલાસ્વભિજ્ઞા ઇતિ વારમુખ્યાઃ ॥ ૩।૫૨
તતો વિશેષેણ નરેન્દ્રમાર્ગે સ્વલઙ્કૃતે ચૈવ પરીક્ષિતે ચ ।
વ્યત્યાસ્ય સૂતં ચ રથં ચ રાજા પ્રસ્થાપયામાસ બહિઃ કુમારમ્ ॥ ૩।૫૩
તતસ્તથા ગચ્છતિ રાજપુત્રે તૈરેવ દેવૈર્વિહિતો ગતાસુઃ ।
તં ચૈવ માર્ગે મૃતમુહ્યમાનં સૂતઃ કુમારશ્ચ દદર્શ નાન્યઃ ॥ ૩।૫૪
અથાબ્રવીદ્રાજસુતઃ સ સૂતં નરૈશ્ચતુર્ભિર્હ્રિયતે ક એષઃ ।
દીનૈર્મનુષ્યૈરનુગમ્યમાનો યો ભૂષિતોઽશ્વાસ્યવરુધ્યતે ચ ॥ ૩।૫૫
તતઃ સ શુદ્ધાત્મભિરેવ દેવૈઃ શુદ્ધાધિવાસૈરભિભૂતચેતાઃ ।
અવાચ્યમપ્યર્થમિમં નિયન્તા પ્રવ્યાજહારાર્થવિદીશ્વરાય ॥ ૩।૫૬
બુદ્ધીન્દ્રિયપ્રાણગુણૈર્વિયુક્તઃ સુપ્તો વિસઞ્જ્ઞસ્તૃણકાષ્ઠભૂતઃ ।
સમ્બધ્ય સંરક્ષ્ય ચ યત્નવદ્ભિઃ પ્રિયાપ્રિયૈસ્ત્યજ્યત એષ કોઽપિ ॥ ૩।૫૭
ઇતિ પ્રણેતુઃ સ નિશમ્ય વાક્યં સઞ્ચુક્ષુભે કિઞ્ચિદુવાચ ચૈનમ્ ।
કિં કેવલસ્યૈવ જનસ્ય ધર્મઃ સર્વપ્રજાનામયમીદૃશોઽન્તઃ ॥ ૩।૫૮
તતઃ પ્રણેતા વદતિ સ્મ તસ્મૈ સર્વપ્રજાનામયમન્તકર્મા ।
હીનસ્ય મધ્યસ્ય મહાત્મનો વા સર્વસ્ય લોકે નિયતો વિનાશઃ ॥ ૩।૫૯
તતઃ સ ધીરોઽપિ નરેન્દ્રસૂનુઃ શ્રુત્વૈવ મૃત્યું વિષસાદ સદ્યઃ ।
અંસેન સંશ્લિષ્ય ચ કૂબરાગ્રં પ્રોવાચ નિહ્રાદવતા સ્વરેણ ॥ ૩।૬૦
ઇયં ચ નિષ્ઠા નિયતં પ્રજાનાં પ્રમાદ્યતિ ત્યક્તભયશ્ચ લોકઃ ।
મનાંસિ શઙ્કે કઠિનાનિ નૃણાં સ્વસ્થાસ્તથા હ્યધ્વનિ વર્તમાનાઃ ॥ ૩।૬૧
તસ્માદ્રથં સૂત નિવર્ત્યતાં નો વિહારભૂમૌ ન હિ દેશકાલઃ ।
જાનન્વિનાશં કથમાર્ત્તિકાલે સચેતનઃ સ્યાદિહ હિ પ્રમત્તઃ ॥ ૩।૬૨
ઇતિ બ્રુવાણેઽપિ નરાધિપાત્મજે નિવર્તયામાસ સ નૈવ તં રથમ્ ।
વિશેષયુક્તં તુ નરેન્દ્રશાસનાત્સ પદ્મખણ્ડં વનમેવ નિર્યયૌ ॥ ૩।૬૩

તતઃ શિવં કુસુમિતબાલપાદપં પરિભ્રમત્પ્રમુદિતમત્તકોકિલમ્ ।
વિપાનવત્સકમલચારુદીર્ઘિકં દદર્શ તદ્વનમિવ નન્દનં વનમ્ ॥ ૩।૬૪
વરાઙ્ગનાગણકલિલં નૃપાત્મજસ્તતો બલાદ્વનમભિનીયતે સ્મ તત્ ।
વરાપ્સરોવૃતમલકાધિપાલયં નવવ્રતો મુનિરિવ વિઘ્નકાતરઃ ॥ ૩।૬૫
ઇતિ શ્રીબુદ્ધચરિતે મહાકાવ્યે સંવેગૌત્પત્તિર્નામ તૃતીયઃ સર્ગઃ ॥ ૩ ॥

---

Book IV [સ્ત્રીવિઘાતનો]

તતસ્તસ્માત્ પુરોદ્યાનાત્ કૌતૂહલચલેક્ષણાઃ ।
પ્રત્યુજ્જગ્મુર્નૃપસુતં પ્રાપ્તં વરમિવ સ્ત્રિયઃ ॥ ૪।૧
અભિગમ્ય ચ તાસ્તસ્મૈ વિસ્મયોત્ફુલ્લલોચનાઃ ।
ચક્રિરે સમુદાચારં પદ્મકોશનિભૈઃ કરૈઃ ॥ ૪।૨
તસ્થુશ્ચ પરિવાર્યૈનં મન્મથાક્ષિપ્તચેતસઃ ।
નિશ્ચલૈઃ પ્રીતિવિકચૈઃ પિબન્ત્ય ઇવ લોચનૈઃ ॥ ૪।૩
તં હિ તા મેનિરે નાર્યઃ કામો વિગ્રહવાનિતિ ।
શોભિતં લક્ષણૈર્દીપ્તૈઃ સહજૈર્ભૂષણૈરિવ ॥ ૪।૪
સૌમ્યત્વાચ્ચૈવ ધૈર્યાચ્ચ કાશ્ચિદેનં પ્રજજ્ઞિરે ।
અવતીર્ણો મહીં સાક્ષાદ્ સુધાંશુશ્ચન્દ્રમા ઇવ ॥ ૪।૫
તસ્ય તા વપુષાક્ષિપ્તા નિર્ગ્રહીતું જજૃમ્ભિરે ।
અન્યોન્યં દૃષ્ટિભિર્ગત્વા શનૈશ્ચ વિનિશશ્વસુઃ ॥ ૪।૬
એવં તા દૃષ્ટિમાત્રેણ નાર્યો દદૃશુરેવ તમ્ ।
ન વ્યાજહ્રુર્ન જહસુઃ પ્રભાવેણાસ્ય યન્ત્રિતાઃ ॥ ૪।૭
તાસ્તથા તુ નિરારમ્ભા દૃષ્ટ્વા પ્રણયવિક્લવાઃ ।
પુરોહિતસુતો ધીમાનુદાયી વાક્યમબ્રવીત્ ॥ ૪।૮
સર્વાઃ સર્વકલાજ્ઞાઃ સ્થ ભાવગ્રહણપણ્ડિતાઃ ।
રૂપચાતુર્યસમ્પન્નાઃ સ્વગુણૈર્મુખ્યતાં ગતાઃ ॥ ૪।૯
શોભયેત ગુણૈરેભિરપિ તાનુત્તરાન્ કુરૂન્ ।
કુવેરસ્યાપિ ચ ક્રીડં પ્રાગેવ વસુધામિમામ્ ॥ ૪।૧૦
શક્તાશ્ચાલયિતું યૂયં વીતરાગાનૃષીનપિ ।
અપ્સરોભિશ્ચ કલિતાન્ ગ્રહીતું વિબુધાનપિ ॥ ૪।૧૧
ભાવજ્ઞાનેન હાવેન ચાતુર્યાદ્રૂપસમ્પદા ।
સ્ત્રીણામેવ ચ શક્તાઃ સ્થ સંરાગે કિં પુનર્નૃણામ્ ॥ ૪।૧૨

તાસામેવંવિધાનાં વો નિયુક્તાનાં સ્વગોચરે ।
ઇયમેવંવિધા ચેષ્ટા ન તુષ્ટોઽસ્મ્યાર્જવેન વઃ ॥ ૪।૧૩
ઇદં નવવધૂનાં વો હ્રીનિકુઞ્ચિતચક્ષુષામ્ ।
સદૃશં ચેષ્ટિતં હિ સ્યાદપિ વા ગોપયોષિતામ્ ॥ ૪।૧૪
યદ્યપિ સ્યાદયં વીરઃ શ્રીપ્રભાવાન્મહાનિતિ ।
સ્ત્રીણામપિ મહત્તેજ ઇતિ કાર્યોઽત્ર નિશ્ચયઃ ॥ ૪।૧૫
પુરા હિ કાશિસુન્દર્યા વેશવધ્વા મહાનૃષિઃ ।
તાડિતોઽભૂત્ પદન્યાસાદ્દુર્ધર્ષો દૈવતૈરપિ ॥ ૪।૧૬
મન્થાલગૌતમો ભિક્ષુર્જઙ્ઘયા બાલમુખ્યયા ।
પિપ્રીષુશ્ચ તદર્થાર્થં વ્યસૂન્ નિરહરત્ પુરા ॥ ૪।૧૭
ગૌતમં દીર્ઘતપસં મહાર્ષિં દીર્ઘજીવિનમ્ ।
યોષિત્ સન્તોષયામાસ વર્ણસ્થાનાવરા સતી ॥ ૪।૧૮
ઋષ્યશૃઙ્ગં મુનિસુતં તથૈવ સ્ત્રીષ્વપણ્ડિતમ્ ।
ઉપાયૈર્વિવિધૈઃ શાન્તા જગ્રાહ ચ જહાર ચ ॥ ૪।૧૯
વિશ્વામિત્રો મહર્ષિશ્ચ વિગાઢોઽપિ મહત્તપાઃ ।
દશવર્ષાણ્યરણ્યસ્થો ઘૃતાચ્યાપ્સરસા હૃતઃ ॥ ૪।૨૦
એવમાદીનૃષીંસ્તાંસ્તાનનયન્ વિક્રિયાં સ્ત્રિયઃ ।
લલિતં પૂર્વવયસં કિં પુનર્નૃપતેઃ સુતમ્ ॥ ૪।૨૧
તદેવં સતિ વિશ્રબ્ધં પ્રયતધ્વં તથા યથા ।
ઇયં નૃપસ્ય વંશશ્રીરિતો ન સ્યાત્પરાઙ્મુખી ॥ ૪।૨૨
યા હિ કાશ્ચિદ્યુવતયો હરન્તિ સદૃશં જનમ્ ।
નિકૃષ્ટોત્કૃષ્ટયોર્ભાવં યા ગૃહ્ણન્તિ તુ તાઃ સ્ત્રિયઃ ॥ ૪।૨૩
ઇત્યુદાયિવચઃ શ્રુત્વા તા વિદ્ધા ઇવ યોષિતઃ ।
સમારુરુહુરાત્માનં કુમારગ્રહણં પ્રતિ ॥ ૪।૨૪
તા ભ્રૂભિઃ પ્રેક્ષિતૈર્ભાવૈર્હસિતૈર્લલિતૈર્ગતૈઃ ।
ચક્રુરાક્ષેપિકાશ્ચેષ્ટા ભીતભીતા ઇવાઙ્ગનાઃ ॥ ૪।૨૫
રાજ્ઞસ્તુ વિનિયોગેન કુમારસ્ય ચ માર્દવાત્ ।
જહુઃ ક્ષિપ્રમવિશ્રમ્ભં મદેન મદનેન ચ ॥ ૪।૨૬
અથ નારીજનવૃતઃ કુમારો વ્યચરદ્વનમ્ ।
વાસિતાયૂથસહિતઃ કરીવ હિમવદ્વનમ્ ॥ ૪।૨૭
સ તસ્મિન્ કાનને રમ્યે જજ્વાલ સ્ત્રીપુરઃસરઃ ।
આક્રીડ ઇવ બભ્રાજે વિવસ્વાનપ્સરોવૃતઃ ॥ ૪।૨૮

મદેનાવર્જિતા નામ તં કાશ્ચિત્તત્ર યોષિતઃ ।
કઠિનૈઃ પસ્પૃશુઃ પીનૈઃ સઙ્ઘટ્ટૈર્વલ્ગુભિઃ સ્તનૈઃ ॥ ૪।૨૯
સ્રસ્તાંસકોમલાલમ્બમૃદુબાહુલતાબલા ।
અનૃતં સ્ખલિતં કાચિત્કૃત્વૈનં સસ્વજે બલાત્ ॥ ૪।૩૦
કાચિત્ તામ્રાધરોષ્ઠેન મુખેનાસવગન્ધિના ।
વિનિશશ્વાસ કર્ણેઽસ્ય રહસ્યં શ્રૂયતામિતિ ॥ ૪।૩૧
કાચિદાજ્ઞાપયન્તીવ પ્રોવાચાર્દ્રાનુલેપના ।
ઇહ ભક્તિં કુરુષ્વેતિ હસ્તં સંશ્લિષ્ય લિપ્સયા ॥ ૪।૩૨
મુહુર્મુહુર્મદવ્યાજસ્રસ્તનીલાંશુકાપરા ।
આલક્ષ્યરસના રેજે સ્ફુરદ્વિદ્યુદિવ ક્ષપા ॥ ૪।૩૩
કાશ્ચિત્કનકકાઞ્ચીભિર્મુખરાભિરિતસ્તતઃ ।
બભ્રમુર્દર્શયન્ત્યોઽસ્ય શ્રોણીસ્તન્વંશુકાવૃતાઃ ॥ ૪।૩૪
ચૂતશાખાં કુસુમિતાં પ્રગૃહ્યાન્યા લલમ્બિરે ।
સુવર્ણકલશપ્રખ્યાન્ દર્શયન્ત્યઃ પયોધરાન્ ॥ ૪।૩૫
કાચિત્પદ્મવનાદેત્ય સપદ્મા પદ્મલોચના ।
પદ્મવક્ત્રસ્ય પાર્શ્વેઽસ્ય પદ્મશ્રીરિવ તસ્થુષી ॥ ૪।૩૬
મધુરં ગીતમન્વર્થં કાચિત્સાભિનયં જગૌ ।
તં સ્વસ્થં ચોદયન્તીવ વઞ્ચિતોઽસીત્યવેક્ષિતૈઃ ॥ ૪।૩૭
શુભેન વદનેનાન્યા ભ્રૂકાર્મુકવિકર્ષિણા ।
પ્રાવૃત્યાનુચકારાસ્ય ચેષ્ટિતં વીરલીલયા ॥ ૪।૩૮
પીનવલ્ગુસ્તની કાચિદ્વાતાઘૂર્ણિતકુણ્ડલા ।
ઉચ્ચૈરવજહાસૈનં સમાપ્નોતુ ભવાનિતિ ॥ ૪।૩૯
અપયાન્તં તથૈવાન્યા બબન્ધુર્માલ્યદામભિઃ ।
કાશ્ચિત્સાક્ષેપમધુરૈર્જગૃહુર્વચનાઙ્કુશૈઃ ॥ ૪।૪૦
પ્રતિયોગાર્થિની કાચિદ્ગૃહીત્વા ચૂતવલ્લરીમ્ ।
ઇદં પુષ્પં તુ કસ્યેતિ પપ્રચ્છ મદવિક્લવા ॥ ૪।૪૧
કાચિત્પુરુષવત્કૃત્વા ગતિં સંસ્થાનમેવ ચ ।
ઉવાચૈનં જિતઃ સ્ત્રીભિર્જય ભોઃ પૃથિવીમિમામ્ ॥ ૪।૪૨
અથ લોલેક્ષણા કાચિજ્જિઘ્રન્તી નીલમુત્પલમ્ ।
કિઞ્ચિન્મદકલૈર્વાક્યૈર્નૃપાત્મજમભાષત ॥ ૪।૪૩
પશ્ય ભર્તશ્ચિતં ચૂતં કુસુમૈર્મધુગન્ધિભિઃ ।
હેમપઞ્જરરુદ્ધો વા કોકિલો યત્ર કૂજતિ ॥ ૪।૪૪

અશોકો દૃશ્યતામેષ કામિશોકવિવર્ધનઃ ।
રુવન્તિ ભ્રમરા યત્ર દહ્યમાના ઇવાગ્નિના ॥ ૪।૪૫
ચૂતયષ્ટ્યા સમાશ્લિષ્ટો દૃશ્યતાં તિલકદ્રુમઃ ।
શુક્લવાસા ઇવ નરઃ સ્ત્રિયા પીતાઙ્ગરાગયા ॥ ૪।૪૬
ફુલ્લં કુરુવકં પશ્ય નિર્મુક્તાલક્તકપ્રભમ્ ।
યો નખપ્રભયા સ્ત્રીણાં નિર્ભર્ત્સિત ઇવાનતઃ ॥ ૪।૪૭
બાલાશોકશ્ચ નિચિતો દૃશ્યતામેષ પલ્લવૈઃ ।
યોઽસ્માકં હસ્તશોભાભિર્લજ્જમાન ઇવ સ્થિતઃ ॥ ૪।૪૮
દીર્ઘિકાં પ્રાવૃતાં પશ્ય તીરજૈઃ સિન્દુવારકૈઃ ।
પાણ્ડુરાંશુકસંવીતાં શયાનાં પ્રમદામિવ ॥ ૪।૪૯
દૃશ્યતાં સ્ત્રીષુ માહાત્મ્યં ચક્રવાકો હ્યસૌ જલે ।
પૃષ્ઠતઃ પ્રેષ્યવદ્ભાર્યામનુવૃત્યાનુગચ્છતિ ॥ ૪।૫૦
મત્તસ્ય પરપુષ્ટસ્ય રુવતઃ શ્રૂયતાં ધ્વનિઃ ।
અપરઃ કોકિલોઽનુત્કઃ પ્રતિશ્રુત્યેવ કૂજતિ ॥ ૪।૫૧
અપિ નામ વિહઙ્ગાનાં વસન્તેનાહિતો મદઃ ।
ન તુ ચિન્તયતશ્ચિત્તં જનસ્ય પ્રાજ્ઞમાનિનઃ ॥ ૪।૫૨
ઇત્યેવં તા યુવતયો મન્મથોદ્દામચેતસઃ ।
કુમારં વિવિધૈસ્તૈસ્તૈરુપચક્રમિરે નયૈઃ ॥ ૪।૫૩
એવમાક્ષિપ્યમાણોઽપિ સ તુ ધૈર્યાવૃતેન્દ્રિયઃ ।
મર્તવ્યમિતિ સોદ્વેગો ન જહર્ષ ન સિસ્મિયે ॥ ૪।૫૪
તાસાં તત્ત્વેન વસ્થાનં દૃષ્ટ્વા સ પુરુષોત્તમઃ ।
સસંવિગ્નેન ધીરેણ ચિન્તયામાસ ચેતસા ॥ ૪।૫૫
કિં વિના નાવગચ્છન્તિ ચપલં યૌવનં સ્ત્રિયઃ ।
યતો રૂપેણ સમ્પન્નં જરેયં નાશયિષ્યતિ ॥ ૪।૫૬
નૂનમેતા ન પશ્યન્તિ કસ્યચિદ્ રોગસમ્પ્લવમ્ ।
તથા હૃષ્ટા ભયં ત્યક્ત્વા જગતિ વ્યાધિધર્મિણિ ॥ ૪।૫૭
અનભિજ્ઞાશ્ચ સુવ્યક્તં મૃત્યોઃ સર્વાપહારિણઃ ।
તથા સ્વસ્થા નિરુદ્વેગાઃ ક્રીડન્તિ ચ હસન્તિ ચ ॥ ૪।૫૮
જરાં વ્યાધિં ચ મૃત્યું ચ કો હિ જાનન્ સચેતનઃ ।
સ્વસ્થસ્તિષ્ઠન્ નિષીદેદ્વા સુપેદ્વા કિં પુનર્હસેત્ ॥ ૪।૫૯
યસ્તુ દૃષ્ટ્વા પરં જીર્ણં વ્યાધિતં મૃતમેવ ચ ।
સ્વસ્થો ભવતિ નોદ્વિગ્નો યથાચેતાસ્તથૈવ સઃ ॥ ૪।૬૦

વિયુજ્યમાનેઽપિ તરૌ પુષ્પૈરપિ ફલૈરપિ ।
પતતિ ચ્છિદ્યમાને વા તરુરન્યો ન શોચતે ॥ ૪।૬૧
ઇતિ ધ્યાનપરં દૃષ્ટ્વા વિષયેભ્યો ગતસ્પૃહમ્ ।
ઉદાયી નીતિશાસ્ત્રજ્ઞસ્તમુવાચ સુહૃત્તયા ॥ ૪।૬૨
અહં નૃપતિના દત્તઃ સખા તુભ્યં ક્ષમઃ કિલ ।
યસ્માત્ત્વયિ વિવક્ષા મે તયા પ્રણયવત્તયા ॥ ૪।૬૩
અહિતાત્ પ્રતિષેધશ્ચ હિતે ચાનુપ્રવર્તનમ્ ।
વ્યસને ચાપરિત્યાગસ્ત્રિવિધં મિત્રલક્ષણમ્ ॥ ૪।૬૪
સોઽહં મૈત્રીં પ્રતિજ્ઞાય પુરુષાર્થાત્પરાઙ્મુખમ્ ।
યદિ ત્વાં સમુપેક્ષેયં ન ભવેન્મિત્રતા મયિ ॥ ૪।૬૫
તદ્બ્રવીમિ સુહૃદ્ભૂત્વા તરુણસ્ય વપુષ્મતઃ ।
ઇદં ન પ્રતિરૂપં તે સ્ત્રીષ્વદાક્ષિણ્યમીદૃશમ્ ॥ ૪।૬૬
અનૃતેનાપિ નારીણાં યુક્તં સમનુવર્તનમ્ ।
તદ્વ્રીડાપરિહારાર્થમાત્મરત્યર્થમેવ ચ ॥ ૪।૬૭
સન્નતિસ્ચાનુવૃત્તિશ્ચ સ્ત્રીણાં હૃદયબન્ધનમ્ ।
સ્નેહસ્ય હિ ગુણા યોનિર્માનકામાશ્ચ યોષિતઃ ॥ ૪।૬૮
તદર્હસિ વિશાલાક્ષ હૃદયેઽપિ પરાઙ્મુખે ।
રૂપસ્યાસ્યાનુરૂપેણ દાક્ષિણ્યેનાનુવર્તિતુમ્ ॥ ૪।૬૯
દાક્ષિણ્યમૌષધં સ્ત્રીણાં દાક્ષિણ્યં ભૂષણં પરમ્ ।
દાક્ષિણ્યરહિતં રૂપં નિષ્પુષ્પમિવ કાનનમ્ ॥ ૪।૭૦
કિં વા દાક્ષિણ્યમાત્રેણ ભાવેનાસ્તુ પરિગ્રહઃ ।
વિષયાન્ દુર્લભાંલ્લબ્ધ્વા ન હ્યવજ્ઞાતુમર્હસિ ॥ ૪।૭૧
કામં પરમિતિ જ્ઞાત્વા દેવોઽપિ હિ પુરન્દરઃ ।
ગૌતમસ્ય મુનેઃ પત્નીમહલ્યાં ચકમે પુરા ॥ ૪।૭૨
અગસ્ત્યઃ પ્રાર્થયામાસ સોમભાર્યાં ચ રોહિણીમ્ ।
તસ્માત્ તત્સદૃશં લેભે લોપામુદ્રામિતિ શ્રુતિઃ ॥ ૪।૭૩
ઔતથ્યસ્ય ચ ભાર્યાયાં મમતાયાં મહાતપાઃ ।
મારુત્યાં જનયામાસ ભરદ્વાજં બૃહસ્પતિઃ ॥ ૪।૭૪
બૃહસ્પતેર્મહિષ્યાં ચ જુહ્વત્યાં જુહ્વતાં વરઃ ।
બુધં વિબુધધર્માણં જનયામાસ ચન્દ્રમાઃ ॥ ૪।૭૫
કાલીમ્ ચૈવ પુરા કન્યાં જલપ્રભવસમ્ભવામ્ ।
જગામ યમુનાતીરે જાતરાગઃ પરાશરઃ ॥ ૪।૭૬

માતઙ્ગ્યામક્ષમાલાયાં ગર્હિતાયાં રિરંસયા ।
કપિઞ્જલાદં તનયં વસિષ્ઠોઽજનયન્મુનિઃ ॥ ૪।૭૭
યયાતિશ્ચૈવ રાજર્ષિર્વયસ્યપિ વિનિર્ગતે ।
વિશ્વાચ્યાપ્સરસા સાર્ધં રેમે ચૈત્રરથે વને ॥ ૪।૭૮
સ્ત્રીસંસર્ગં વિનાશાન્તં પાણ્ડુર્જ્ઞાત્વાપિ કૌરવઃ ।
માદ્રીરૂપગુણાક્ષિપ્તઃ સિષેવે કામજં સુખમ્ ॥ ૪।૭૯
કરાલજનકશ્ચૈવ હૃત્વા બ્રાહ્મણકન્યકામ્ ।
અવાપ ભ્રંશમ્ અપ્યેવ ન તુ ત્યજેચ્ચ મન્મથમ્ ॥ ૪।૮૦
એવમાદ્યા મહાત્માનો વિષયાન્ ગર્હિતાનપિ ।
રતિહેતોર્બુભુજિરે પ્રાગેવ ગુણસંહિતાન્ ॥ ૪।૮૧
ત્વં પુનર્ન્યાયતઃ પ્રાપ્તાન્ બલવાન્ રૂપવાન્ યુવા ।
વિષયાનવજાનાસિ યત્ર સક્તમિદં જગત્ ॥ ૪।૮૨
ઇતિ શ્રુત્વા વચસ્તસ્ય શ્લક્ષ્ણમાગમસંહિતમ્ ।
મેઘસ્તનિતનિર્ઘોષઃ કુમારઃ પ્રત્યભાષત ॥ ૪।૮૩
ઉપપન્નમિદં વાક્યં સૌહાર્દવ્યઞ્જકં ત્વયિ ।
અત્ર ચ ત્વાનુનેષ્યામિ યત્ર મા દુષ્ટુ મન્યસે ॥ ૪।૮૪
નાવજાનામિ વિષયાઞ્જાને લોકં તદાત્મકમ્ ।
અનિત્યં તુ જગન્મત્વા નાત્ર મે રમતે મનઃ ॥ ૪।૮૫
જરા વ્યાધિશ્ચ મૃત્યુશ્ચ યદિ ન સ્યાદિદં ત્રયમ્ ।
મમાપિ હિ મનોજ્ઞેષુ વિષયેષુ રતિર્ભવેત્ ॥ ૪।૮૬
નિત્યં યદ્યપિ હિ સ્ત્રીણામેતદેવ વપુર્ભવેત્ ।
સસંવિત્કસ્ય કામેષુ તથાપિ ન રતિઃ ક્ષમા ॥ ૪।૮૭
યદા તુ જરયા પીતં રૂપમાસાં ભવિષ્યતિ ।
આત્મનોઽપ્યનભિપ્રેતં મોહાત્તત્ર રતિર્ભવેત્ ॥ ૪।૮૮
મૃત્યુવ્યાધિજરાધર્મો મૃત્યુવ્યાધિજરાત્મભિઃ ।
રમમાણોઽપ્યસંવિગ્નઃ સમાનો મૃગપક્ષિભિઃ ॥ ૪।૮૯
યદપ્યાત્થ મહાત્માનસ્તેઽપિ કામાત્મકા ઇતિ ।
સંવેગોઽત્ર ન કર્તવ્યો યદા તેષામપિ ક્ષયઃ ॥ ૪।૯૦
માહાત્મ્યં ન ચ તન્મન્યે યત્ર સામાન્યતઃ ક્ષયઃ ।
વિષયેષુ પ્રસક્તિર્વા યુક્તિર્વા નાત્મવત્તયા ॥ ૪।૯૧
યદપ્યાત્થાનૃતેનાપિ સ્ત્રીજને વર્ત્યતામિતિ ।
અનૃતં નાવગચ્છામિ દાક્ષિણ્યેનાપિ કિઞ્ચન ॥ ૪।૯૨

ન ચાનુવર્તનં તન્મે રુચિતં યત્ર નાર્જવમ્ ।
સર્વભાવેન સમ્પર્કો યદિ નાસ્તિ ધિગસ્તુ તત્ ॥ ૪।૯૩
અનૃતે શ્રદ્દધાનસ્ય સક્તસ્યાદોષદર્શિનઃ ।
કિં હિ વઞ્ચયિતવ્યં સ્યાજ્જાતરાગસ્ય ચેતસઃ ॥ ૪।૯૪
વઞ્ચયન્તિ ચ યદ્યેવ જાતરાગાઃ પરસ્પરમ્ ।
નનુ નૈવ ક્ષમં દ્રષ્ટું નરાઃ સ્ત્રીણાં નૃણામ્ સ્ત્રિયઃ ॥ ૪।૯૫
તદેવં સતિ દુઃખાર્ત્તં જરામરણભોગિનમ્ ।
ન માં કામેષ્વનાર્યેષુ પ્રતારયિતુમર્હસિ ॥ ૪।૯૬
અહોઽતિધીરં બલવચ્ચ તે મનશ્ચલેષુ કામેષુ ચ સારદર્શિનઃ ।
ભયેઽપિ તીવ્રે વિષયેષુ સજ્જસે નિરીક્ષમાણો મરણાધ્વનિ પ્રજાઃ ॥ ૪।૯૭
અહં પુનર્ભીરુરતીવવિક્લવો જરાવિપદ્વ્યાધિભયં વિચિન્તયન્ ।
લભે ન શાન્તિં ન ધૃતિં કુતો રતિં નિશામયન્ દીપ્તમિવાગ્નિના જગત્ ॥ ૪।૯૮
અસંશયં મૃત્યુરિતિ પ્રજાનતો નરસ્ય રાગો હૃદિ યસ્ય જાયતે ।
અયોમયીં તસ્ય પરૈમિ ચેતનાં મહાભયે રક્ષતિ યો ન રોદિતિ ॥ ૪।૯૯
અથૌ કુમારશ્ચ વિનિશ્ચયાત્મિકાં ચકાર કામાશ્રયઘાતિનીં કથામ્ ।
જનસ્ય ચક્ષુર્ગમનીયમણ્ડલો મહીધરં ચાસ્તમિયાય ભાસ્કરઃ ॥ ૪।૧૦૦
તતો વૃથાધારિતભૂષણસ્રજઃ કલાગુણૈશ્ચ પ્રણયૈશ્ચ નિષ્ફલૈઃ ।
સ્વ એવ ભાવે વિનિગૃહ્ય મન્મથં પુરં યયુર્ભગ્નમનોરથાઃ સ્ત્રિયઃ ॥ ૪।૧૦૧
તતઃ પુરોદ્યાનગતાં જનશ્રિયં નિરીક્ષ્ય સાયં પ્રતિસંહૃતાં પુનઃ ।
અનિત્યતાં સર્વગતાં વિચિન્તયન્ વિવેશ ધિષ્ણ્યં ક્ષિતિપાલકાત્મજઃ ॥ ૪।૧૦૨
તતઃ શ્રુત્વા રાજા વિષયવિમુખં તસ્ય તુ મનો
ન શિશ્યે તાં રાત્રિં હૃદયગતશલ્યો ગજ ઇવ ।
અથ શ્રાન્તો મન્ત્રે બહુવિવિધમાર્ગે સસચિવો
ન સોઽન્યત્કામેભ્યો નિયમનમપશ્યત્સુતમતેઃ ॥ ૪।૧૦૩
ઇતિ શ્રીબુદ્ધચરિતે મહાકાવ્યે સ્ત્રીવિઘાતનો નામ ચતુર્થઃ સર્ગઃ ॥ ૪ ॥

---

Book V [અભિનિષ્ક્રમણો]

સ તથા વિષયૈર્વિલોભ્યમાનઃ પરમોહૈરપિ શાક્યરાજસૂનુઃ ।
ન જગામ રતિં ન શર્મ લેભે હૃદયે સિંહ ઇવાતિદિગ્ધવિદ્ધઃ ॥ ૫।૧
અથ મન્ત્રિસુતૈઃ ક્ષમૈઃ કદાચિત્સખિભિશ્ચિત્રકથૈઃ કૃતાનુયાત્રઃ ।
વનભૂમિદિદૃક્ષયા શમેપ્સુર્નરદેવાનુમતો વહિઃ પ્રતસ્થે ॥ ૫।૨

નવરુક્મખલીનકિઙ્કિણીકં પ્રચલચ્છામરચારુહેમભાણ્ડમ્ ।
અભિરુહ્ય સ કણ્ઠકં સદશ્વં પ્રયયૌ કેતુમિવ દ્રુમાબ્જકેતુઃ ॥ ૫।૩
સ નિકૃષ્ટતરાં વનાન્તભૂમિં વનલોભાચ્ચ યયૌ મહીગુણેચ્છુઃ ।
સલિલોર્મિવિકારસીરમાર્ગાં વસુધાં ચૈવ દદર્શ કૃષ્યમાણામ્ ॥ ૫।૪
હલભિન્નવિકીર્ણશષ્પદર્ભાં હતસૂક્ષ્મક્રિમિકાણ્ડજન્તુકીર્ણામ્ ।
સમવેક્ષ્ય રસાં તથાવિધાં તાં સ્વજનસ્યેવ બધે ભૃશં શુશોચ ॥ ૫।૫
કૃષતઃ પુરુષાંશ્ચ વીક્ષમાણઃ પવનાર્કાંશુરજોવિભિન્નવર્ણાન્ ।
વહનક્લમવિક્લવાંશ્ચ ધુર્યાન્ પરમાર્યઃ પરમાં કૃપાં ચકાર ॥ ૫।૬
અવતીર્ય તતસ્તુરઙ્ગપૃષ્ઠાચ્ચ્નકૈર્ગાં વ્યચરત્ શુચા પરીતઃ ।
જગતો જનનવ્યયં વિચિન્વન્ કૃપણં ખલ્વિદમિત્યુવાચ ચાર્ત્તઃ ॥ ૫।૭
મનસા ચ વિવિક્તતામભીપ્સુઃ સુહૃદસ્તાનનુયાયિનો નિવાર્ય ।
અભિતારલચારુપર્ણવત્યા વિજને મૂલમુપેયિવાન્ સ જમ્બ્વાઃ ॥ ૫।૮
નિષસાદ ચ પત્રખોરવત્યાં ભુવિ વૈદૂર્યનિકાશશાદ્વલાયામ્ ।
જગતઃ પ્રભવવ્યયૌ વિચિન્ત્ય મનસશ્ચ સ્થિતિમાર્ગમાલલમ્બે ॥ ૫।૯
સમવાપ્તમનઃ સ્થિતિશ્ચ સદ્યો વિષયેચ્છાદિભિરાધિભિશ્ચ મુક્તઃ ।
સવિતર્કવિચારમાપ શાન્તં પ્રથમં ધ્યાનમનાશ્રવપ્રકારમ્ ॥ ૫।૧૦
અધિગમ્ય તતો વિવેકજં તુ પરમપ્રીતિસુખં [મનઃ] સમાધિમ્ ।
ઇદમેવ તતઃ પરં પ્રદધ્યૌ મનસા લોકગતિં નિશમ્ય સમ્યક્ ॥ ૫।૧૧
કૃપણં વત યજ્જનઃ સ્વયં સન્નરસો વ્યાધિજરાવિનાશધર્મઃ ।
જરયાર્દિતમાતુરં મૃતં વા પરમજ્ઞો વિજુગુપ્સતે મદાન્ધઃ ॥ ૫।૧૨
ઇહ ચેદહમીદૃશઃ સ્વયં સન્ વિજુગુપ્સેય પરં તથાસ્વભાવમ્ ।
ન ભવેત્સદૃશં હિ તત્ક્ષમં વા પરમં ધર્મમિમં વિજાનતો મે ॥ ૫।૧૩
ઇતિ તસ્ય વિપશ્યતો યથાવજ્જગતો વ્યાધિજરાવિપત્તિદોષાન્ ।
બલયૌવનજીવિતપ્રવૃત્તૌ વિજગામાત્મગતો મદઃ ક્ષણેન ॥ ૫।૧૪
ન જહર્ષ ન ચાપિ ચાનુતેપે વિચિકિત્સાં ન યયૌ ન તન્દ્રિનિદ્રે ।
ન ચ કામગુણેષુ સંરરઞ્જે ન ચ દિદ્વેષ પરં ન ચાવમેને ॥ ૫।૧૫
ઇતિ બુદ્ધિરિયં ચ નીરજસ્કા વવૃધે તસ્ય મહાત્મનો વિશુદ્ધા ।
પુરુષૈરપરૈરદૃશ્યમાનઃ પુરુષશ્ચોપસસર્પ ભિક્ષુવેશઃ ॥ ૫।૧૬
નરદેવસુતસ્તમભ્યપૃચ્છદ્વદ કોઽસીતિ શશંસ સોઽથ તસ્મૈ ।
સ ચ પુઙ્ગવ જન્મમૃત્યુભીતઃ શ્રમણઃ પ્રવ્રજિતોઽસ્મિ મોક્ષહેતોઃ ॥ ૫।૧૭
જગતિ ક્ષયધર્મકે મુમુક્ષુર્મૃગયેઽહં શિવમક્ષયં પદં તત્ ।
અજનોઽન્યજનૈરતુલ્યબુદ્ધિર્વિષયેભ્યો વિનિવૃત્તરાગદોષઃ ॥ ૫।૧૮

નિવસન્ ક્વચિદેવ વૃક્ષમૂલે વિજને વાયતને ગિરૌ વને વા ।
વિચરામ્યપરિગ્રહો નિરાશઃ પરમાર્થાય યથોપપન્નભિક્ષુઃ ॥ ૫।૧૯
ઇતિ પશ્યત એવ રાજસૂનોરિદમુક્ત્વા સ નભઃ સમુત્પપાત ।
સ હિ તદ્વપુરન્યબુદ્ધિદર્શી સ્મૃતયે તસ્ય સમેયિવાન્ દિવૌકાઃ ॥ ૫।૨૦
ગગનં ખગવદ્ગતે ચ તસ્મિન્ નૃવરઃ સઞ્જહૃષે વિસિસ્મિયે ચ ।
ઉપલભ્ય તતશ્ચ ધર્મસઞ્જ્ઞામભિનિર્યાણવિધૌ મતિં ચકાર ॥ ૫।૨૧
તત ઇન્દ્રસમો જિતેન્દ્રિયશ્ચ પ્રવિવિક્ષુઃ પરમાશ્વમારુરોહ ।
પરિવર્ત્ય જનં ત્વવેક્ષમાણસ્તત એવાભિમતં વનં ન ભેજે ॥ ૫।૨૨
સ જરામરણક્ષયં ચિકીર્ષુર્વનવાસાય મતિં સ્મૃતૌ નિધાય ।
પ્રવિવેશ પુનઃ પુરં ન કામાદ્વનભૂમેરિવ મણ્ડલં દ્વિપેન્દ્રઃ ॥ ૫।૨૩
સુખિતા વત નિર્વૃતા ચ સા સ્ત્રી પતિરીદૃક્ત્વમિવાયતાક્ષ યસ્યાઃ ।
ઇતિ તં સમુદીક્ષ્ય રાજકન્યા પ્રવિશન્તં પથિ સાઞ્જલિર્જગાદ ॥ ૫।૨૪
અથ ઘોષમિમં મહાભ્રઘોષઃ પરિશુશ્રાવ શમં પરં ચ લેભે ।
શ્રુતવાંશ્ચ હિ નિર્વૃતેતિ શબ્દં પરિનિર્વાણવિધૌ મતિં ચકાર ॥ ૫।૨૫
અથ કાઞ્ચનશૈલશ‍ૃઙ્ગવર્ષ્મા ગજમેઘર્ષભબાહુનિસ્વનાક્ષઃ ।
ક્ષયમક્ષયધર્મજાતરાગઃ શશિસિંહાનનવિક્રમઃ પ્રપેદે ॥ ૫।૨૬
મૃગરાજગતિસ્તતોઽભ્યગચ્છન્નૃપતિં મન્ત્રિગણૈરુપાસ્યમાનમ્ ।
સમિતૌ મરુતામિવ જ્વલન્તં મઘવન્તં ત્રિદિવે સનત્કુમારઃ ॥ ૫।૨૭
પ્રણિપત્ય ચ સાઞ્જલિર્બભાષે દિશ મહ્યં નરદેવ સાધ્વનુજ્ઞામ્ ।
પરિવિવ્રજિષામિ મોક્ષહેતોર્નિયતો હ્યસ્ય જનસ્ય વિપ્રયોગઃ ॥ ૫।૨૮
ઇતિ તસ્ય વચો નિશમ્ય રાજા કરિણેવાભિહતો દ્રુમશ્ચચાલ ।
કમલપ્રતિમેઽઞ્જલૌ ગૃહીત્વા વચનં ચેદમુવાચ વાષ્પકણ્ઠઃ ॥ ૫।૨૯
પ્રતિસંહર તાત બુદ્ધિમેતાં ન હિ કાલસ્તવ ધર્મસંશ્રયસ્ય ।
વયસિ પ્રથમે મતૌ ચલાયાં બહુદોષાં હિ વદન્તિ ધર્મચર્યામ્ ॥ ૫।૩૦
વિષયેષુ કુતૂહલેન્દ્રિયસ્ય વ્રતખેદેષ્વસમર્થનિશ્ચયસ્ય ।
તરુણસ્ય મનશ્ચલત્યરણ્યાદનભિજ્ઞસ્ય વિશેષતોઽવિવેકમ્ ॥ ૫।૩૧
મમ તુ પ્રિયધર્મ ધર્મકાલસ્ત્વયિ લક્ષ્મીમવસૃજ્ય લક્ષ્યભૂતે ।
સ્થિરવિક્રમ વિક્રમેણ ધર્મસ્તવ હિત્વા તુ ગુરું ભવેદધર્મઃ ॥ ૫।૩૨
તદિમં વ્યવસાયમુત્સૃજ ત્વં ભવ તાવન્નિરતો ગૃહસ્થધર્મે ।
પુરુષસ્ય વયઃસુખાનિ ભુક્ત્વા રમણીયો હિ તપોવનપ્રવેશઃ ॥ ૫।૩૩
ઇતિ વાક્યમિદં નિશમ્ય રાજ્ઞઃ કલવિઙ્કસ્વર ઉત્તરં બભાષે ।
યદિ મે પ્રતિભૂશ્ચતુર્ષુ રાજન્ ભવસિ ત્વં ન તપોવનં શ્રયિષ્યે ॥ ૫।૩૪

ન ભવેન્મરણાય જીવિતં મે વિહરેત્સ્વાસ્થ્યમિદં ચ મે ન રોગઃ ।
ન ચ યૌવનમાક્ષિપેજ્જરા મે ન ચ સમ્પત્તિમપાહરેદ્વિપત્તિઃ ॥ ૫।૩૫
ઇતિ દુર્લભમર્થમૂચિવાંસં તનયં વાક્યમુવાચ શાક્યરાજઃ ।
ત્યજ બુદ્ધિમતિમાં ગતિપ્રવૃત્તામવહાસ્યોઽતિમનોરથક્રમશ્ચ ॥ ૫।૩૬
અથ મેરુગુરુર્ગુરું બભાષે યદિ નાસ્તિ ક્રમ એષ નાસ્તિ વાર્યઃ ।
શરણાજ્જ્વલનેન દહ્યમાનાન્ન હિ નિશ્ચિક્રમિષું ક્ષમં ગ્રહીતુમ્ ॥ ૫।૩૭
જગતશ્ચ યથા ધ્રુવો વિયોગો ન તુ ધર્માય વરં ત્વયં વિયોગઃ ।
અવશં નનુ વિપ્રયોજયેન્મામકૃતસ્વાર્થમતૃપ્તમેવ મૃત્યુઃ ॥ ૫।૩૮
ઇતિ ભૂમિપતિર્નિશમ્ય તસ્ય વ્યવસાયં તનયસ્ય નિર્મુમુક્ષોઃ ।
અભિધાય ન યાસ્યતીતિ ભૂયો વિદધે રક્ષણમુત્તમાંશ્ચ કામાન્ ॥ ૫।૩૯
સચિવૈસ્તુ નિદર્શિતો યથાવદ્બહુમાનાત્ પ્રણયાચ્ચ શાસ્ત્રપૂર્વમ્ ।
ગુરુણા ચ નિવારિતોઽશ્રુપાતૈઃ પ્રવિવેશાવસથં તતઃ સ શોચન્ ॥ ૫।૪૦
ચલકુણ્ડલચુમ્બિતાનનાભિર્ઘનનિશ્વાસવિકમ્પિતસ્તનીભિઃ ।
વનિતાભિરધીરલોચનાભિર્મૃગશાવાભિરિવાભ્યુદીક્ષ્યમાણઃ ॥ ૫।૪૧
સ હિ કાઞ્ચનપર્વતાવદાતો હૃદયોન્માદકરો વરાઙ્ગનાનામ્ ।
શ્રવનાઙ્ગવિલોચનાત્મભાવાન્ વચનસ્પર્શવપુર્ગુણૈર્જહાર ॥ ૫।૪૨
વિગતે દિવસે તતો વિમાનં વપુષા સૂર્ય ઇવ પ્રદીપ્યમાનઃ ।
તિમિરં વિજિઘાંસુરાત્મભાસા રવિરુદ્યન્નિવ મેરુમારુરોહ ॥ ૫।૪૩
કનકોજ્જ્વલદીપ્તદીપવૃક્ષં વરકાલાગુરુધૂપપૂર્ણગર્ભમ્ ।
અધિરુહ્ય સ વજ્રભક્તિચિત્રં પ્રવરં કાઞ્ચનમાસનં સિષેવે ॥ ૫।૪૪
તત ઉત્તમમુત્તમાશ્ચ નાર્યો નિશિ તૂર્યૈરુપતસ્થુરિન્દ્રકલ્પમ્ ।
હિમવચ્છિરસીવ ચન્દ્રગૌરે દ્રવિણેન્દ્રાત્મજમપ્સરોગણૌઘાઃ ॥ ૫।૪૫
પરમૈરપિ દિવ્યતૂર્યકલ્પૈઃ સ તુ તૈર્નૈવ રતિં યયૌ ન હર્ષમ્ ।
પરમાર્થસુખાય તસ્ય સાધોરભિનિશ્ચિક્રમિષા યતો ન રેમે ॥ ૫।૪૬
અથ તત્ર સુરૈસ્તપોવરિષ્ઠૈરકનિષ્ઠૈર્વ્યવસાયમસ્ય બુદ્ધ્વા ।
યુગપત્પ્રમદાજનસ્ય નિદ્રા વિહિતાસીદ્વિકૃતાશ્ચ ગાત્રચેષ્ટાઃ ॥ ૫।૪૭
અભવચ્છયિતા હિ તત્ર કાચિદ્વિનિવેશ્ય પ્રચલે કરે કપોલમ્ ।
દયિતામપિ રુક્મપત્રચિત્રાં કુપિતેવાઙ્કગતાં વિહાય વીણામ્ ॥ ૫।૪૮
વિબભૌ કરલગ્નવેણુરન્યા સ્તનવિસ્રસ્તસિતાંશુકા શયાના ।
ઋજુષટ્પદપઙ્ક્તિજુષ્ટપદ્મા જલફેનપ્રહસત્તટા નદીવ ॥ ૫।૪૯
નવપુષ્કરગર્ભકોમલાભ્યાં તપનીયોજ્જ્વલસઙ્ગતાઙ્ગદાભ્યામ્ ।
સ્વપિતિ સ્મ તથા પુરા ભુજાભ્યાં પરિરભ્ય પ્રિયવન્મૃદઙ્ગમેવ ॥ ૫।૫૦

નવહાટકભૂષણાસ્તથાન્યા વસનં પીતમનુત્તમં વસાનાઃ ।
અવશા વત નિદ્રયા નિપેતુર્ગજભગ્ના ઇવ કર્ણિકારશાખાઃ ॥ ૫।૫૧
અવલમ્બ્ય ગવાક્ષપાર્શ્વમન્યા શયિતા ચાપવિભુગ્નગાત્રયષ્ટિઃ ।
વિરરાજ વિલમ્બિચારુહારા રચિતા તોરણશાલભઞ્જિકેવ ॥ ૫।૫૨
મણિકુણ્ડલદષ્ટપત્રલેખં મુખપદ્મં વિનતં તથાપરસ્યાઃ ।
શતપત્રમિવાર્ધચક્રનાડં સ્થિતકારણ્ડવઘટ્ટિતં ચકાશે ॥ ૫।૫૩
અપરાઃ શયિતા યથોપવિષ્ટાઃ સ્તનભારૈરવમન્યમાનગાત્રાઃ ।
ઉપગુહ્ય પરસ્પરં વિરેજુર્ભુજપાશૈસ્તપનીયપારિહાર્યૈઃ ॥ ૫।૫૪
મહતીં પરિવાદિનીં ચ કાચિદ્વનિતાલિઙ્ગ્ય સખીમિવ પ્રસુપ્તા ।
વિજુઘૂર્ણ ચલત્સુવર્ણસૂત્રાં વદનેનાકુલકર્ણિકોજ્જ્વલેન ॥ ૫।૫૫
પણવં યુવતિર્ભુજાંસદેશાદવવિસ્રંસિતચારુપાશમન્યા ।
સવિલાસરતાન્તતાન્તમૂર્વોર્વિવરે કાન્તમિવાભિનીય શિશ્યે ॥ ૫।૫૬
અપરા ન બભુર્નિમીલિતાક્ષ્યો વિપુલાક્ષ્યોઽપિ શુભભ્રુવોઽપિ સત્યઃ ।
પ્રતિસઙ્કુચિતારવિન્દકોશાઃ સવિતર્યસ્તમિતે યથા નલિન્યઃ ॥ ૫।૫૭
શિથિલાકુલમૂર્ધજા તથાન્યા જઘનસ્રસ્તવિભૂષણાંશુકાન્તા ।
અશયિષ્ટ વિકીર્ણકણ્ઠસૂત્રા ગજભગ્ના પ્રતિપાતિતાઙ્ગનેવ ॥ ૫।૫૮
અપરાસ્ત્વવશા હ્રિયા વિયુક્તા ધૃતિમત્યોઽપિ વપુર્ગુણૈરુપેતાઃ ।
વિનિશશ્વસુરુલ્વણં શયાના વિકૃતાક્ષિપ્તભુજા જજૃમ્ભિરે ચ ॥ ૫।૫૯
વ્યપવિદ્ધવિભૂષણસ્રજોઽન્યા વિસૃતાગ્રન્થનવાસસો વિસઞ્જ્ઞાઃ ।
અનિમીલિતશુક્લનિશ્ચલાક્ષ્યો ન વિરેજુઃ શયિતા ગતાસુકલ્પાઃ ॥ ૫।૬૦
વિવૃતાસ્યપુટા વિવૃદ્ધગાત્રા પ્રપતદ્વક્ત્રજલા પ્રકાશગુહ્યા ।
અપરા મદઘૂર્ણિતેવ શિશ્યે ન બભાષે વિકૃતં વપુઃ પુપોષ ॥ ૫।૬૧
ઇતિ સત્ત્વકુલાનુરૂપરૂપં વિવિધં સ પ્રમદાજનઃ શયાનઃ ।
સરસઃ સદૃશં બભાર રૂપં પવનાવર્જિતરુગ્ણપુષ્કરસ્ય ॥ ૫।૬૨
સમવેક્ષ્ય તતશ્ચ તાઃ શયાના વિકૃતાસ્તા યુવતીરધીરચેષ્ટાઃ ।
ગુણવદ્વપુષોઽપિ વલ્ગુભાસો નૃપસૂનુઃ સ વિગર્હયાં બભૂવ ॥ ૫।૬૩
અશુચિર્વિકૃતશ્ચ જીવલોકે વનિતાનામયમીદૃશઃ સ્વભાવઃ ।
વસનાભરણૈસ્તુ વઞ્ચ્યમાનઃ પુરુષઃ સ્ત્રીવિષયેષુ રાગમેતિ ॥ ૫।૬૪
વિમૃશેદ્યદિ યોષિતાં મનુષ્યઃ પ્રકૃતિં સ્વપ્નવિકારમીદૃશં ચ ।
ધ્રુવમત્ર ન વર્ધયેત્પ્રમાદં ગુણસઙ્કલ્પહતસ્તુ રાગમેતિ ॥ ૫।૬૫
ઇતિ તસ્ય તદન્તરં વિદિત્વા નિશિ નિશ્ચિક્રમિષા સમુદ્બભૂવ ।
અવગમ્ય મનસ્તતોઽસ્ય દેવૈર્ભવનદ્વારમપાવૃતં બભૂવ ॥ ૫।૬૬

અથ સોઽવતતાર હર્મ્યપૃષ્ઠાદ્યુવતીસ્તાઃ શયિતા વિગર્હમાણઃ ।
અવતીર્ય તતશ્ચ નિર્વિશઙ્કો ગૃહકક્ષ્યાં પ્રથમં વિનિર્જગામ ॥ ૫।૬૭
તુરગાવચરં સ બોધયિત્વા જવિનં ચન્દકમિત્થમિત્યુવાચ ।
હયમાનય કન્થકં ત્વરાવાન્ અમૃતં પ્રાપ્તુમિતોઽદ્ય મે યિયાસા ॥ ૫।૬૮
હૃદિ યા મમ તુષ્ટિરદ્ય જાતા વ્યવસાયશ્ચ યથા ધૃતૌ નિવિષ્ટઃ ।
વિજનેઽપિ ચ નાથવાનિવાસ્મિ ધ્રુવમર્થોઽભિમુખઃ સ મે ય ઇષ્ટઃ ॥ ૫।૬૯
હ્રિયમેવ ચ સન્નતિં ચ હિત્વા શયિતા મત્પ્રમુખે યથા યુવત્યઃ ।
વિવૃતે ચ યથા સ્વયં કપાટે નિયતં યાતુમનામયાય કાલઃ ॥ ૫।૭૦
પ્રતિગૃહ્ય તતઃ સ ભર્તુરાજ્ઞાં વિદિતાર્થોઽપિ નરેન્દ્રશાસનસ્ય ।
મનસીવ પરેણ ચોદ્યમાનસ્તુરગસ્યાનયને મતિં ચકાર ॥ ૫।૭૧
અથ હેમખલીનપૂર્ણવક્ત્રં લઘુશય્યાસ્તરણોપગૂઢપૃષ્ઠમ્ ।
બલસત્ત્વજવત્વરોપપન્નં સ વરાશ્વં તમુપાનિનાય ભર્ત્રે ॥ ૫।૭૨
પ્રતતત્રિકપુચ્છમૂલપાર્ષ્ણિં નિભૃતં હ્રસ્વતનૂજપૃષ્ઠકર્ણમ્ ।
વિનતોન્નતપૃષ્ઠકુક્ષિપાર્શ્વં વિપુલપ્રોથલલાટકઠ્યુરસ્કમ્ ॥ ૫।૭૩
ઉપગુહ્ય સ તં વિશાલવક્ષાઃ કમલાભેન ચ સાન્ત્વયન્ કરેણ ।
મધુરાક્ષરયા ગિરા શશાસ ધ્વજિનીમધ્યમિવ પ્રવેષ્ટુકામઃ ॥ ૫।૭૪
બહુશઃ કલિશત્રવો નિરસ્તાઃ સમરે ત્વામધિરુહ્ય પાર્થિવેન ।
અહમપ્યમૃતં પરં યથાવત્તુરગશ્રેષ્ઠ લભેય તત્કુરુષ્વ ॥ ૫।૭૫
સુલભાઃ ખલુ સંયુગે સહાયા વિષયાવાપ્તસુખે ધનાર્જને વા ।
પુરુષસ્ય તુ દુર્લભાઃ સહાયાઃ પતિતસ્યાપદિ ધર્મસંશ્રયે વા ॥ ૫।૭૬
ઇહ ચૈવ ભવન્તિ યે સહાયાઃ કલુષે ધર્મણિ ધર્મસંશ્રયે વા ।
અવગચ્છતિ મે યથાન્તરાત્મા નિયતં તેઽપિ જનાસ્તદંશભાજઃ ॥ ૫।૭૭
તદિદં પરિગમ્ય ધર્મયુક્તં મમ નિર્યાણમતો જગદ્ધિતાય ।
તુરગોત્તમ વેગવિક્રમાભ્યાં પ્રયતસ્વાત્મહિતે જગદ્ધિતે ચ ॥ ૫।૭૮
ઇતિ સુહૃદમિવાનુશિષ્ય કૃત્યે તુરગવરં નૃવરો વનં યિયાસુઃ ।
સિતમસિતગતિદ્યુતિર્વપુષ્માન્ રવિરિવ શારદમભ્રમારુરોહ ॥ ૫।૭૯
અથ સ પરિહરન્નિશીથચણ્ડં પરિજનબોધકરં ધ્વનિં સદશ્વઃ ।
વિગતહનુરવઃ પ્રશાન્તહેષશ્ચકિતવિમુક્તપદક્રમા જગામ ॥ ૫।૮૦
કનકવલયભૂષિતપ્રકોષ્ઠૈઃ કમલનિભૈઃ કમલાનિ ચ પ્રવિધ્ય ।
અવનતતનવસ્તતોઽસ્ય યક્ષાશ્ચકિતગતેર્દધિરે ખુરાન્ કરાગ્રૈઃ ॥ ૫।૮૧
ગુરુપરિઘકપાટસંવૃતા યા ન સુખમપિ દ્વિરદૈરપાવ્રિયન્તે ।
વ્રજતિ નૃપસુતે ગતસ્વનાસ્તાઃ સ્વયમભવન્ વિવૃતાઃ પુરઃ પ્રતોલ્યઃ ॥ ૫।૮૨

પિતરમભિમુખં સુતં ચ બાલં જનમનુરક્તમનુત્તમાં ચ લક્ષ્મીમ્ ।
કૃતમતિરપહાય નિર્વ્યપેક્ષઃ પિતૃનગરાત્ સ તતો વિનિર્જગામ ॥ ૫।૮૩
અથ સ વિકચપઙ્કજાયતાક્ષઃ પુરમવલોક્ય નનાદ સિંહનાદમ્ ।
જનનમરણયોરદૃષ્ટપારો ન પુનરહં કપિલાહ્વયં પ્રવિષ્ટા ॥ ૫।૮૪
ઇતિ વચનમિદં નિશમ્ય તસ્ય દ્રવિણપતેઃ પરિષદ્ગણા નનન્દુઃ ॥ ૫।૮૫
પ્રમુદિતમનસશ્ચ દેવસઙ્ઘા વ્યવસિતપારણમાશશંસિરેઽસ્મૈ ॥

હુતવહવપુષો દિવૌકસોઽન્યે વ્યવસિતમસ્ય દુષ્કરં વિદિત્વા ।
અકુરુત તુહિને પથિ પ્રકાશં ઘનવિવરપ્રષૃતા ઇવેન્દુપાદાઃ ॥ ૫।૮૬
હરિતુરગતુરઙ્ગવત્તુરઙ્ગઃ સ તુ વિચરન્ મનસીવ ચોદ્યમાનઃ ।
અરુણપરુષભારમન્તરીક્ષં સરસબહૂનિ જગામ યોજનાનિ ॥ ૫।૮૭
ઇતિ શ્રીબુદ્ધચરિતે મહાકાવ્યેઽભિનિષ્ક્રમણો નામ પઞ્ચમઃ સર્ગઃ ॥ ૫ ॥

## Book VI [ચન્દકનિવર્તનં]

તતો મુહૂર્તેઽભ્યુદિતે જગચ્ચક્ષુષિ ભાસ્કરે ।
ભાર્ગવસ્યાશ્રમપદં સ દદર્શ નૃણાં વરઃ ॥ ૬।૧
સુપ્તવિશ્વસ્તહરિણં સ્વસ્થસ્થિતવિહઙ્ગમમ્ ।
વિશ્રાન્ત ઇવ યદ્દૃષ્ટ્વા કૃતાર્થ ઇવ ચાભવત્ ॥ ૬।૨
સ વિસ્મયનિવૃત્ત્યર્થં તપઃપૂજાર્થમેવ ચ ।
સ્વાં ચાનુવર્તિતાં રક્ષન્નશ્વપૃષ્ઠાદવાતરત્ ॥ ૬।૩
અવતીર્ય ચ પસ્પર્શ નિસ્તીર્ણમિતિ વાજિનમ્ ।
છન્દકં ચાબ્રવીત્ પ્રીતઃ સ્નાપયન્નિવ ચક્ષુષા ॥ ૬।૪
ઇમં તાર્ક્ષ્યોપમજવં તુરઙ્ગમનુગચ્છતા ।
દર્શિતા સૌમ્ય મદ્ભક્તિર્વિક્રમશ્ચાયમાત્મનઃ ॥ ૬।૫
સર્વથાસ્મ્યન્યકાર્યોઽપિ ગૃહીતો ભવતા હૃદિ ।
ભર્તૃસ્નેહશ્ચ યસ્યાયમીદૃશઃ શક્ત એવ ચ ॥ ૬।૬
અસ્નિગ્ધોઽપિ સમર્થોઽસ્તિ નિઃસામર્થ્યોઽપિ ભક્તિમાન્ ।
ભક્તિમાંશ્ચૈવ શક્તશ્ચ દુર્લભસ્ત્વદ્વિધો ભુવિ ॥ ૬।૭
તત્પ્રીતોઽસ્મિ તવાનેન મહાભાગેન કર્મણા ।
દૃશ્યતે મયિ ભાવોઽયં ફલેભ્યોઽપિ પરાઙ્મુખે ॥ ૬।૮
કો જનસ્ય ફલસ્થસ્ય ન સ્યાદભિમુખો જનઃ ।
જનીભવતિ ભૂયિષ્ઠં સ્વજનોઽપિ વિપર્યયે ॥ ૬।૯

કુલાર્થં ધાર્યતે પુત્રઃ પોષાર્થં સેવ્યતે પિતા ।
આશયાશ્લિષ્યતિ જગન્નાસ્તિ નિષ્કારણાસ્વતા ॥ ૬।૧૦
કિમુક્ત્વા બહુ સઙ્ક્ષેપાત્કૃતં મે સુમહત્પ્રિયમ્ ।
નિવર્તસ્વાશ્વમાદાય સમ્પ્રાપ્તોઽસ્મીપ્સિતં વનમ્ ॥ ૬।૧૧
ઇત્યુક્ત્વા સ મહાબાહુરનુશંસચિકીર્ષયા ।
ભૂષણાન્યવમુચ્યાસ્મૈ સન્તપ્તમનસે દદૌ ॥ ૬।૧૨
મુકુટોદ્દીપ્તકર્માણં મણિમાદાય ભાસ્વરમ્ ।
બ્રુવન્ વાક્યમિદં તસ્થૌ સાદિત્ય ઇવ મન્દરઃ ॥ ૬।૧૩
અનેન મણિના છન્દ પ્રણમ્ય બહુશો નૃપઃ ।
વિજ્ઞાપ્યોઽમુક્તવિશ્રમ્ભં સન્તાપવિનિવૃત્તયે ॥ ૬।૧૪
જરામરણનાશાર્થં પ્રવિષ્ટોઽસ્મિ તપોવનમ્ ।
ન ખલુ સ્વર્ગતર્ષેણ નાસ્નેહેન ન મન્યુના ॥ ૬।૧૫
તદેવમભિનિષ્ક્રાન્તં ન માં શોચિતુમર્હસિ ।
ભૂત્વાપિ હિ ચિરં શ્લેષઃ કાલેન ન ભવિષ્યતિ ॥ ૬।૧૬
ધ્રુવો યસ્માચ્ચ વિશ્લેષસ્તસ્માન્મોક્ષાય મે મતિઃ ।
વિપ્રયોગઃ કથં ન સ્યાદ્ભૂયોઽપિ સ્વજનાદિભિઃ ॥ ૬।૧૭
શોકત્યાગાય નિષ્ક્રાન્તં ન માં શોચિતુમર્હસિ ।
શોકહેતુષુ કામેષુ સક્તાઃ શોચ્યાસ્તુ રાગિણઃ ॥ ૬।૧૮
અયં ચ કિલ પૂર્વેષામસ્માકં નિશ્ચયઃ સ્થિરઃ ।
ઇતિ દાયાદભૂતેન ન શોચ્યોઽસ્મિ પથા વ્રજન્ ॥ ૬।૧૯
ભવન્તિ હ્યર્થદાયાદાઃ પુરુષસ્ય વિપર્યયે ।
પૃથિવ્યાં ધર્મદાયાદા દુર્લભાસ્તુ ન સન્તિ વા ॥ ૬।૨૦
યદપિ સ્યાદસમયે યાતો વનમસાવિતિ ।
અકાલો નાસ્તિ ધર્મસ્ય જીવિતે ચઞ્ચલે સતિ ॥ ૬।૨૧
તસ્માદદ્યૈવ મે શ્રેયશ્ચેતવ્યમિતિ નિશ્ચયઃ ।
જીવિતે કો હિ વિશ્રમ્ભો મૃત્યૌ પ્રત્યર્થિનિ સ્થિતે ॥ ૬।૨૨
એવમાદિ ત્વયા સૌમ્ય વિજ્ઞાપ્યો વસુધાધિપઃ ।
પ્રયતેથાસ્તથા ચૈવ યથા માં ન સ્મરેદપિ ॥ ૬।૨૩
અપિ નૈર્ગુણ્યમસ્માકં વાચ્યં નરપતૌ ત્વયા ।
નૈર્ગુણ્યાત્ત્યજ્યતે સ્નેહઃ સ્નેહત્યાગાન્ન શોચ્યતે ॥ ૬।૨૪
ઇતિ વાક્યમિદં શ્રુત્વા છન્દઃ સન્તાપવિક્લવઃ ।
વાષ્પગ્રથિતયા વાચા પ્રત્યુવાચ કૃતાઞ્જલિઃ ॥ ૬।૨૫

અનેન તવ ભાવેન બાન્ધવાયાસદાયિના ।
ભર્તઃ સીદતિ મે ચેતો નદીપઙ્કે ઇવ દ્વિપઃ ॥ ૬।૨૬
કસ્ય નોત્પાદયેદ્બાષ્પં નિશ્ચયસ્તેઽયમીદૃશઃ ।
અયોમયેઽપિ હૃદયે કિં પુનઃ સ્નેહવિક્લવે ॥ ૬।૨૭
વિમાનશયનાર્હં હિ સૌકુમાર્યમિદં ક્વ ચ ।
ખરદર્ભાઙ્કુરવતી તપોવનમહી ક્વ ચ ॥ ૬।૨૮
શ્રુત્વા તુ વ્યવસાયં તે યદશ્વોઽયં મયા હૃતઃ ।
બલાત્કારેણ તન્નાથ દૈવેનૈવાસ્મિ કારિતઃ ॥ ૬।૨૯
કથં હ્યાત્મવશો જાનન્ વ્યવસાયમિમં તવ ।
ઉપાનયેયં તુરગં શોકં કપિલવસ્તુનઃ ॥ ૬।૩૦
તન્નાર્હસિ મહાબાહો વિહાતું પુત્રલાલસમ્ ।
સ્નિગ્ધં વૃદ્ધં ચ રાજાનં સદ્ધર્મમિવ નાસ્તિકઃ ॥ ૬।૩૧
સંવર્ધનપરિશ્રાન્તાં દ્વિતીયાં તાં ચ માતરમ્ ।
દેવ નાર્હસિ વિસ્મર્તું કૃતઘ્ન ઇવ સત્ક્રિયામ્ ॥ ૬।૩૨
બાલપુત્રાં ગુણવતીં કુલશ્લાઘ્યાં પતિવ્રતામ્ ।
દેવીમર્હસિ ન ત્યક્તું ક્લીવઃ પ્રાપ્તામિવ શ્રિયમ્ ॥ ૬।૩૩
પુત્રં યાશોધરં શ્લાઘ્યં યશોધર્મભૃતાં વરઃ ।
બાલમર્હસિ ન ત્યક્તું વ્યસનીવોત્તમં યશઃ ॥ ૬।૩૪
અથ બન્ધું ચ રાજ્યં ચ ત્યક્તુમેવ કૃતા મતિઃ ।
માં નાર્હસિ વિભો ત્યક્તું ત્વત્પાદૌ હિ ગતિર્મમ ॥ ૬।૩૫
નાસ્મિ યાતું પુરં શક્તો દહ્યમાનેન ચેતસા ।
ત્વામરણ્યે પરિત્યજ્ય સુમિત્ર ઇવ રાઘવમ્ ॥ ૬।૩૬
કિં હિ વક્ષ્યતિ રાજા માં ત્વદૃતે નગરં ગતમ્ ।
વક્ષ્યામ્યુચિતદર્શિત્વાત્કિં તવાન્તઃપુરાણિ વા ॥ ૬।૩૭
યદપ્યાત્થાપિ નૈર્ગુણ્યં વાચ્યં નરપતાવિતિ ।
કિં તદ્વક્ષ્યામ્યભૂતં તે નિર્દોષસ્ય મુનેરિવ ॥ ૬।૩૮
હૃદયેન સલજ્જેન જિહ્વયા સજ્જમાનયા ।
અહં યદ્યપિ વા બ્રૂયાં કસ્તચ્છ્રદ્ધાતુમર્હતિ ॥ ૬।૩૯
યો હિ ચન્દ્રમસસ્તૈક્ષ્ણ્ય કથયેચ્છ્રદ્દધીત વા ।
સ દોષાંસ્તવ દોષજ્ઞ કથયેચ્છ્રદ્દધીત વા ॥ ૬।૪૦
સાનુક્રોશસ્ય સતતં નિત્યં કરુણવેદિનઃ ।
સ્નિગ્ધત્યાગો ન સદૃશો નિવર્તસ્વ પ્રસીદ મે ॥ ૬।૪૧

ઇતિ શોકાભિભૂતસ્ય શ્રુત્વા છન્દસ્ય ભાષિતમ્ ।
સ્વસ્થઃ પરમયા ધૃત્યા જગાદ વદતાં વરઃ ॥ ૬।૪૨
મદ્વિયોગં પ્રતિ ચ્છન્દ સન્તાપસ્ત્યજ્યતામયમ્ ।
નાનાભાવો હિ નિયતં પૃથગ્જાતિષુ દેહિષુ ॥ ૬।૪૩
સ્વજનં યદ્યપિ સ્નેહાન્ન ત્યજેયં મુમુક્ષયા ।
મૃત્યુરન્યોન્યમવશાનસ્માન્ સન્ત્યાજયિષ્યતિ ॥ ૬।૪૪
મહત્યા તૃષ્ણયા દુઃખૈર્ગર્ભેણાસ્મિ યયા ધૃતઃ ।
તસ્યા નિષ્ફલયત્નાયાઃ ક્વાહં માતુઃ ક્વ સા મમ ॥ ૬।૪૫
વાસવૃક્ષે સમાગમ્ય વિગચ્છન્તિ યથાણ્ડજાઃ ।
નિયતં વિપ્રયોગાન્તસ્તથા ભૂતસમાગમઃ ॥ ૬।૪૬
સમેત્ય ચ યથા ભૂયો વ્યપયાન્તિ વલાહકાઃ ।
સંયોગો વિપ્રયોગશ્ચ તથા મે પ્રાણિનાં મતઃ ॥ ૬।૪૭
યસ્માદ્યાતિ ચ લોકોઽયં વિપ્રલભ્ય પરસ્પરમ્ ।
મમત્વં ન ક્ષમં તસ્માત્સ્વપ્નભૂતે સમાગમે ॥ ૬।૪૮
સહજેન વિયુજ્યન્તે પર્ણરાગેણ પાદપાઃ ।
અન્યેનાન્યસ્ય વિશ્લેષઃ કિં પુનર્ન ભવિષ્યતિ ॥ ૬।૪૯
તદેવં સતિ સન્તાપં મા કાર્ષીઃ સૌમ્ય ગમ્યતામ્ ।
લમ્બતે યદિ તુ સ્નેહો ગત્વાપિ પુનરાવ્રજ ॥ ૬।૫૦
બ્રૂયાશ્ચાસ્માસ્વનાક્ષેપં જનં કપિલવસ્તુનિ ।
ત્યજ્યતાં તદ્ગતઃ સ્નેહઃ શ્રૂયતાં ચાસ્ય નિશ્ચયઃ ॥ ૬।૫૧
ક્ષિપ્રમેષ્યતિ વા કૃત્વા જરામૃત્યુક્ષયં કિલ ।
અકૃતાર્થો નિરાલમ્બો નિધનં યાસ્યતીતિ વા ॥ ૬।૫૨
ઇતિ તસ્ય વચઃ શ્રુત્વા કન્થકસ્તુરગોત્તમઃ ।
જિહ્વયા લિલિહે પાદૌ વાષ્પમુષ્ણં મુમોચ ચ ॥ ૬।૫૩
જાલિના સ્વસ્તિકાઙ્કેન વક્રમધ્યેન પાણિના ।
આમમર્શ કુમારસ્તં બભાષે ચ વયસ્યવત્ ॥ ૬।૫૪
મુઞ્ચ કન્થક મા વાષ્પં દર્શિતેયં સદશ્વતા ।
મૃષ્યતાં સફલઃ શીઘ્રં શ્રમસ્તેઽયં ભવિષ્યતિ ॥ ૬।૫૫
મણિત્સરું છન્દકહસ્તસંસ્થં તતઃ સ ધીરો નિશિતં ગૃહીત્વા ।
કોશાદસિં કાઞ્ચનભક્તિચિત્રં વિલાદિવાશીવિષમુદ્વબર્હ ॥ ૬।૫૬
નિષ્કાસ્ય તં ચોત્પલપત્રનીલં ચિચ્છેદ ચિત્રં મુકુટં સકેશમ્ ।
વિકીર્યમાણાંશુકમન્તરીક્ષે ચિક્ષેપ ચૈનં સરસીવ હંસમ્ ॥ ૬।૫૭

પૂજાભિલાષેણ ચ બાહુમાન્યાદ્દિવૌકસસ્તં જગૃહુઃ પ્રવિદ્ધમ્ ।
યથાવદેનં દિવિ દેવસઙ્ઘા દિવ્યૈર્વિશેષૈર્મહયાં ચ ચક્રુઃ ॥ ૬।૫૮
મુક્ત્વા ત્વલઙ્કારકલત્રવત્તાં શ્રીવિપ્રવાસં શિરસશ્ચ કૃત્વા ।
દૃષ્ટ્વાંશુકં કાઞ્ચનહંસચિત્રમ્ વન્યં સ ધીરોઽભિચકાઙ્ક્ષ વાસઃ ॥ ૬।૫૯
તતો મૃગવ્યાધવપુર્દિવૌકા ભાવં વિદિત્વાસ્ય વિશુદ્ધભાવઃ ।
કાષાયવસ્ત્રોઽભિયયૌ સમીપં તં શાક્યરાજપ્રભવોઽભ્યુવાચ ॥ ૬।૬૦
શિવં ચ કાષાયમૃષિધ્વજસ્તે ન યુજ્યતે હિંસ્રમિદં ધનુશ્ચ ।
તત્સૌમ્ય યદ્યસ્તિ ન સક્તિરત્ર મહ્યં પ્રયચ્છેદમિદં ગૃહાણ ॥ ૬।૬૧
વ્યાધોઽબ્રવીત્કામદ કામમારાદનેન વિશ્વાસ્ય મૃગાન્ નિહત્ય ।
અર્થસ્તુ શક્રોપમ યદ્યનેન હન્ત પ્રતીચ્છાનય શુક્લમેતત્ ॥ ૬।૬૨
પરેણ હર્ષેણ તતઃ સ વન્યં જગ્રાહ વાસોઽંશુકમુત્સસર્જ ।
વ્યાધસ્તુ દિવ્યં વપુરેવ બિભ્રત્ તચ્છુક્લમાદાય દિવં જગામ ॥ ૬।૬૩
તતઃ કુમારશ્ચ સ ચાશ્વગોપસ્તસ્મિંસ્તથા યાતિ વિસિસ્મિયાતે ।
આરણ્યકે વાસસિ ચૈવ ભૂયસ્તસ્મિન્નકાર્ષ્ટાં બહુમાનમાશુ ॥ ૬।૬૪
છન્દં તતઃ સાશ્રુમુખં વિસૃજ્ય કાષાયસંવિદ્ધૃતકીર્તિભૃત્સઃ ।
યેનાશ્રમસ્તેન યયૌ મહાત્મા સન્ધ્યાભ્રસંવીત ઇવાદ્રિરાજઃ ॥ ૬।૬૫
તતસ્તથા ભર્તરિ રાજ્યનિઃસ્પૃહે તપોવનં યાતિ વિવર્ણવાસસિ ।
ભુજૌ સમુત્ક્ષિપ્ય તતઃ સ વાજિભૃદ્ભૃશં વિચુક્રોશ પપાત ચ ક્ષિતૌ ॥ ૬।૬૬
વિલોક્ય ભૂયશ્ચ રુરોદ સસ્વરં હયં ભુજાભ્યામુપગુહ્ય કન્થકમ્ ।
તતો નિરાશો વિલપન્મુહુર્મુહુર્યયૌ શરીરેણ પુરં ન ચેતસા ॥ ૬।૬૭
ક્વચિત્પ્રદધ્યૌ વિલલાપ ચ ક્વચિત્ ક્વચિત્પ્રચસ્ખાલ પપાત ચ ક્વચિત્ ।
અતો વ્રજન્ ભક્તિવશેન દુઃખિતશ્ચચાર બહ્વીરવશઃ પથિ ક્રિયાઃ ॥ ૬।૬૮
ઇતિ શ્રીબુદ્ધચરિતે મહાકાવ્યે ચન્દકનિવર્તનં નામ ષષ્ઠઃ સર્ગઃ ॥ ૬ ॥

## Book VII [તપોવનપ્રવેશો]

તતો વિસૃજ્યાશ્રુમુખં રુદન્તં છન્દં વનચ્છન્દતયા નિરાસ્થઃ ।
સર્વાર્થસિદ્ધો વપુષાભિભૂય તમાશ્રમં સિદ્ધમિવ પ્રપેદે ॥ ૭।૧
સ રાજસૂનુર્મૃગરાજગામી મૃગાજિરં તન્મૃગવત્ પ્રવિષ્ટઃ ।
લક્ષ્મીવિયુક્તોઽપિ શરીરલક્ષ્મ્યા ચક્ષૂંષિ સર્વાશ્રમિણાં જહાર ॥ ૭।૨
સ્થિતા હિ હસ્તસ્થયુગાસ્તથૈવ કૌતૂહલાચ્ચક્રધરાઃ સદારાઃ ।
તમિન્દ્રકલ્પં દદૃશુર્ન જગ્મુર્ધુર્યા ઇવાર્ધાવનતૈઃ શિરોભિઃ ॥ ૭।૩

વિપ્રાશ્ચ ગત્વા બહિરિધ્મહેતોઃ પ્રાપ્તાઃ સમિત્પુષ્પપવિત્રહસ્તાઃ ।
તપઃપ્રધાનાઃ કૃતબુદ્ધયોઽપિ તં દ્રષ્ટુમીયુર્ન મઠાનભીયુઃ ॥ ૭।૪
હૃષ્ટાશ્ચ કેકા મુમુચુર્મયૂરા દૃષ્ટ્વામ્બુદં નીલમિવોન્નમન્તમ્ ।
શષ્પાણિ હિત્વાભિમુખાશ્ચ તસ્થુર્મૃગાશ્ચલાક્ષા મૃગચારિણશ્ચ ॥ ૭।૫
દૃષ્ટ્વા તમિક્ષ્વાકુકુલપ્રદીપં જ્વલન્તમુદ્યન્તમિવાંશુમન્તમ્ ।
કૃતેઽપિ દોહે જનિતપ્રમોદાઃ પ્રસુસ્રુવુર્હોમદુહશ્ચ ગાવઃ ॥ ૭।૬
કશ્ચિદ્વસૂનામયમષ્ટમઃ સ્યાત્સ્યાદશ્વિનોરન્યતરશ્ચ્યુતોઽત્ર ।
ઉચ્ચેરુરુચ્ચૈરિતિ તત્ર વાચસ્તદ્દર્શનાદ્વિસ્મયજા મુનીનામ્ ॥ ૭।૭
લેખર્ષભસ્યેવ વપુર્દ્વિતીયં ધામેવ લોકસ્ય ચરાચરસ્ય ।
સ દ્યોતયામાસ વનં હિ કૃત્સ્નં યદૃચ્છયા સૂર્ય ઇવાવતીર્ણઃ ॥ ૭।૮
તતઃ સ તૈરાશ્રમિભિર્યથાવદભ્યર્ચિતશ્ચોપનિમન્ત્રિતશ્ચ ।
પ્રત્યર્ચયાં ધર્મભૃતો બભૂવ સ્વરેણ ભાદ્રામ્બુધરોપમેન ॥ ૭।૯
કીર્ણં તતઃ પુણ્યકૃતા જનેન સ્વર્ગાભિકામેન વિમોક્ષકામઃ ।
તમાશ્રમં સોઽનુચચાર ધીરસ્તપાંસિ ચિત્રાણિ નિરીક્ષમાણઃ ॥ ૭।૧૦
તપોવિકારાંશ્ચ નિરીક્ષ્ય સૌમ્યસ્તપોવને તત્ર તપોધનાનામ્ ।
તપસ્વિનં કઞ્ચિદનુવ્રજન્તં તત્ત્વં વિજિજ્ઞાસુરિદં બભાષે ॥ ૭।૧૧
તત્પૂર્વમદ્યાશ્રમદર્શનં મે યસ્માદિમં ધર્મવિધિં ન જાને ।
તસ્માદ્ભવાનર્હતિ ભાષિતું મે યો નિશ્ચયો યં પ્રતિ વઃ પ્રવૃત્તઃ ॥ ૭।૧૨
તતો દ્વિજાતિઃ સ તપોવિહારઃ શાક્યર્ષભાયર્ષભવિક્રમાય ।
ક્રમેન તસ્મૈ કથયાઞ્ચકાર તપોવિશેષં તપસઃ ફલં ચ ॥ ૭।૧૩
અગ્રામ્યમન્નં સલિલપ્રરૂઢં પર્ણાનિ તોયં ફલમૂલમેવ ।
યથાગમં વૃત્તિરિયં મુનીનાં ભિન્નાસ્તુ તે તે તપસાં વિકલ્પાઃ ॥ ૭।૧૪
ઉઞ્છેન જીવન્તિ ખગા ઇવાન્યે તૃણાનિ કેચિન્મૃગવચ્ચરન્તિ ।
કેચિદ્ભુજઙ્ગૈઃ સહ વર્તયન્તિ વલ્મીકભૂતા ઇવ મારુતેન ॥ ૭।૧૫
અશ્મપ્રયત્નાર્જિતવૃત્તયોઽન્યે કેચિત્સ્વદન્તાપહતાન્નભક્ષાઃ ।
કૃત્વા પરાર્થં શ્રપણં તથાન્યે કુર્વન્તિ કાર્યં યદિ શેષમસ્તિ ॥ ૭।૧૬
કેચિજ્જલક્લિન્નજટાકલાપા દ્વિઃ પાવકં જુહ્વતિ મન્ત્રપૂર્વમ્ ।
મીનૈઃ સમં કેચિદપો વિગાહ્ય વસન્તિ કૂર્મોલ્લિખિતૈઃ શરીરૈઃ ॥ ૭।૧૭
એવંવિધૈઃ કાલચિતૈસ્તપોભિઃ પરૈર્દિવં યાન્ત્યપરૈર્નૃલોકમ્ ।
દુઃખેન માર્ગેણ સુખં ક્ષિયન્તિ દુઃખં હિ ધર્મસ્ય વદન્તિ મૂલમ્ ॥ ૭।૧૮
ઇત્યેવમાદિ દ્વિપદેન્દ્રવત્સઃ શ્રુત્વા વચસ્તસ્ય તપોધનસ્ય ।
અદૃષ્ટતત્ત્વોઽપિ ન સન્તુતોષ શનૈરિદં ચાત્મગતં જગાદ ॥ ૭।૧૯

દુઃખાત્મકં નૈકવિધં તપશ્ચ સ્વર્ગપ્રધાનં તપસઃ ફલં ચ ।
લોકાશ્ચ સર્વે પરિણામવન્તઃ સ્વલ્પે શ્રમઃ ખલ્વયમાશ્રમાણામ્ ॥ ૭।૨૦
શ્રિયં ચ બન્ધૂન્ વિષયાંશ્ચ હિત્વા યે સ્વર્ગહેતૌ નિયમં ચરન્તિ ।
તે વિપ્રયુક્તાઃ ખલુ ગન્તુકામા મહત્તરં સ્વં વનમેવ ભૂયઃ ॥ ૭।૨૧
કાયક્લમૈર્યશ્ચ તપોઽભિધાનૈઃ પ્રવૃત્તિમાકાઙ્ક્ષતિ કામહેતોઃ ।
સંસારદોષાનપરીક્ષમાણો દુઃખેન સોઽન્વિચ્છતિ દુઃખમેવ ॥ ૭।૨૨
ત્રાસશ્ચ નિત્યં મરણાત્પ્રજાનાં યત્નેન ચેચ્છન્તિ પુનઃ પ્રસૂતિમ્ ।
સત્યાં પ્રવૃત્તૌ નિયતશ્ચ મૃત્યુસ્તત્રૈવ મગ્નો યત એવ ભીતઃ ॥ ૭।૨૩
ઇહાર્થમેકે પ્રવિશન્તિ ખેદં સ્વર્ગાર્થમન્યે શ્રમમાપ્નુવન્તિ ।
સુખાર્થમાશાકૃપણોઽકૃતાર્થઃ પતત્યનર્થે ખલુ જીવલોકઃ ॥ ૭।૨૪
ન ખલ્વયં ગર્હિત એવ યત્નો યો હીનમુત્સૃજ્ય વિશેષગામી ।
પ્રાજ્ઞૈઃ સમાનેન પરિશ્રમેણ કાર્યં તુ તદ્યત્ર પુનર્ન કાર્યમ્ ॥ ૭।૨૫
શરીરપીડા તુ યદીહ ધર્મઃ સુખં શરીરસ્ય ભવત્યધર્મઃ ।
ધર્મેણ ચાપ્નોતિ સુખં પરત્ર તસ્માદધર્મં ફલતીહ ધર્મઃ ॥ ૭।૨૬
યતઃ શરીરં મનસો વશેન પ્રવર્તતે વાપિ નિવર્તતે વા ।
યુક્તો દમશ્ચેતસ એવ તસ્માચ્છિત્તાદૃતે કાષ્ઠસમં શરીરમ્ ॥ ૭।૨૭
આહારશુદ્ધ્યા યદિ પુણ્યમિષ્ટં તસ્માન્મૃગાણામપિ પુણ્યમસ્તિ ।
યે ચાપિ બાહ્યાઃ પુરુષાઃ ફલેભ્યો ભાગ્યાપરાધેન પરાઙ્મુખત્વાત્ ॥ ૭।૨૮
દુઃખેઽભિસન્ધિસ્ત્વથ પુણ્યહેતુઃ સુખેઽપિ કાર્યો નનુ સોઽભિસન્ધિઃ ।
અથ પ્રમાણં ન સુખેઽભિસન્ધિર્દુઃખે પ્રમાણં નનુ નાભિસન્ધિઃ ॥ ૭।૨૯
તથૈવ યે કર્મવિશુદ્ધિહેતોઃ સ્પૃશન્ત્યપસ્તીર્થમિતિ પ્રવૃત્તાઃ ।
તત્રાપિ તોષો હૃદિ કેવલોઽયં ન પાવયિષ્યન્તિ હિ પાપમાપઃ ॥ ૭।૩૦
સ્પૃષ્ટં હિ યદ્યદ્ગુણવદ્ભિરમ્ભસ્તત્તત્પૃથિવ્યાં યદિ તીર્થમિષ્ટમ્ ।
તસ્માદ્ગુણાનેવ પરૈમિ તીર્થમાપસ્તુ નિઃસંશયમાપ એવ ॥ ૭।૩૧
ઇતિ સ્મ તત્તદ્બહુયુક્તિયુક્તં જગાદ ચાસ્તં ચ યયૌ વિવસ્વાન્ ।
તતો હવિર્ધૂમવિવર્ણવૃક્ષં તપઃપ્રશાન્તં સ વનં વિવેશ ॥ ૭।૩૨
અભ્યુદ્ધૃતપ્રજ્વલિતાગ્નિહોત્રં કૃતાભિષેકર્ષિજનાવકીર્ણમ્ ।
જાપ્યસ્વનાકૂજિતદેવકોષ્ઠં ધર્મસ્ય કર્માન્તમિવ પ્રવૃત્તમ્ ॥ ૭।૩૩
કાશ્ચિન્નિશાસ્તત્ર નિશાકરાભઃ પરીક્ષમાણશ્ચ તપાંસ્યુવાસ ।
સર્વં પરિક્ષેપ્ય તપશ્ચ મત્વા તસ્માત્તપઃક્ષેત્રતલાજ્જગામ ॥ ૭।૩૪
અન્વવ્રજન્નાશ્રમિણસ્તતસ્તં તદ્રૂપમાહાત્મ્યગતૈર્મનોભિઃ ।
દેશાદનાર્યૈરભિભૂયમાનાન્મહર્ષયો ધર્મમિવાપયાન્તમ્ ॥ ૭।૩૫

તતો જટાવલ્કલચીરખેલાંસ્તપોધનાંશ્ચૈવ સ તાન્દદર્શ ।
તપાંસિ ચૈષામનુબુધ્યમાનસ્તસ્થૌ શિવે શ્રીમતિ માર્ગવૃક્ષે ॥ ૭।૩૬
અથોપસૃત્યાશ્રમવાસિનસ્તં મનુષ્યવર્યં પરિવાર્ય તસ્થુઃ ।
વૃદ્ધશ્ચ તેષાં બહુમાનપૂર્વં કલેન સામ્ના ગિરમિત્યુવાચ ॥ ૭।૩૭
ત્વય્યાગતે પૂર્ણ ઇવાશ્રમોઽભૂત્સમ્પદ્યતે શૂન્ય ઇવ પ્રયાતે ।
તસ્માદિમં નાર્હસિ તાત હાતું જિજીવિષોર્દેહમિવેષ્ટમાયુઃ ॥ ૭।૩૮
બ્રહ્મર્ષિરાજર્ષિસુરર્ષિજુષ્ટઃ પુણ્યઃ સમીપે હિમવાન્ હિ શૈલઃ ।
તપાંસિ તાન્યેવ તપોધનાનાં યત્સન્નિકર્ષાદ્બહુલીભવન્તિ ॥ ૭।૩૯
તીર્થાનિ પુણ્યાન્યભિતસ્તથૈવ સોપાનભૂતાનિ નભસ્તલસ્ય ।
જુષ્ટાનિ ધર્માત્મભિરાત્મવદ્ભિર્દેવર્ષિભિશ્ચૈવ મહાર્ષિભિશ્ચ ॥ ૭।૪૦
ઇતશ્ચ ભૂયઃ ક્ષમમુત્તરૈવ દિક્સેવિતું ધર્મવિશેષહેતોઃ ।
ન હિ ક્ષમં દક્ષિણતો બુધેન પદં ભવેદેકમપિ પ્રયાતુમ્ ॥ ૭।૪૧
તપોવનેઽસ્મિન્નથ નિષ્ક્રિયો વા સઙ્કીર્ણધર્મા પતિતોઽશુચિર્વા ।
દૃષ્ટસ્ત્વયા યેન ન તે વિવત્સા તદ્બ્રૂહિ યાવદ્રુચિતોઽસ્તુ વાસઃ ॥ ૭।૪૨
ઇમે હિ વાંછન્તિ તપઃસહાયં તપોનિધાનપ્રતિમં ભવન્તમ્ ।
વાસસ્ત્વયા હીન્દ્રસમેન સાર્ધં બૃહસ્પતેરભ્યુદયાવહઃ સ્યાત્ ॥ ૭।૪૩
ઇત્યેવમુક્તે સ તપસ્વિમધ્યે તપસ્વિમુખ્યેન મનીષિમુખ્યઃ ।
ભવપ્રણાશાય કૃતપ્રતિજ્ઞઃ સ્વં ભાવમન્તર્ગતમાચચક્ષે ॥ ૭।૪૪
ઋજ્વાત્મનાં ધર્મભૃતાં મુનીનામિષ્ટાતિથિત્વાત્સ્વજનોપમાનમ્ ।
એવંવિધૈર્માં પ્રતિ ભાવજાતૈઃ પ્રીતિઃ પરાત્મા જનિતશ્ચ માર્ગઃ ॥ ૭।૪૫
સ્નિગ્ધાભિરાભિર્હૃદયઙ્ગમાભિઃ સમાસતઃ સ્નાત ઇવાસ્મિ વાગ્ભિઃ ।
રતિશ્ચ મે ધર્મનવગ્રહસ્ય વિસ્પન્દિતા સમ્પ્રતિ ભૂય એવ ॥ ૭।૪૬
એવં પ્રવૃત્તાન્ ભવતઃ શરણ્યાનતીવ સન્દર્શિતપક્ષપાતાન્ ।
યાસ્યામિ હિત્વેતિ મમાપિ દુઃખં યથૈવ બન્ધૂંસ્ત્યજતસ્તથૈવ ॥ ૭।૪૭
સ્વર્ગાય યુષ્માકમયં તુ ધર્મો મમાભિલાષસ્ત્વપુનર્ભવાય ।
અસ્મિન્ વને યેન ન મે વિવત્સા ભિન્નઃ પ્રવૃત્ત્યા હિ નિવૃત્તિધર્મઃ ॥ ૭।૪૮
તન્નારતિર્મે ન પરાપચારો વનાદિતો યેન પરિવ્રજામિ ।
ધર્મે સ્થિતાઃ પૂર્વયુગાનુરૂપે સર્વે ભવન્તો હિ મહાર્ષિકલ્પાઃ ॥ ૭।૪૯
તતો વચઃ સૂનૃતમર્થવચ્છ સુશ્લક્ષ્ણમોજસ્વિ ચ ગર્વિતં ચ ।
શ્રુત્વા કુમારસ્ય તપસ્વિનસ્તે વિશેષયુક્તં બહુમાનમીયુઃ ॥ ૭।૫૦
કશ્ચિદ્દ્વિજસ્તત્ર તુ ભસ્મશાયી પ્રાંશુઃ શિખી દારવચીરવાસાઃ ।
આપિઙ્ગલાક્ષસ્તનુદીર્ઘઘોણઃ કુણ્ડોદહસ્તો ગિરમિત્યુવાચ ॥ ૭।૫૧

ધીમન્નુદારઃ ખલુ નિશ્ચયસ્તે યસ્ત્વં યુવા જન્મનિ દૃષ્ટદોષઃ ।
સ્વર્ગાપવર્ગૌ હિ વિચાર્ય સમ્યગ્યસ્યાપવર્ગે મતિરસ્તિ સોઽસ્તિ ॥ ૭।૫૨
યજ્ઞૈસ્તપોભિર્નિયમૈશ્ચ તૈસ્તૈઃ સ્વર્ગં યિયાસન્તિ હિ રાગવન્તઃ ।
રાગેણ સાર્ધં રિપુણેવ યુદ્ધ્વા મોક્ષં પરીપ્સન્તિ તુ સત્ત્વવન્તઃ ॥ ૭।૫૩
તદ્બુદ્ધિરેષા યદિ નિશ્ચિતા તે તૂર્ણં ભવાન્ ગચ્છતુ વિન્ધ્યકોષ્ઠમ્ ।
અસૌ મુનિસ્તત્ર વસત્યરાડો યો નૈષ્ઠિકે શ્રેયસિ લબ્ધચક્ષુઃ ॥ ૭।૫૪
તસ્માદ્ભવાઞ્છ્રોષ્યતિ તત્ત્વમાર્ગં સત્યાં રુચૌ સમ્પ્રતિપત્સ્યતે ચ ।
યથા તુ પશ્યામિ મતિસ્તવૈષા તસ્યાપિ યાસ્યત્યવધૂય બુદ્ધિમ્ ॥ ૭।૫૫
પુષ્ટાશ્વઘોણં વિપુલાયતાક્ષં તામ્રાધરોષ્ઠં સિતતીક્ષ્ણદંષ્ટ્રમ્ ।
ઇદં હિ વક્ત્રં તનુરક્તજિહ્વં જ્ઞેયાર્ણવં પાસ્યતિ કૃત્સ્નમેવ ॥ ૭।૫૬
ગમ્ભીરતા યા ભવતસ્ત્વગાધા યા દીપ્તતા યાનિ ચ લક્ષણાનિ ।
આચાર્યકં પ્રાપ્સ્યસિ તત્પૃથિવ્યાં યન્નર્ષિભિઃ પૂર્વયુગેઽપ્યવાપ્તમ્ ॥ ૭।૫૭
પરમમિતિ તતો નૃપાત્મજસ્તમૃષિજનં પ્રતિનન્દ્ય નિર્યયૌ ।
વિધિવદનુવિધાય તેઽપિ તં પ્રવિવિશુરાશ્રમિણસ્તપોવનમ્ ॥ ૭।૫૮
ઇતિ શ્રીબુદ્ધચરિતે મહાકાવ્યે તપોવનપ્રવેશો નામ સપ્તમઃ સર્ગઃ ॥ ૭ ॥

Book VIII [અન્તઃપુરવિલાપો]

તતસ્તુરઙ્ગાવચરઃ સ દુર્મનાસ્તથા વનં ભર્તરિ નિર્મમે ગતે ।
ચકાર યત્નં પથિ શોકવિગ્રહે તથાપિ ચૈવાશ્રુ ન તસ્ય ચિક્ષિપે ॥ ૮।૧
યમેકરાત્રેણ તુ ભર્તુરાજ્ઞયા જગામ માર્ગં સહ તેન વાજિના ।
ઇયાય ભર્તુર્વિરહં વિચિન્તયંસ્તમેવ પન્થાનમહોભિરષ્ટભિઃ ॥ ૮।૨
હયશ્ચ સૌજસ્વિ ચચાર કન્થકસ્તતામ ભાવેન બભૂવ નિર્મદઃ ।
અલઙ્કૃતશ્ચાપિ તથૈવ ભૂષણૈરભૂદ્ગતશ્રીરિવ તેન વર્જિતઃ ॥ ૮।૩
નિવૃત્ય ચૈવાભિમુખસ્તપોવનં ભૃશં જિહેષે કરુણં મુહુર્મુહુઃ ।
ક્ષુધાન્વિતોઽપ્યધ્વનિ શષ્પમમ્બુ વા યથા પુરા નાભિનનન્દ નાદદે ॥ ૮।૪
તતો વિહીનં કપિલાહ્વયં પુરં મહાત્મના તેન જગદ્ધિતાત્મના ।
ક્રમેણ તૌ શૂન્યમિવોપજગ્મતુર્દિવાકરેણેવ વિનાકૃતં નભઃ ॥ ૮।૫
સપુણ્ડરીકૈરપિ શોભિતં જલૈરલઙ્કૃતં પુષ્પધરૈર્નગૈરપિ ।
તદેવ તસ્યોપવનં વનોપમં ગતપ્રહર્ષૈર્ન રરાજ નાગરૈઃ ॥ ૮।૬
તતો ભ્રમદ્ભિર્દિશિ દીનમાનસૈરનુજ્જ્વલૈર્બાષ્પહતેક્ષણૈર્નરૈઃ ।
નિવાર્યમાણાવિવ તાવુભૌ પુરં શનૈરજઃસ્નાતમિવાભિજગ્મતુઃ ॥ ૮।૭

નિશમ્ય ચ સ્રસ્તશરીરગામિનૌ વિનાગતૌ શાક્યકુલર્ષભેણ તૌ ।
મુમોચ વાષ્પં પથિ નાગરો જનઃ પુરા રથે દાશરથેરિવાગતે ॥ ૮।૮
અથ બ્રુવન્તઃ સમુપેતમન્યવો જનાઃ પથિ ચ્છન્દકમાગતાશ્રવઃ ।
ક્વ રાજપુત્રઃ કુલરાષ્ટ્રવર્ધનો હૃતસ્ત્વયાસાવિતિ પૃષ્ઠતોऽન્વયુઃ ॥ ૮।૯
તતઃ સ તાન્ ભક્તિમતોऽબ્રવીજ્જનાન્નરેન્દ્રપુત્રં ન પરિત્યજામ્યહમ્ ।
રુદન્નહં તેન તુ નિર્જને વને ગૃહસ્થવેશશ્ચ વિસર્જિતાવિતિ ॥ ૮।૧૦
ઇદં વચસ્તસ્ય નિશમ્ય તે જનાઃ સુદુષ્કરં ખલ્વિતિ નિશ્ચયં યયુઃ ।
પતદ્ધિજહ્રુઃ સલિલં ન નેત્રજં મનો નિનિન્દુશ્ચ ફલાર્થમાત્મનઃ ॥ ૮।૧૧
અથોચુરદ્યૈવ વિશામ તદ્વનં ગતઃ સ યત્ર દ્વિપરાજવિક્રમઃ ।
જિજીવિષા નાસ્તિ હિ તેન નો વિના યથેન્દ્રિયાણાં વિગમે શરીરિણામ્ ॥ ૮।૧૨
ઇદં પુરં તેન વિવર્જિતં વનં વનં ચ તત્તેન સમન્વિતં પુરમ્ ।
ન શોભતે તેન હિ નો વિના પુરં મરુત્વતા વૃત્રવધે યથા દિવમ્ ॥ ૮।૧૩
પુનઃ કુમારો વિનિવૃત્ત ઇત્યથૌ ગવાક્ષમાલાઃ પ્રતિપેદિરેऽઙ્ગનાઃ ।
વિવિક્તપૃષ્ઠં ચ નિશમ્ય વાજિનં પુનર્ગવાક્ષાણિ પિધાય ચુક્રુશુઃ ॥ ૮।૧૪
પ્રવિષ્ટદીક્ષસ્તુ સુતોપલબ્ધયે વ્રતેન શોકેન ચ ખિન્નમાનસઃ ।
જજાપ દેવાયતને નરાધિપશ્ચકાર તાસ્તાશ્ચ યથાશ્રયાઃ ક્રિયાઃ ॥ ૮।૧૫
તતઃ સ વાષ્પપ્રતિપૂર્ણલોચનસ્તુરઙ્ગમાદાય તુરઙ્ગમાનસઃ ॥ ૮।૧૬
વિવેશ શોકાભિહતો નૃપાલયં ક્ષયં વિનીતે રિપુણેવ ભર્તરિ ॥

વિગાહમાનશ્ચ નરેન્દ્રમન્દિરં વિલોકયન્નશ્રુવહેન ચક્ષુષા ।
સ્વરેણ પુષ્ટેન રુરાવ કન્થકો જનાય દુઃખં પ્રતિવેદયન્નિવ ॥ ૮।૧૭
તતઃ ખગાશ્ચ ક્ષયમધ્યગોચરાઃ સમીપબદ્ધાસ્તુરગાશ્ચ સત્કૃતાઃ ।
હયસ્ય તસ્ય પ્રતિસસ્વનુઃ સ્વનં નરેન્દ્રસૂનોરુપયાનશઙ્કિતાઃ ॥ ૮।૧૮
જનાશ્ચ હર્ષાતિશયેન વઞ્ચિતા જનાધિપાન્તઃપુરસન્નિકર્ષગાઃ ।
યથા હયઃ કન્થક એષ હેષતે ધ્રુવં કુમારો વિશતીતિ મેનિરે ॥ ૮।૧૯
અતિપ્રહર્ષાદથ શોકમૂર્છિતાઃ કુમારસન્દર્શનલોલલોચનાઃ ।
ગૃહાદ્વિનિશ્ચક્રમુરાશયા સ્ત્રિયઃ શરત્પયોદાદિવ વિદ્યુતશ્ચલાઃ ॥ ૮।૨૦
વિલમ્બવેશ્યો મલિનાંશુકાંબરા નિરઞ્જનૈર્વાષ્પહતેક્ષણૈર્મુખૈઃ ।
સ્ત્રિયો ન રેજુર્મૃજયા વિનાકૃતા દિવીવ તારા રજનીક્ષયારુણાઃ ॥ ૮।૨૧
અરક્તતામ્રૈશ્ચરણૈરનૂપુરૈરકુણ્ડલૈરાર્જવકર્ણિકૈર્મુખૈઃ ।
સ્વભાવપીનૈર્જઘનૈરમેખલૈરહારયોક્ત્રૈર્મુષિતૈરિવ સ્તનૈઃ ॥ ૮।૨૨
નિરીક્ષિતા વાષ્પપરીતલોચનં નિરાશ્રયં ચન્દકમશ્વમેવ ચ ।

વિવર્ણવક્ત્રા રુરુદુર્વરાઙ્ગના વનાન્તરે ગાવ ઇવર્ષભોજ્ઝિતાઃ ॥ ૮।૨૩
તતઃ સવાષ્પા મહિષી મહીપતેઃ પ્રનષ્ટવત્સા મહિષીવ વત્સલા ।
પ્રગૃહ્ય બાહૂ નિપપાત ગૌતમી વિલોલપર્ણા કદલીવ કાઞ્ચની ॥ ૮।૨૪
હતત્વિષોઽન્યાઃ શિથિલાત્મબાહવઃ સ્ત્રિયો વિષાદેન વિચેતના ઇવ ।
ન ચુક્રુશુર્નાશ્રુ જહુર્ન શશ્વસુર્ન ચેતના ઉલ્લિખિતા ઇવ સ્થિતાઃ ॥ ૮।૨૫
અધીરમન્યાઃ પતિશોકમૂર્છિતા વિલોચનપ્રસ્રવણૈર્મુખૈઃ સ્ત્રિયઃ ।
સિષિઞ્ચિરે પ્રોષિતચન્દનાન્ સ્તનાન્ ધરાધરઃ પ્રસ્રવણૈરિવોપલાન્ ॥ ૮।૨૬
મુખૈશ્ચ તાસાં નયનામ્બુતાડિતૈઃ રરાજ તદ્રાજનિવેશનં તદા ।
નવામ્બુકાલેઽંબુદવૃષ્ટિતાડિતૈઃ સ્રવજ્જલૈસ્તામરસૈર્યથા સરઃ ॥ ૮।૨૭
સુવૃત્તપીનાઙ્ગુલિભિર્નિરન્તરૈરભૂષણૈર્ગૂઢશિરૈર્વરાઙ્ગનાઃ ।
ઉરાંસિ જઘ્નુઃ કમલોપમૈઃ કરૈઃ સ્વપલ્લવૈર્વાતચલા લતા ઇવ ॥ ૮।૨૮
કરપ્રહારપ્રચલૈશ્ચ તા બભુર્યથાપિ નાર્યઃ સહિતોન્નતૈઃ સ્તનૈઃ ।
વનાનિલાઘૂર્ણિતપદ્મકમ્પિતૈઃ રથાઙ્ગનામ્નાં મિથુનૈરિવાપગાઃ ॥ ૮।૨૯
યથા ચ વક્ષાંસિ કરૈરપીડયંસ્તથૈવ વક્ષોભિરપીડયન્ કરાન્ ।
અકારયંસ્તત્ર પરસ્પરં વ્યથાઃ કરાગ્રવક્ષાંસ્યબલા દયાલસાઃ ॥ ૮।૩૦
તતસ્તુ રોષપ્રવિરક્તલોચના વિષાદસમ્બન્ધકષાયગદ્ગદમ્ ।
ઉવાચ નિઃશ્વાસચલત્પયોધરા વિગાધશોકાશ્રુધરા યશોધરા ॥ ૮।૩૧
નિશિ પ્રસુપ્તામવશાં વિહાય માં ગતઃ ક્વ સ ચ્છન્દક મન્મનોરથઃ ।
ઉપાગતે ચ ત્વયિ કન્થકે ચ મે સમં ગતેષુ ત્રિષુ કમ્પતે મનઃ ॥ ૮।૩૨
અનાર્યમસ્નિગ્ધમમિત્રકર્મ મે નૃશંસ કૃત્વા કિમિહાદ્ય રોદિષિ ।
નિયચ્છ વાષ્પં ભવ તુષ્ટમાનસો ન સંવદત્યશ્રુ ચ તચ્છ કર્મ તે ॥ ૮।૩૩
પ્રિયેણ વશ્યેન હિતેન સાધુના ત્વયા સહાયેન યથાર્થકારિણા ।
ગતોઽર્યપુત્રો હ્યપુનર્નિવૃત્તયે રમસ્વ દિષ્ટ્યા સફલઃ શ્રમસ્તવ ॥ ૮।૩૪
વરં મનુષ્યસ્ય વિચક્ષણો રિપુર્ન મિત્રમપ્રાજ્ઞમયોગપેશલમ્ ।
સુહૃદ્બ્રુવેણ હ્યવિપશ્ચિતા ત્વયા કૃતઃ કુલસ્યાસ્ય મહાનુપપ્લવઃ ॥ ૮।૩૫
ઇમા હિ શોચ્યા વ્યવમુક્તભૂષણાઃ પ્રસક્તવાષ્પાવિલરક્તલોચનાઃ ।
સ્થિતેઽપિ પત્યૌ હિમવન્મહીસમે પ્રનષ્ટશોભા વિધવા ઇવ સ્ત્રિયઃ ॥ ૮।૩૬
ઇમાશ્ચ વિક્ષિપ્તવિટઙ્કબાહવઃ પ્રસક્તપારાવતદીર્ઘનિસ્વનાઃ ।
વિનાકૃતાસ્તેન સહૈવ રોધનૈર્ભૃશં રુદન્તીવ વિમાનપઙ્ક્તયઃ ॥ ૮।૩૭
અનર્થકામોઽસ્ય જનસ્ય સર્વથા તુરઙ્ગમોઽપિ ધ્રુવમેષ કન્થકઃ ।
જહાર સર્વસ્વમિતસ્તથા હિ મે જને પ્રસુપ્તે નિશિ રત્નચૌરવત્ ॥ ૮।૩૮
યદા સમર્થઃ ખલુ સોઢુમાગતાનિષુપ્રહારાનપિ કિં પુનઃ કશાઃ ।

ગતઃ કશાપાતભયાત્ કથં ત્વયં શ્રિયં ગૃહીત્વા હૃદયં ચ મે સમમ્ ॥ ૮।૩૯
અનાર્યકર્મા ભૃશમદ્ય હેષતે નરેન્દ્રધિષ્ણ્યં પ્રતિપૂરયન્નિવ ।
યદા તુ નિર્વાહયતિ સ્મ મે પ્રિયં તદા હિ મૂકસ્તુરગાધમોઽભવત્ ॥ ૮।૪૦
યદિ હ્યહેષિષ્યત બોધયઞ્જનં ખુરૈઃ ક્ષિતૌ વાપ્યકરિષ્યત ધ્વનિમ્ ।
હનુસ્વનં વાજનયિષ્યદુત્તમં ન ચાભવિષ્યન્મમ દુઃખમીદૃશમ્ ॥ ૮।૪૧
ઇતીહ દેવ્યાઃ પરિદેવિતાશ્રયં નિશમ્ય વાષ્પગ્રથિતાક્ષરં વચઃ ।
અધોમુખઃ સાશ્રુકલઃ કૃતાઞ્જલિઃ શનૈરિદં છન્દક ઉત્તરં જગૌ ॥ ૮।૪૨
વિગર્હિતું નાર્હસિ દેવિ કન્થકં ન ચાપિ રોષં મયિ કર્તુમર્હસિ ।
અનાગસૌ સ્વઃ સમવેહિ સર્વશો ગતો નૃદેવઃ સ હિ દેવિ દેવવત્ ॥ ૮।૪૩
અહં હિ જાનન્નપિ રાજશાસનં બલાત્કૃતઃ કૈરપિ દૈવતૈરિવ ।
ઉપાનયં તૂર્ણમિમં તુરઙ્ગમં તથાન્વગચ્ચં વિગતશ્રમોઽધ્વનિ ॥ ૮।૪૪
વ્રજન્નયં વાજિવરોઽપિ નાસ્પૃશન્મહીં ખુરાગ્રૈર્વિધૃતૈરિવાન્તરા ।
તથૈવ દૈવાદિવ સંયતાનનો હનુસ્વનં નાકૃત નાપ્યહેષત ॥ ૮।૪૫
યદા વહિર્ગચ્ચતિ પાર્થિવાત્મજસ્તદાભવદ્દ્વારમપાવૃતં સ્વયમ્ ।
તમશ્ચ નૈશં રવિણેવ પાટિતં તતોઽપિ દૈવો વિધિરેષ ગૃહ્યતામ્ ॥ ૮।૪૬
યદાપ્રમત્તોઽપિ નરેન્દ્રશાસનાદ્ગૃહે પુરે ચૈવ સહસ્રશો જનઃ ।
તદા સ નાબુધ્યત નિદ્રયા હૃતસ્તતોઽપિ દૈવો વિધિરેષ ગૃહ્યતામ્ ॥ ૮।૪૭
યતશ્ચ વાસો વનવાસસમ્મતં વિસૃષ્ટમસ્મૈ સમયે દિવૌકસા ।
દિવિ પ્રવિદ્ધં મુકુટં ચ તદ્ધૃતં તતોઽપિ દૈવો વિધિરેષ ગૃહ્યતામ્ ॥ ૮।૪૮
તદેવમાવાં નરદેવિ દોષતો ન તત્પ્રયાતં પ્રતિગન્તુમર્હસિ ।
ન કામકારો મમ નાસ્ય વાજિનઃ કૃતાનુયાત્રઃ સ હિ દૈવતૈર્ગતઃ ॥ ૮।૪૯
ઇતિ પ્રયાણં બહુધૈવમદ્ભુતં નિશમ્ય તાસ્તસ્ય મહાત્મનઃ સ્ત્રિયઃ ।
પ્રનષ્ટશોકા ઇવ વિસ્મયં યયુર્મનોજ્વરં પ્રવ્રજનાત્તુ લેભિરે ॥ ૮।૫૦
વિષાદપારિપ્લવલોચના તતઃ પ્રનષ્ટપોતા કુરરીવ દુઃખિતા ।
વિહાય ધૈર્યં વિરુરાવ ગૌતમી તતામ ચૈવાશ્રુમુખી જગાદ ચ ॥ ૮।૫૧
મહોર્મિમન્તો મૃદવોઽસિતાઃ શુભાઃ પૃથક્પૃથગ્મૂલરુહાઃ સમુદ્ગતાઃ ।
પ્રચેરિતાસ્તે ભુવિ તસ્ય મૂર્ધજા નરેન્દ્રમૌલીપરિવેષ્ટનક્ષમાઃ ॥ ૮।૫૨
પ્રલમ્બબાહુર્મૃગરાજવિક્રમો મહાર્ષભાક્ષઃ કનકોજ્જ્વલદ્યુતિઃ ।
વિશાલવક્ષા ઘનદુન્દુભિસ્વનસ્તથાવિધોઽપ્યાશ્રમવાસમર્હતિ ॥ ૮।૫૩
અભાગિની નૂનમિયં વસુન્ધરા તમાર્યકર્માણમનુત્તમં પ્રતિ ।
ગતસ્તતોઽસૌ ગુણવાન્ હિ તાદૃશો નૃપઃ પ્રજાભાગ્યગુણૈઃ પ્રસૂયતે ॥ ૮।૫૪
સુજાતજાલાવતતાઙ્ગુલી મૃદૂ નિગૂઢગુલ્ફૌ વિષપુષ્પકોમલૌ ।

વનાન્તભૂમિં કઠિનાં કથં નુ તૌ સચક્રમધ્યૌ ચરણૌ ગમિષ્યતઃ ॥ ૮।૫૫
વિમાનપૃષ્ઠે શયનાસનોચિતં મહાર્હવસ્ત્રાગુરુચન્દનાર્ચિતમ્ ।
કથં નુ શીતોષ્ણજલાગમેષુ તચ્છરીરમોજસ્વિ વને ભવિષ્યતિ ॥ ૮।૫૬
કુલેન સત્ત્વેન બલેન વર્ચસા શ્રુતેન લક્ષ્મ્યા વયસા ચ ગર્વિતઃ ।
પ્રદાતુમેવાભ્યુદિતો ન યાચિતું કથં સ ભિક્ષાં પરતશ્ચરિષ્યતિ ॥ ૮।૫૭
શુચૌ શયિત્વા શયને હિરણ્મયે પ્રબોધ્યમાનો નિશિ તૂર્યનિસ્વનૈઃ ।
કથં વત સ્વપ્સ્યતિ સોઽદ્ય મે વ્રતી પટૌકદેશાન્તરિતે મહીતલે ॥ ૮।૫૮
ઇમં વિલાપં કરુણં નિશમ્ય તા ભુજૈઃ પરિષ્વજ્ય પરસ્પરં સ્ત્રિયઃ ।
વિલોચનેભ્યઃ સલિલાનિ તત્યજુર્મધૂનિ પુષ્પેભ્ય ઇવેરિતા લતાઃ ॥ ૮।૫૯
તતો ધરાયામપતદ્યશોધરા વિચક્રવાકેવ રથાઙ્ગસાહ્વયા ।
શનૈશ્ચ તત્તદ્વિલલાપ વિક્લવા મુહુર્મુહુર્ગદ્ગદરુદ્ધયા ગિરા ॥ ૮।૬૦
સ મામનાથાં સહધર્મચારિણીમપાસ્ય ધર્મં યદિ કર્તુમિચ્છતિ ।
કુતોઽસ્ય ધર્મઃ સહધર્મચારિણીં વિના તપો યઃ પરિભોક્તુમિચ્છતિ ॥ ૮।૬૧
શ ृણોતિ નૂનં સ ન પૂર્વપાર્થિવાન્ મહાસુદર્શપ્રભૃતીન્ પિતામહાન્ ।
વનાનિ પત્નીસહિતાનુપેયુષસ્તથા સ ધર્મં મદૃતે ચિકીર્ષતિ ॥ ૮।૬૨
મખેષુ વા વેદવિધાનસંસ્કૃતૌ ન દમ્પતી પશ્યતિ દીક્ષિતાવુભૌ ।
સમં બુભુક્ષૂ પરતોઽપિ તત્ફલં તતોઽસ્ય જાતો મયિ ધર્મમત્સરઃ ॥ ૮।૬૩
ધ્રુવં સ જાનન્ મમ ધર્મવલ્લભો મનઃ પ્રિયેઽપ્યાકલહં મુહુર્મિથઃ ।
સુખં વિભીર્મામપહાય રોસણાં મહેન્દ્રલોકેઽપ્સરસો જિઘૃક્ષતિ ॥ ૮।૬૪
ઇયં તુ ચિન્તા મમ કીદૃશં નુ તા વપુર્ગુણં બિભ્રતિ તત્ર યોષિતઃ ।
વને યદર્થં સ તપાંસિ તપ્યતે શ્રિયં ચ હિત્વા મમ ભક્તિમેવ ચ ॥ ૮।૬૫
ન ખલ્વિયં સ્વર્ગસુખાય મે સ્પૃહા ન તજ્જનસ્યાત્મવતોઽપિ દુર્લભમ્ ।
સ તુ પ્રિયો મામિહ વા પરત્ર વા કથં ન જહ્યાદિતિ મે મનોરથઃ ॥ ૮।૬૬
અભાગિની યદ્યહમાયતેક્ષણં શુચિસ્મિતં ભર્તુરુદીક્ષિતું મુખમ્ ।
ન મન્દભાગ્યોઽર્હતિ રાહુલોઽપ્યયં કદાચિદઙ્કે પરિવર્તિતું પિતુઃ ॥ ૮।૬૭
અહો નૃશંસં સુકુમારવર્ચસઃ સુદારુણં તસ્ય મનસ્વિનો મનઃ ।
કલપ્રલાપં દ્વિષતોઽપિ હર્ષણં શિશું સુતં યસ્ત્યજતીદૃશં સ્વતઃ ॥ ૮।૬૮
મમાપિ કામં હૃદયં સુદારુણં શિલામયં વાપ્યયસાપિ વા કૃતમ્ ।
અનાથવચ્છ્રીરહિતે સુખોચિતે વનં ગતે ભર્તરિ યન્ન દીર્યતે ॥ ૮।૬૯
ઇતીહ દેવી પતિશોકમૂર્છિતા રુરોદ દધ્યૌ વિલલાપ ચાસકૃત્ ।
સ્વભાવધીરાપિ હિ સા સતી શુચા ધૃતિં ન સસ્માર ચકાર નો હ્રિયમ્ ॥ ૮।૭૦
તતસ્તથા શોકવિલાપવિક્લવાં યશોધરાં પ્રેક્ષ્ય વસુન્ધરાગતામ્ ।

મહારવિન્દૈરિવ વૃષ્ટિતાડિતૈર્મુખૈઃ સવાષ્પૈર્વનિતા વિચુક્રુશુઃ ॥ ૮।૭૧
સમાપ્તજાપ્યઃ કૃતહોમમઙ્ગલો નૃપસ્તુ દેવાયતનાદ્વિનિર્યયૌ ।
જનસ્ય તેનાર્ત્તરવેણ ચાહતશ્ચચાલ વજ્રધ્વનિનેવ વારણઃ ॥ ૮।૭૨
નિશામ્ય ચ ચ્છન્દકકન્થકાવુભૌ સુતસ્ય સંશ્રુત્ય ચ નિશ્ચયં સ્થિરમ્ ।
પપાત શોકાભિહતો મહીપતિઃ શચીપતેર્વૃત્ત ઇવોત્સવે ધ્વજઃ ॥ ૮।૭૩
તતો મુહૂર્તં સુતશોકમોહિતો જનેન તુલ્યાભિજનેન ધારિતઃ ।
નિરીક્ષ્ય દૃષ્ટ્યા જલપૂર્ણયા હયં મહીતલસ્થો વિલલાપ પાર્થિવઃ ॥ ૮।૭૪
બહૂનિ કૃત્વા સમરે પ્રિયાણિ મે મહત્ત્વયા કન્થક વિપ્રિયં કૃતમ્ ।
ગુણપ્રિયો યેન વને સ મે પ્રિયઃ પ્રિયોઽપિ સન્નપ્રિયવત્ પ્રચેરિતઃ ॥ ૮।૭૫
તદદ્ય માં વા નય તત્ર યત્ર સ વ્રજ દ્રુતં વા પુનરેનમાનય ।
ઋતે હિ તસ્માન્મમ નાસ્તિ જીવિતં વિગાઢરોગસ્ય સદૌષધાદિવ ॥ ૮।૭૬
સુવર્ણનિષ્ઠીવિનિ મૃત્યુના હૃતે સુદુષ્કરં યન્ન મમાર સૃઞ્જયઃ ।
અહં પુનર્ધર્મરતૌ સુતે ગતેઽમુમુક્ષુરાત્માનમનાત્મવાનિવ ॥ ૮।૭૭
વિભોર્દશક્ષત્રકૃતઃ પ્રજાપતેઃ પરાપરજ્ઞસ્ય વિવસ્વદાત્મનઃ ।
પ્રિયેણ પુત્રેણ સતા વિનાકૃતં કથં ન મુહ્યેદ્ધિ મનો મનોરપિ ॥ ૮।૭૮
અજસ્ય રાજ્ઞસ્તનયાય ધીમતે નરાધિપાયેન્દ્રસખાય મે સ્પૃહા ।
ગતે વનં યસ્તનયે દિવં ગતો ન મોઘવાષ્પઃ કૃપણં જિજીવ હ ॥ ૮।૭૯
પ્રચક્ષ્વ મે ભદ્ર તદાશ્રમાજિરં હૃતસ્ત્વયા યત્ર સ મે જલાઞ્જલિઃ ।
ઇમે પરીપ્સન્તિ હિ તે પિપાસવો મમાસવઃ પ્રેતગતિં યિયાસવઃ ॥ ૮।૮૦
ઇતિ તનયવિયોગજાતદુઃખં ક્ષિતિસદૃશં સહજં વિહાય ધૈર્યમ્ ।
દશરથ ઇવ રામશોકવશ્યો બહુ વિલલાપ નૃપો વિસઞ્જ્ઞકલ્પઃ ॥ ૮।૮૧
શ્રુતવિનયગુણાન્વિતસ્તતસ્તં મતિસચિવઃ પ્રવયાઃ પુરોહિતશ્ચ ।
અવધૃતમિદમૂચતુર્યથાવન્ન ચ પરિતપ્તમુખૌ ન ચાપ્યશોકૌ ॥ ૮।૮૨
ત્યજ નરવર શોકમેહિ ધૈર્યં કુધૃતિરિવાર્હસિ ધીર નાશ્રુ મોક્તુમ્ ।
સ્રજમિવ મૃદિતામપાસ્ય લક્ષ્મીં ભુવિ બહવો હિ નૃપા વનાન્યતીયુઃ ॥ ૮।૮૩
અપિ ચ નિયત એષ તસ્ય ભાવઃ સ્મર વચનં તદૃષેઃ પુરાસિતસ્ય ।
ન હિ સ દિવિ ન ચક્રવર્તિરાજ્યે ક્ષણમપિ વાસયિતું સુખેન શક્યઃ ॥ ૮।૮૪
યદિ તુ નૃવર કાર્ય એવ યત્નસ્ત્વરિતમુદાહર યાવદત્ર યાવઃ ।
બહુવિધમિહ યુદ્ધમસ્તુ તાવત્તવ તનયસ્ય વિધેશ્ચ તસ્ય તસ્ય ॥ ૮।૮૫
નરપતિરથ તૌ શશાસ તસ્માદ્દ્રુતમિત એવ યુવામભિપ્રયાતમ્ ।
ન હિ મમ હૃદયં પ્રયાતિ શાન્તિં વનશકુનેરિવ પુત્રલાલસસ્ય ॥ ૮।૮૬
પરમમિતિ નરેન્દ્રશાસનાત્તૌ યયતુરમાત્યપુરોહિતૌ વનં તત્ ।

કૃતમિતિ સવધૂજનઃ સદારો નૃપતિરપિ પ્રચકાર શેષકાર્યમ્ ॥ ૮।૮૭
ઇતિ શ્રીબુદ્ધચરિતે મહાકાવ્યેઽન્તઃપુરવિલાપો નામાષ્ટમઃ સર્ગઃ ॥ ૮ ॥

---

Book IX [કુમારાન્વેષણો]
તતસ્તદા મન્ત્રિપુરોહિતૌ તૌ વાષ્પપ્રતોદાભિહતૌ નૃપેણ ।
વિદ્ધૌ સદશ્વાવિવ સર્વયત્નાત્સૌહાર્દશીઘ્રં યયતુર્વનં તત્ ॥ ૯।૧
તમાશ્રમમ્ જાતપરિશ્રમૌ તાવુપેત્ય કાલે સદૃશાનુયાત્રૌ ।
રાજર્દ્ધિમુત્સૃજ્ય વિનીતચેષ્ટાવુપેયતુર્ભાર્ગવધિષ્ણ્યમેવ ॥ ૯।૨
તૌ ન્યાયતસ્તં પ્રતિપૂજ્ય વિપ્રં તેનાર્ચિતૌ તાવપિ ચાનુરૂપમ્ ।
કૃતાસનૌ ભાર્ગવમાસનસ્થં છિત્ત્વા કથામૂચતુરાત્મકૃત્યમ્ ॥ ૯।૩
શુદ્ધૌજસઃ શુદ્ધવિશાલકીર્તેરિક્ષ્વાકુવંશપ્રભવસ્ય રાજ્ઞઃ ।
ઇમં જનં વેત્તુ ભવાનધીરં શ્રુતગ્રહે મન્ત્રપરિગ્રહે ચ ॥ ૯।૪
તસ્યેન્દ્રકલ્પસ્ય જયન્તકલ્પઃ પુત્રો જરામૃત્યુભયં તિતીર્ષુઃ ।
ઇહાભ્યુપેતઃ કિલ તસ્ય હેતોરાવામુપેતૌ ભગવાનવૈતુ ॥ ૯।૫
તૌ સોઽબ્રવીદસ્તિ સ દીર્ઘબાહુઃ પ્રાપ્તઃ કુમારો ન તુ નાવબુદ્ધઃ ।
ધર્મોઽયમાવર્તક ઇત્યવેત્ય યાતસ્ત્વરાડાભિમુખો મુમુક્ષુઃ ॥ ૯।૬
તસ્માત્તતસ્તાવુપલભ્ય તત્ત્વં તં વિપ્રમામન્ત્ર્ય તદૈવ સદ્યઃ ।
ખિન્નાવખિન્નાવિવ રાજપુત્રઃ પ્રસસ્રતુસ્તેન યતઃ સ યાતઃ ॥ ૯।૭
યાન્તૌ તતસ્તૌ સૃજયા વિહીનમપશ્યતાં તં વપુષા જ્વલન્તમ્ ।
નૃપોપવિષ્ટં પથિ વૃક્ષમૂલે સૂર્યં ઘનાભોગમિવ પ્રવિષ્ટમ્ ॥ ૯।૮
યાનં વિહાયોપયયૌ તતસ્તં પુરોહિતો મન્ત્રધરેણ સાર્ધમ્ ।
યથા વનસ્થં સહવામદેવો રામં દિદૃક્ષુર્મુનિરૌર્વશેયઃ ॥ ૯।૯
તાવર્ચયામાસતુરર્હતસ્તં દિવીવ શુક્રાઙ્ગિરસૌ મહેન્દ્રમ્ ।
પ્રત્યર્ચયામાસ સ ચાર્હતસ્તૌ દિવીવ શુક્રાઙ્ગિરસૌ મહેન્દ્રઃ ॥ ૯।૧૦
કૃતાભ્યનુજ્ઞાવભિતસ્તતસ્તૌ નિષીદતુઃ શાક્યકુલધ્વજસ્ય ।
વિરેજતુસ્તસ્ય ચ સન્નિકર્ષે પુનર્વસૂ યોગગતાવિવેન્દોઃ ॥ ૯।૧૧
તં વૃક્ષમૂલસ્થમભિજ્વલન્તં પુરોહિતો રાજસુતં બભાષે ।
યથોપવિષ્ટં દિવિ પારિજાતે બૃહસ્પતિઃ શક્રસુતં જયન્તમ્ ॥ ૯।૧૨
ત્વચ્છોકશલ્યે હૃદયાવગાઢે મોહં ગતો ભૂમિતલે મુહૂર્તમ્ ।
કુમાર રાજા નયનામ્બુવર્ષો યત્ત્વામવોચત્તદિદં નિબોધ ॥ ૯।૧૩
જાનામિ ધર્મં પ્રતિ નિશ્ચયં તે પરૈમિ તેઽચ્યાવિનમેતમર્થમ્ ।

અહં ત્વકાલે વનસંશ્રયાત્તે શોકાગ્નિનાગ્નિપ્રતિમેન દહ્યે ॥ ૯।૧૪
તદેહિ ધર્મપ્રિય મત્પ્રિયાર્થં ધર્માર્થમેવ ત્યજ બુદ્ધિમેતામ્ ।
અયં હિ મા શોકરયઃ પ્રવૃદ્ધો નદીરયઃ કૂલમિવાભિહન્તિ ॥ ૯।૧૫
મેઘામ્બુકક્ષાદ્રિષુ યા હિ વૃત્તિઃ સમીરણાર્કાગ્નિમહાશનીનામ્ ।
તાં વૃત્તિમસ્માસુ કરોતિ શોકો વિકર્ષણોચ્ચોષણદાહભેદૈઃ ॥ ૯।૧૬
તદ્ભુઙ્ક્ષ્વ તાવદ્વસુધાધિપત્યં કાલે વનં યાસ્યસિ શાસ્ત્રદૃષ્ટે ।
અનિષ્ટબન્ધૌ કુરુ માપ્યુપેક્ષાં સર્વેષુ ભૂતેષુ દયા હિ ધર્મઃ ॥ ૯।૧૭
ન ચૈષ ધર્મો વન એવ સિદ્ધઃ પુરેઽપિ સિદ્ધિર્નિયતા યતીનામ્ ।
બુદ્ધિશ્ચ યત્નશ્ચ નિમિત્તમત્ર વનં ચ લિઙ્ગં ચ હિ ભીરુચિહ્નમ્ ॥ ૯।૧૮
મૌલીધરૈરંસવિષક્તહારૈઃ કેયૂરવિષ્ટબ્ધભુજૈર્નરેન્દ્રૈઃ ।
લક્ષ્મ્યઙ્કમધ્યે પરિવર્તમાનૈઃ પ્રાપ્તો ગૃહસ્થૈરપિ મોક્ષધર્મઃ ॥ ૯।૧૯
ધ્રુવાનુજૌ યૌ બલિવજ્રબાહૂ વૈભ્રાજમાષાઢમથાન્તિદેવમ્ ।
વિદેહરાજં જનકં તથૈવ પાકદ્રુમં સેનજિતશ્ચ રાજ્ઞઃ ॥ ૯।૨૦
એતાન્ ગૃહસ્થાન્ નૃપતીનવેહિ નૈઃશ્રેયસે ધર્મવિધૌ વિનીતાન્ ।
ઉભેઽપિ તસ્માદ્યુગપદ્ભજસ્વ ચિત્તાધિપત્યં ચ નૃપશ્રિયં ચ ॥ ૯।૨૧
ઇચ્છામિ હિ ત્વામુપગુહ્ય ગાઢં કૃતાભિષેકં સલિલાર્દ્રમેવ ।
ધૃતાતપત્રં સમુદીક્ષમાણસ્તેનૈવ હર્ષેણ વનં પ્રવેષ્ટુમ્ ॥ ૯।૨૨
ઇત્યબ્રવીદ્ભૂમિપતિર્ભવન્તં વાક્યેન વાષ્પગ્રથિતાક્ષરેણ ।
શ્રુત્વા ભવાનર્હતિ તત્પ્રિયાર્થં સ્નેહેન તત્સ્નેહમનુપ્રયાતુમ્ ॥ ૯।૨૩
શોકામ્ભસિ ત્વત્પ્રભવે હ્યગાધે દુઃખાર્ણવે મજ્જતિ શાક્યરાજઃ ।
તસ્માત્તમુત્તારય નાથહીનં નિરાશ્રયં મગ્નમિવાર્ણવે ગામ્ ॥ ૯।૨૪
ભીષ્મેણ ગઙ્ગોદરસમ્ભવેન રામેણ રામેણ ચ ભાર્ગવેણ ।
શ્રુત્વા કૃતં કર્મ પિતુઃ પ્રિયાર્થં પિતુસ્ત્વમપ્યર્હસિ કર્તુમિષ્ટમ્ ॥ ૯।૨૫
સંવર્ધયિત્રીં ચ સમેહિ દેવીમગસ્ત્યજુષ્ટાં દિશમપ્રયાતામ્ ।
પ્રનષ્ટવત્સામિવ વત્સલાં ગામજસ્રમાર્ત્તાં કરુણં રુદન્તીં ॥ ૯।૨૬
હંસેન હંસીમિવ વિપ્રયુક્તાં ત્યક્તાં ગજેનેવ વને કરેણુમ્ ।
આર્ત્તાં સનાથામપિ નાથહીનાં ત્રાતું વધૂમર્હસિ દર્શનેન ॥ ૯।૨૭
એકં સુતં બાલમનર્હદુઃખં સન્તાપમન્તર્ગતમુદ્વહન્તમ્ ।
તં રાહુલં મોક્ષય બન્ધુશોકાદ્ રાહૂપસર્ગાદિવ પૂર્ણચન્દ્રમ્ ॥ ૯।૨૮
શોકાગ્નિના ત્વદ્વિરહેન્ધનેન નિઃશ્વાસધૂમેન તમઃશિખેન ।
ત્વદ્દર્શનાયર્છતિ દહ્યમાનઃ સોઽન્તઃપુરં ચૈવ પુરં ચ કૃત્સ્નમ્ ॥ ૯।૨૯
સ બોધિસત્ત્વઃ પરિપૂર્ણસત્ત્વઃ શ્રુત્વા વચસ્તસ્ય પુરોહિતસ્ય ।

ધ્યાત્વા મુહૂર્તં ગુણવદ્ગુણજ્ઞઃ પ્રત્યુત્તરં પ્રશ્રિતમિત્યુવાચ ॥ ૯।૩૦
અવૈમિ ભાવં તનયપ્રસક્તં વિશેષતો યો મયિ ભૂમિપસ્ય ।
જાનન્નપિ વ્યાધિજરાવિપદ્ભ્યો ભીતસ્ત્વગત્યા સ્વજનં ત્યજામિ ॥ ૯।૩૧
દ્રષ્ટું પ્રિયં કઃ સ્વજનં હિ નેચ્છેન્નાસૌ યદિ સ્યાત્પ્રિયવિપ્રયોગઃ ।
યદા તુ ભૂત્વાપિ ભવેદ્વિયોગસ્તતો ગુરું સ્નિગ્ધમપિ ત્યજામિ ॥ ૯।૩૨
મદ્ધેતુકં યત્તુ નરાધિપસ્ય શોકં ભવાનર્હતિ ન પ્રિયં મે ।
યત્સ્વપ્નભૂતેષુ સમાગમેષુ સન્તપ્યતે ભાવિનિ વિપ્રયોગૈઃ ॥ ૯।૩૩
એવં ચ તે નિશ્ચયમેતુ બુદ્ધિર્દૃષ્ટ્વા વિચિત્રં વિવિધપ્રચારમ્ ।
સન્તાપહેતુર્ન સુતો ન બન્ધુરજ્ઞાનનૈમિત્તિક એષ તાપઃ ॥ ૯।૩૪
યદાધ્વગાનામિવ સઙ્ગતાનાં કાલે વિયોગો નિયતઃ પ્રજાનામ્ ।
પ્રાજ્ઞો જનઃ કો નુ ભજેત શોકં બન્ધુપ્રિયઃ સન્નપિ  બન્ધુહીનઃ ॥ ૯।૩૫
ઇહૈતિ હિત્વા સ્વજનં પરત્ર પ્રલભ્ય ચેહાપિ પુનઃ પ્રયાતિ ।
ગત્વાપિ તત્રાપ્યપરત્ર ગચ્છેત્યેવં જનો યોગિનિ કોઽનુરોધઃ ॥ ૯।૩૬
યદા ચ ગર્ભાત્પ્રભૃતિ પ્રવૃત્તઃ સર્વાસ્વ્ અવસ્થાસુ વધાય મૃત્યુઃ  ।
કસ્માદકાલે વનસંશ્રયં મે પુત્રપ્રિયસ્તત્ર ભવાન્ અવોચત્ ॥ ૯।૩૭
ભવત્યકાલો વિષયાભિપત્તૌ કાલસ્તથૈવાભિવિધૌ પ્રદિષ્ટઃ ॥ ૯।૩૮
કાલો જગત્કર્ષતિ સર્વકાલાનર્ચાર્હકે શ્રેયસિ સર્વકાલઃ ॥

રાજ્યં મુમુક્ષુર્મયિ યચ્ચ રાજા તદપ્યુદારં સદૃશં પિતુશ્ચ ।
પ્રતિગ્રહીતું મમ ન ક્ષમં તુ લોભાદપથ્યાન્નમિવાતુરસ્ય ॥ ૯।૩૯
કથં નુ મોહાયતનં નૃપત્વં ક્ષમં પ્રપત્તું વિદુષા નરેણ ।
સોદ્વેગતા યત્ર મદઃ શ્રમશ્ચ પરોપચારેણ ચ ધર્મપીડા ॥ ૯।૪૦
જામ્બૂનદં હર્મ્યમિવ પ્રદીપ્તં વિષેણ સંયુક્તમિવોત્તમાન્નમ્ ।
ગ્રાહાકુલં ચામ્બ્વિવ સારવિન્દં રાજ્યં હિ રમ્યં વ્યસનાશ્રયં ચ  ॥ ૯।૪૧
ઇત્થં ચ રાજ્યં ન સુખં ન ધર્મઃ પૂર્વે યથા જાતઘૃણા નરેન્દ્રાઃ ।
વયઃપ્રકર્ષેઽપરિહાર્યદુઃખે રાજ્યાનિ મુક્ત્વા વનમેવ જગ્મુઃ ॥ ૯।૪૨
વરં હિ ભુક્તાનિ તૃણાન્યરણ્યે તોષં પરં રત્નમિવોપગુહ્ય ।
સહોષિતં શ્રીસુલભૈર્ન ચૈવ દોષૈરદૃશ્યૈરિવ કૃષ્ણસર્પૈઃ ॥ ૯।૪૩
શ્લાઘ્યં હિ રાજ્યાનિ વિહાય રાજ્ઞાં ધર્માભિલાષેણ વનં પ્રવેષ્ટુમ્ ।
ભગ્નપ્રતિજ્ઞસ્ય ન તૂપપન્નં વનં પરિત્યજ્ય ગૃહં પ્રવેષ્ટુમ્ ॥ ૯।૪૪
જાતઃ કુલે કો હિ નરઃ સસત્ત્વો ધર્માભિલાષેણ વનં પ્રવિષ્ટઃ ।
કાષાયમુત્સૃજ્ય વિમુક્તલજ્જઃ પુરન્દરસ્યાપિ પુરં શ્રયેત ॥ ૯।૪૫

લોભાદ્ધિ મોહાદથવા ભયેન યો વાન્તમન્નં પુનરાદદીત ।
લોભાત્સ મોહાદથવા ભયેન સન્ત્યજ્ય કામાન્ પુનરાદદીત ॥ ૯।૪૬
યશ્ચ પ્રદીપ્તાચ્છરણાત્કથઞ્ચિન્નિષ્ક્રમ્ય ભૂયઃ પ્રવિશેત્તદેવ ।
ગાર્હસ્થ્યમુત્સૃજ્ય સ દૃષ્ટદોષો મોહેન ભૂયોઽભિલષેદ્ગ્રહીતુમ્ ॥ ૯।૪૭
યા ચ શ્રુતિર્મોક્ષમવાપ્તવન્તો નૃપા ગૃહસ્થા ઇતિ નૈતદસ્તિ ।
શમપ્રધાનઃ ક્વ ચ મોક્ષધર્મો દણ્ડપ્રધાનઃ ક્વ ચ રાજધર્મઃ ॥ ૯।૪૮
શમે રતિશ્ચેચ્છિથિલં ચ રાજ્યં રાજ્યે મતિશ્ચેચ્છમવિપ્લવશ્ચ ।
શમશ્ચ તૈક્ષ્ણ્યં ચ હિ નોપપન્નં શીતોષ્ણયોરૈક્યમિવોદકાગ્ન્યોઃ ॥ ૯।૪૯
તન્નિશ્ચયાદ્વા વસુધાધિપાસ્તે રાજ્યાનિ મુક્ત્વા શમમાપ્તવન્તઃ ।
રાજ્યાઙ્ગિતા વા નિભૃતેન્દ્રિયત્વાદનૈષ્ઠિકે મોક્ષકૃતાભિમાનાઃ ॥ ૯।૫૦
તેષાં ચ રાજ્યેઽસ્તુ શમો યથાવત્પ્રાપ્તો વનં નાહમનિશ્ચયેન ।
છિત્ત્વા હિ પાશં ગૃહબન્ધુસઞ્જ્ઞં મુક્તઃ પુનર્ન પ્રવિવિક્ષુરસ્મિ ॥ ૯।૫૧
ઇત્યાત્મવિજ્ઞાનગુણાનુરૂપં મુક્તસ્પૃહં હેતુમદૂર્જિતં ચ ।
શ્રુત્વા નરેન્દ્રાત્મજમુક્તવન્તં પ્રત્યુત્તરં મન્ત્રધરોઽપ્યુવાચ ॥ ૯।૪૨ (૯।૫૨)
યો નિશ્ચયો મન્ત્રવરસ્તવાયં નાયં ન યુક્તો ન તુ કાલયુક્તઃ ।
શોકાય હિત્વા પિતરં વયઃસ્થં સ્યાદ્ધર્મકામસ્ય હિ તે ન ધર્મઃ ॥ ૯।૪૩ (૯।૫૩)
નૂનં ચ બુદ્ધિસ્તવ નાતિસૂક્ષ્મા ધર્માર્થકામેષ્વવિચક્ષણા વા ।
હેતોરદૃષ્ટસ્ય ફલસ્ય યસ્ત્વં પ્રત્યક્ષમર્થં પરિભૂય યાસિ ॥ ૯। ૪૪ (૯।૫૪)
પુનર્ભવોઽસ્તીતિ ચ કેચિદાહુર્નાસ્તીતિ કેચિન્નિયતપ્રતિજ્ઞાઃ ।
એવં યદા સંશયિતોઽયમર્થસ્તસ્માત્ ક્ષમં ભોક્તુમુપસ્થિતા શ્રીઃ ॥ ૯।૪૫ (૯।૫૫)
ભૂયઃ પ્રવૃત્તિર્યદિ કાચિદસ્તિ રંસ્યામહે તત્ર યથોપપત્તૌ ।
અથ પ્રવૃત્તિઃ પરતો ન કાચિત્સિદ્ધોઽપ્રયત્નાજ્જગતોઽસ્ય મોક્ષઃ ॥ ૯।૪૬ (૯।૫૬)
અસ્તીતિ કેચિત્પરલોકમાહુર્મોક્ષસ્ય યોગં ન તુ વર્ણયન્તિ ।
અગ્નેર્યથા હ્યુષ્ણમપાં દ્રવત્વં તદ્વત્પ્રવૃત્તૌ પ્રકૃતિં વદન્તિ ॥ ૯।૪૭ (૯।૫૭)
કેચિત્સ્વભાવાદિતિ વર્ણયન્તિ શુભાશુભં ચૈવ ભવાભવૌ ચ ।
સ્વાભાવિકં સર્વમિદં ચ યસ્માદતોઽપિ મોઘો ભવતિ પ્રયત્નઃ ॥ ૯।૪૮ (૯।૫૮)
યદિન્દ્રિયાણાં નિયતઃ પ્રચારઃ પ્રિયાપ્રિયત્વં વિષયેષુ ચૈવ ।
સંયુજ્યતે યજ્જરયાર્તિભિશ્ચ કસ્તત્ર યત્નો નનુ સ સ્વભાવઃ ॥ ૯।૪૯ (૯।૫૯)
અદ્ભિર્હુતાશઃ શમમભ્યુપૈતિ તેજાંસિ ચાપો ગમયન્તિ શોષમ્ ।
ભિન્નાનિ ભૂતાનિ શરીરસંસ્થાન્યૈક્યં ચ દત્ત્વા જગદુદ્વહન્તિ ॥ ૯।૫૦ (૯।૬૦)
યત્પાણિપાદોદરપૃષ્ઠમૂર્ધ્નાં નિર્વર્તતે ગર્ભગતસ્ય ભાવઃ ।
યદાત્મનસ્તસ્ય ચ તેન યોગઃ સ્વાભાવિકં તત્કથયન્તિ તજ્જ્ઞાઃ ॥ ૯।૫૧ (૯।૬૧)

કઃ કણ્ટકસ્ય પ્રકરોતિ તૈક્ષ્ણ્યં વિચિત્રભાવં મૃગપક્ષિણાં વા ।
સ્વભાવતઃ સર્વમિદં પ્રવૃત્તં ન કામકારોઽસ્તિ કુતઃ પ્રયત્નઃ ॥ ૯।૫૨ (૯।૬૨)
સર્ગં વદન્તીશ્વરતસ્તથાન્યે તત્ર પ્રયત્ને પુરુષષ્ય કોઽર્થઃ ।
ય એવ હેતુર્જગતઃ પ્રવૃત્તૌ હેતુર્નિવૃત્તૌ નિયતઃ સ એવ ॥ ૯।૫૩ (૯।૬૩)
કેચિદ્વદન્ત્યાત્મનિમિત્તમેવ પ્રાદુર્ભવં ચૈવ ભવક્ષયં ચ ।
પ્રાદુર્ભવં તુ પ્રવદન્ત્યયત્નાદ્યત્નેન મોક્ષાધિગમં બ્રુવન્તિ ॥ ૯।૫૪ (૯।૬૪)
નરઃ પિતૃણામનૃણઃ પ્રજાભિર્વેદૈરૃષીણાં ક્રતુભિઃ સુરાણામ્ ।
ઉત્પદ્યતે સાર્ધમૃણૈસ્ત્રિભિસ્તૈર્યસ્યાસ્તિ મોક્ષઃ કિલ તસ્ય મોક્ષઃ ॥ ૯।૫૫ (૯।૬૫)
ઇત્યેવમેતેન વિધિક્રમેણ મોક્ષં સયત્નસ્ય વદન્તિ તજ્જ્ઞાઃ ।
પ્રયત્નવન્તોઽપિ હિ વિક્રમેણ મુમુક્ષવઃ ખેદમવાપ્નુવન્તિ ॥ ૯।૫૬ (૯।૬૬)
તત્સૌમ્ય મોક્ષે યદિ ભક્તિરસ્તિ ન્યાયેન સેવસ્વ વિધિં યથોક્તમ્ ।
એવં ભવિષ્યત્યુપપત્તિરસ્ય સન્તાપનાશશ્ચ નરાધિપસ્ય ॥ ૯।૫૭ (૯।૬૭)
યા ચ પ્રવૃત્તા ભવદોષબુદ્ધિસ્તપોવનેભ્યો ભવનં પ્રવેષ્ટુમ્ ।
તત્રાપિ ચિન્તા તવ તાત મા ભૂત્ પૂર્વેઽપિ જગ્મુઃ સ્વગૃહં વનેભ્યઃ ॥ ૯।૫૮ (૯।૬૮)
તપોવનસ્થોઽપિ વૃતઃ પ્રજાભિર્જગામ રાજા પુરમમ્બરીષઃ ।
તથા મહીં વિપ્રકૃતામનાર્યૈસ્તપોવનાદેત્ય રરક્ષ રામઃ ॥ ૯।૫૯ (૯।૬૯)
તથૈવ શાલ્વાધિપતિર્દ્રુમાક્ષો વનાત્સસૂનુઃ સ્વપુરં પ્રવિશ્ય ।
બ્રહ્મર્ષિભૂતશ્ચ મુનેર્વશિષ્ઠાદ્દધ્રે શ્રિયં સાઙ્કૃતિરન્તિદેવઃ ॥ ૯।૬૦ (૯।૭૦)
એવંવિધા ધર્મયશઃપ્રદીપ્તા વનાનિ હિત્વા ભવનાન્યભીયુઃ ।
તસ્માન્ન દોષોઽસ્તિ ગૃહં પ્રવેષ્ટું તપોવનાદ્ધર્મનિમિત્તમેવ ॥ ૯।૬૧ (૯।૭૧)
તતો વચસ્તસ્ય નિશમ્ય મન્ત્રિણઃ પ્રિયં હિતં ચૈવ નૃપસ્ય ચક્ષુષઃ ।
અનૂનમવ્યસ્તમસક્તમદ્રુતં ધૃતૌ સ્થિતો રાજસુતોઽબ્રવીદ્વચઃ ॥ ૯।૬૨ (૯।૭૨)
ઇહાસ્તિ નાસ્તીતિ ય એષ સંશયઃ પરસ્ય વાક્યૈર્ન મમાત્ર નિશ્ચયઃ ।
અવેત્ય તત્ત્વં તપસા શમેન વા સ્વયં ગ્રહીષ્યામિ યદત્ર નિશ્ચિતમ્ ॥ ૯।૬૩ (૯।૭૩)
ન મે ક્ષમં સઙ્ગશતં હિ દર્શનં ગ્રહીતુમવ્યક્તપરં પરાહતમ્ ।
બુધઃ પરપ્રત્યયતો હિ કો વ્રજેજ્જનોઽન્ધકારેઽન્ધ ઇવાન્ધદેશિતઃ ॥ ૯।૬૪ (૯।૭૪)
અદૃષ્ટતત્ત્વસ્ય સતોઽપિ કિં તુ મે શુભાશુભે સંશયિતે શુભે મતિઃ ।
વૃથાપિ ખેદોઽપિ વરં શુભાત્મનઃ સુખં ન તત્ત્વેઽપિ વિગર્હિતાત્મનઃ ॥ ૯।૬૫ (૯।૭૫)
ઇમં તુ દૃષ્ટ્વાગમમવ્યવસ્થિતં યદુક્તમાપ્તૈસ્તદવેહિ સાધ્વિતિ ।
પ્રહીણદોષત્વમવેહિ ચાપ્તતાં પ્રહીણદોષો હ્યનૃતં ન વક્ષ્યતિ ॥ ૯।૬૬ (૯।૭૬)
ગૃહપ્રવેશં પ્રતિ યચ્ચ મે ભવાનુવાચ રામપ્રભૃતીન્ નિદર્શનમ્ ।
ન તે પ્રમાણં ન હિ ધર્મનિશ્ચયેષ્વલં પ્રમાણાય પરિક્ષતવ્રતાઃ ॥ ૯।૬૭ (૯।૭૭)

તદેવમપ્યેવ રવિર્મહીં પતેદપિ સ્થિરત્વં હિમવાન્ ગિરિસ્ત્યજેત્ ।
અદૃષ્ટતત્ત્વો વિષયોન્મુખેન્દ્રિયઃ શ્રયેય ન ત્વેવ ગૃહાન્ પૃથગ્જનઃ ॥ ૯।૬૮ (૯।૭૮)
અહં વિશેયં જ્વલિતં હુતાશનં ન ચાકૃતાર્થઃ પ્રવિશેયમાલયમ્ ।
ઇતિ પ્રતિજ્ઞાં સ ચકાર ગર્વિતો યથેષ્ટમુત્થાય ચ નિર્મમો યયૌ ॥ ૯।૬૯ (૯।૭૯)
તતઃ સવાષ્પૌ સચિવદ્વિજાવુભૌ નિશમ્ય તસ્ય સ્થિરમેવ નિશ્ચયમ્ ।
વિષણ્ણવક્ત્રાવનુગમ્ય દુઃખિતૌ શનૈરગત્યા પુરમેવ જગ્મતુઃ ॥ ૯।૭૦ (૯।૮૦)
તત્સ્નેહાદથ નૃપતેશ્ચ ભક્તિતસ્તૌ સાપેક્ષં પ્રતિયયતુશ્ચ તસ્થતુશ્ચ ।
દુર્ધર્ષં રવિમિવ દીપ્તમાત્મભાસા તં દ્રષ્ટું ન હિ પથિ શેકતુર્ન મોક્તુમ્ ॥ ૯।૭૧ (૯।૮૧)
તૌ જ્ઞાતું પરમગતેર્ગતિં તુ તસ્ય પ્રચ્છન્નાંશ્ચરપુરુષાઞ્શુચીન્ વિધાય ।
રાજાનં પ્રિયસુતલાલસં નુ ગત્વા દ્રક્ષ્યાવઃ કથમિતિ જગ્મતુઃ કથઞ્ચિત્ ॥ ૯।૭૨ (૯।૮૨)
ઇતિ શ્રીબુદ્ધચરિતે મહાકાવ્યે કુમારાન્વેષણો નામ નવમઃ સર્ગઃ ॥ ૯ ॥

---

Book X [શ્રેણ્યાભિગમનો]

સ રાજવત્સઃ પૃથુપીનવક્ષાસ્તૌ હવ્યમન્ત્રાધિકૃતૌ વિહાય ।
ઉત્તીર્ય ગઙ્ગાં પ્રચલત્તરઙ્ગાં શ્રીમદ્ગૃહં રાજગૃહં જગામ ॥ ૧૦।૧
શૈલૈઃ સુગુપ્તં ચ વિભૂષિતં ચ ધૃતં ચ પૂતં ચ શિવૈસ્તપોદૈઃ ।
પઞ્ચાચલાઙ્કં નગરં પ્રપેદે શાન્તઃ સ્વયમ્ભૂરિવ નાકપૃષ્ઠમ્ ॥ ૧૦।૨
ગામ્ભીર્યમોજશ્ચ નિશામ્ય તસ્ય વપુશ્ચ દીપ્તં પુરુષાનતીત્ય ।
વિસિસ્મિયે તત્ર જનસ્તદાનીં સ્થાણુવ્રતસ્યેવ વૃષધ્વજસ્ય ॥ ૧૦।૩
તં પ્રેક્ષ્ય યોઽન્યેન યયૌ સ તસ્થૌ યશ્ચાત્ર તસ્થૌ પથિ સોઽન્વગચ્છત્ ।
દ્રુતં યયૌ યં સદયં સધીરં યઃ કશ્ચિદાસ્તે સ્મ સ ચોત્પપાત ॥ ૧૦।૪
કશ્ચિત્તમાનર્ચ જનઃ કરાભ્યાં સત્કૃત્ય કશ્ચિચ્છિરસા વવન્દે ।
સ્નિગ્ધેન કશ્ચિદ્વચસાભ્યનન્દન્નૈવં જગામાપ્રતિપૂજ્ય કશ્ચિત્ ॥ ૧૦।૫
તં જિહ્રિયુઃ પ્રેક્ષ્ય વિચિત્રવેષાઃ પ્રકીર્ણવાચઃ પથિ મૌનમીયુઃ ।
ધર્મસ્ય સાક્ષાદિવ સન્નિકર્ષાન્ન કશ્ચિદન્યાયમતિર્બભૂવ ॥ ૧૦।૬
અન્યક્રિયાણામપિ રાજમાર્ગે સ્ત્રીણાં નૃણાં વા બહુમાનપૂર્વમ્ ।
તદેવ કલ્પં નરદેવસૂત્રં નિરીક્ષમાણા ન તુ તસ્ય દૃષ્ટિઃ ॥ ૧૦।૭
ભ્રુવૌ લલાટં મુખમીક્ષણં વા વપુઃ કરૌ વા ચરણૌ ગતિં વા ।
યદેવ યસ્તસ્ય દદર્શ તત્ર તદેવ તસ્યાનુબબન્ધ ચક્ષુઃ ॥ ૧૦।૮
દૃષ્ટ્વા શુભોર્ણભ્રુવમાયતાક્ષં જ્વલચ્છરીરં શુભજાલહસ્તમ્ ।
તં ભિક્ષુવેશં ક્ષિતિપાલનાર્હં સઞ્ચુક્ષુભે રાજગૃહસ્ય લક્ષ્મીઃ ॥ ૧૦।૯

શ્રેણ્યોऽથ ભર્તા મગધાજિરસ્ય વાહ્યાદ્વિમાનાદ્વિપુલં જનૌઘમ્ ।
દદર્શ પપ્રચ્છ ચ તસ્ય હેતું તતસ્તમસ્મૈ પુરુષઃ શશંસ ॥ ૧૦।૧૦
જ્ઞાનં પરં વા પૃથિવીશ્રિયં વા વિપ્રૈર્ય ઉક્તોऽધિગમિષ્યતીતિ ।
સ એવ શાક્યાધિપતેસ્તનૂજો નિરીક્ષ્યતે પ્રવ્રજિતો જનેન ॥ ૧૦।૧૧
તતઃ શ્રુતાર્થો મનસા ગતાર્થો રાજા બભાષે પુરુષં તમેવ ।
વિજ્ઞાયતાં ક્વ પ્રતિગચ્છતીતિ તથેત્યથૈનં પુરુષોऽન્વગચ્છત્ ॥ ૧૦।૧૨
અલોલચક્ષુર્યુગમાત્રદર્શી નિવૃત્તવાગ્યન્ત્રિતમન્દગામી ।
ચચાર ભિક્ષાં સ તુ ભિક્ષુવર્યો નિધાય ગાત્રાણિ ચલં ચ ચેતઃ ॥ ૧૦।૧૩
આદાય ભૈક્ષં ચ યથોપપન્નં યયૌ ગિરેઃ પ્રસ્રવણં વિવિક્તમ્ ।
ન્યાયેન તત્રાભ્યવહૃત્ય ચૈનન્મહીધરં પાણ્ડવમારુરોહ ॥ ૧૦।૧૪
તસ્મિન્વને લોધ્રવનોપગૂઢે મયૂરનાદપ્રતિપૂર્ણકુઞ્જે ।
કાષાયવાસાઃ સ બભૌ નૃસૂર્યો યથોદયસ્યોપરિ બાલસૂર્યઃ ॥ ૧૦।૧૫
તત્રૈવમાલોક્ય સ રાજભૃત્યઃ શ્રેણ્યાય રાજ્ઞે કથયાં ચકાર ।
સંશ્રુત્ય રાજા સ ચ બાહુમાન્યાત્તત્ર પ્રતસ્થે નિભૃતાનુયાત્રઃ ॥ ૧૦।૧૬
સ પાણ્ડવં પાણ્ડવતુલ્યવીર્યઃ શૈલોત્તમં શૈલસમાનવર્ષ્મા ।
મૌલીધરઃ સિંહગતિર્નૃસિંહશ્ચલત્સટઃ સિંહ ઇવારુરોહ ॥ ૧૦।૧૭
ચલસ્ય તસ્યોપરિ શૃઙ્ગભૂતં શાન્તેન્દ્રિયં પશ્યતિ બોધિસત્ત્વમ્ ।
પર્યઙ્કમાસ્થાય વિરોચમાનં શશાઙ્કમુદ્યન્તમિવાભ્રકૂટાત્ ॥ ૧૦।૧૮
તં રૂપલક્ષ્મ્યા ચ શમેન ચૈવ ધર્મસ્ય નિર્માણમિવોપદિષ્ટમ્ ।
સવિસ્મયઃ પ્રશ્રયવાન્ નરેન્દ્રઃ સ્વયમ્ભુવં શક્ર ઇવોપતસ્થે ॥ ૧૦।૧૯
તં ન્યાયતો ન્યાયવતાં વરિષ્ઠઃ સમેત્ય પપ્રચ્છ ચ ધાતુસામ્યમ્ ।
સ ચાપ્યવોચત્સદૃશેન સામ્ના નૃપં મનઃસ્વાસ્થ્યમનામયં ચ ॥ ૧૦।૨૦
તતઃ શુચૌ વારણકર્ણનીલે શિલાતલેऽસૌ નિષસાદ રાજા ।
નૃપોપવિશ્યાનુમતશ્ચ તસ્ય ભાવં વિજિજ્ઞાસુરિદં બભાષે ॥ ૧૦।૨૧
પ્રીતિઃ પરા મે ભવતઃ કુલેન ક્રમાગતા ચૈવ પરીક્ષિતા ચ ।
જાતા વિવક્ષા સુત યા યતો મે તસ્માદિદં સ્નેહવચો નિબોધ ॥ ૧૦।૨૨
આદિત્યપૂર્વં વિપુલં કુલં તે નવં વયો દીપ્તમિદં વપુશ્ચ ।
કસ્માદિયં તે મતિરક્રમેણ ભૈક્ષાક એવાભિરતા ન રાજ્યે ॥ ૧૦।૨૩
ગાત્રં હિ તે લોહિતચન્દનાર્હં કાષાયસંશ્લેષમનર્હમેતત્ ।
હસ્તઃ પ્રજાપાલનયોગ્ય એષ ભોક્તું ન ચાર્હઃ પરદત્તમન્નમ્ ॥ ૧૦।૨૪
તત્સૌમ્ય રાજ્યં યદિ પૈતૃકં ત્વં સ્નેહાત્પિતુર્નેચ્છસિ વિક્રમેણ ।
ન ચ ક્ષમં મર્ષયિતું મતિસ્તે ભુક્ત્વાર્ધમસ્મદ્વિષયસ્ય શીઘ્રમ્ ॥ ૧૦।૨૫

એવં હિ ન સ્યાત્સ્વજનાવમર્દઃ કાલક્રમેણાપિ શમશ્રયા શ્રીઃ ।
તસ્માત્કુરુષ્વ પ્રણયં મયિ ત્વં સદ્ભિઃ સહીયા હિ સતાં સમૃદ્ધિઃ ॥ ૧૦।૨૬
અથ ત્વિદાનીં કુલગર્વિતત્વાદસ્માસુ વિશ્રમ્ભગુણો ન તેઽસ્તિ ।
વ્યૂહાન્યનેકાનિ વિગાહ્ય વાણૈર્મયા સહાયેન પરાઞ્જિગીષ ॥ ૧૦।૨૭
તદ્બુદ્ધિમત્રાન્યતરાં વૃણીષ્વ ધર્માર્થકામાન્ વિધિવદ્ભજસ્વ ।
વ્યત્યસ્ય રાગાદિ હ હિ ત્રિવર્ગં પ્રેત્યેહ વિભ્રંશમવાપ્નુવન્તિ ॥ ૧૦।૨૮
યો હ્યર્થધર્મૌ પરિપીડ્ય કામઃ સ્યાદ્ધર્મકામ્યે પરિભૂય ચાર્થઃ ।
કામાર્થયોશ્ચોપરમેણ ધર્મસ્ત્યાજ્યઃ સ કૃત્સ્નો યદિ કાઙ્ક્ષિતાર્થઃ ॥ ૧૦।૨૯
તસ્માત્ત્રિવર્ગસ્ય નિષેવણેન ત્વં રૂપમેતત્સફલં કુરુષ્વ ।
ધર્માર્થકામાધિગમં હ્યનૂનં નૃણામનૂનં પુરુષાર્થમાહુઃ ॥ ૧૦।૩૦
તન્નિષ્ફલૌ નાર્હસિ કર્તુમેતૌ પીનૌ ભુજૌ ચાપવિકર્ષણાર્હૌ ।
માન્ધાતૃવજ્જેતુમિમૌ હિ યોગ્યૌ લોકાનિ હિ ત્રીણિ હિ કિં પુનર્ગામ્ ॥ ૧૦।૩૧
સ્નેહેન ખલ્વેતદહં બ્રવીમિ નૈશ્વર્યરાગેણ ન વિસ્મયેન ।
ઇમં હિ દૃષ્ટ્વા તવ ભિક્ષુવેશં જાતાનુકમ્પોઽસ્મ્યપિ ચાગતાશ્રુઃ ॥ ૧૦।૩૨
તદ્ભુઙ્ક્ષ્વ ભિક્ષાશ્રમકામ કામાઙ્કાલેઽસિ કર્તા પ્રિયધર્મ ધર્મમ્ ।
યાવત્સ્વવંશપ્રતિરૂપરૂપં ન તે જરાભ્યેત્યભિભૂય ભૂયઃ ॥ ૧૦।૩૩
શક્નોતિ જીર્ણઃ ખલુ ધર્મમાપ્તું કામોપભોગેષ્વગતિર્જરાયાઃ ।
અતશ્ચ યૂનઃ કથયન્તિ કામાન્મધ્યસ્ય વિત્તં સ્થવિરસ્ય ધર્મમ્ ॥ ૧૦।૩૪
ધર્મસ્ય ચાર્થસ્ય ચ જીવલોકે પ્રત્યર્થિભૂતાનિ હિ યૌવનાનિ ।
સંરક્ષ્યમાણાન્યપિ દુર્ગ્રહાણિ કામા યતસ્તેન યથા હરન્તિ ॥ ૧૦।૩૫
વયાંસિ જીર્ણાનિ વિમર્શયન્તિ ધીરાણ્યવસ્થાનપરાયણાનિ ।
અલ્પેન યત્નેન શમાત્મકાનિ ભવન્ત્યગત્યેવ ચ લજ્જયા ચ ॥ ૧૦।૩૬
અતશ્ચ લોલં વિષયપ્રધાનં પ્રમત્તમક્ષાન્તમદીર્ઘદર્શિ ।
બહુચ્છલં યૌવનમભ્યતીત્ય નિસ્તીર્ય કાન્તારમિવાશ્વસન્તિ ॥ ૧૦।૩૭
તસ્માદધીરં ચપલપ્રમાદિ નવં વયસ્તાવદિદં વ્યપૈતુ ।
કામસ્ય પૂર્વં હિ વયઃ શરવ્યં ન શક્યતે રક્ષિતુમિન્દ્રિયેભ્યઃ ॥ ૧૦।૩૮
અથૌ ચિકીર્ષા તવ ધર્મ એવ યજસ્વ યજ્ઞં કુલધર્મ એષઃ ।
યજ્ઞૈરધિષ્ઠાય હિ નાકપૃષ્ઠં યયૌ મરુત્વાનપિ નાકપૃષ્ઠમ્ ॥ ૧૦।૩૯
સુવર્ણકેયૂરવિદષ્ટબાહવો મણિપ્રદીપોજ્જ્વલચિત્રમૌલયઃ ।
નૃપર્ષયસ્તાં હિ ગતિં ગતા મખૈઃ શ્રમેણ યામેવ મહાર્ષયો યયુઃ ॥ ૧૦।૪૦
ઇત્યેવં મગધપતિર્[વચો] બભાષે યઃ સમ્યગ્વલભિદિવ ધ્રુવં બભાષે ।
તચ્છ્રુત્વા ન સ વિચચાર રાજસૂનુઃ કૈલાસો ગિરિરિવ નૈકચિત્રસાનુઃ ॥ ૧૦।૪૧

ઇતિ શ્રીબુદ્ધચરિતે મહાકાવ્યેઽશ્વઘોષકૃતે શ્રેણ્યાભિગમનો નામ દશમઃ સર્ગઃ ॥ ૧૦ ॥

Book XI [કામવિગર્હણો]
અથૈવમુક્તો મગધાધિપેન સુહૃન્મુખેન પ્રતિકૂલમર્થમ્ ।
સ્વસ્થોઽવિકારઃ કુલશૌચશુદ્ધઃ શૌદ્ધોદનિર્વાક્યમિદં જગાદ ॥ ૧૧।૧
નાશ્ચર્યમેતદ્ભવતોઽભિધાતું જાતસ્ય હર્યઙ્કુલે વિશાલે ।
યન્મિત્રપક્ષે તવ મિત્રકામ સ્યાદ્વૃત્તિરેષા પરિશુદ્ધવૃત્તેઃ ॥ ૧૧।૨
અસત્સુ મૈત્રી સ્વકુલાનુરૂપા ન તિષ્ઠતિ શ્રીરિવ વિક્લવેષુ ।
પૂર્વૈઃ કૃતાં પ્રીતિપરમ્પરાભિસ્તામેવ સન્તસ્તુ વિવર્ધયન્તિ ॥ ૧૧।૩
યે ચાર્થકૃચ્છ્રેષુ ભવન્તિ લોકે સમાનકાર્યાઃ સુહૃદાં મનુષ્યાઃ ।
મિત્રાણિ તાનીતિ પરૈમિ બુદ્ધ્યા સ્વસ્થસ્ય વૃદ્ધિષ્વિહ કો હિ ન સ્યાત્ ॥ ૧૧।૪
એવં ચ યે દ્રવ્યમવાપ્ય લોકે મિત્રેષુ ધર્મે ચ નિયોજયન્તિ ।
અવાપ્તસારાણિ ધનાનિ તેષાં ભ્રષ્ટાનિ નાન્તે જનયન્તિ તાપમ્ ॥ ૧૧।૫
સુહૃત્તયા ચાર્યતયા ચ રાજન્ વિભાવ્ય મામેવ વિનિશ્ચયસ્તે ।
અત્રાનુનેષ્યામિ સુહૃત્તયૈવ બ્રૂયામહં નોત્તરમન્યદત્ર ॥ ૧૧।૬
અહં જરામૃત્યુભયં વિદિત્વા મુમુક્ષયા ધર્મમિમં પ્રપન્નઃ ।
બન્ધૂન્પ્રિયાનશ્રુમુખાન્ વિહાય પ્રાગેવ કામાનશુભસ્ય હેતૂન્ ॥ ૧૧।૭
નાશીવિષેભ્યોઽપિ તથા બિભેમિ નૈવાશનિભ્યો ગગનાચ્ચ્યુતેભ્યઃ ।
ન પાવકેભ્યોઽનિલસંહિતેભ્યો યથા ભયં મે વિષયેભ્ય એભ્યઃ ॥ ૧૧।૮
કામા હ્યનિત્યાઃ કુશલાર્થચૌરા રિક્તાશ્ચ માયાસદૃશાશ્ચ લોકે ।
આશાસ્યમાના અપિ મોહયન્તિ ચિત્તં નૃણાં કિં પુનરાત્મસંસ્થાઃ ॥ ૧૧।૯
કામાભિભૂતા હિ ન યાન્તિ શર્મ ત્રિપિષ્ટપે કિં વત મર્ત્યલોકે ।
કામૈઃ સતૃષ્ણસ્ય હિ નાસ્તિ તૃપ્તિર્યથેન્ધનૈર્વાતસખસ્ય વહ્નેઃ ॥ ૧૧।૧૦
જગત્યનર્થો ન સમોઽસ્તિ કામૈર્મોહાચ્ચ તેષ્વેવ જનઃ પ્રસક્તઃ ।
તત્ત્વં વિદિત્વૈવમનર્થભીરુઃ પ્રાજ્ઞઃ સ્વયં કોઽભિલષેદનર્થમ્ ॥ ૧૧।૧૧
સમુદ્રવસ્ત્રામપિ ગામવાપ્ય પારં જિગીષન્તિ મહાર્ણવસ્ય ।
લોકસ્ય કામૈર્ન વિતૃપ્તિરસ્તિ પતદ્ભિરમ્ભોભિરિવાર્ણવસ્ય ॥ ૧૧।૧૨
દેવેન વૃષ્ટેઽપિ હિરણ્યવર્ષે દ્વીપાન્સમુદ્રાંશ્ચતુરોઽપિ જિત્વા ।
શક્રસ્ય ચાર્ધાસનમપ્યવાપ્ય માન્ધાતુરાસીદ્વિષયેષ્વતૃપ્તિઃ ॥ ૧૧।૧૩
ભુક્ત્વાપિ રાજ્યં દિવિ દેવતાનાં શતક્રતૌ વૃત્રભયાત્પ્રનષ્ટે ।
દર્પાન્મહર્ષીનપિ વાહયિત્વા કામેષ્વતૃપ્તો નહુષઃ પપાત ॥ ૧૧।૧૪

ઐડશ્ચ રાજા ત્રિદિવં વિગાહ્ય નીત્વાપિ દેવીં વશમુર્વશીં તામ્ ।
લોભાદૃષિભ્યઃ કનકં જિહીર્ષુર્જગામ નાશં વિષયેષ્વતૃપ્તઃ ॥ ૧૧।૧૫
બલેર્મહેન્દ્રં નહુષં મહેન્દ્રાદિન્દ્રં પુનર્યે નહુષાદુપેયુઃ ।
સ્વર્ગે ક્ષિતૌ વા વિષયેષુ તેષુ કો વિશ્વસેદ્ભાગ્યકુલાકુલેષુ ॥ ૧૧।૧૬
ચીરામ્બરા મૂલફલાંબુભક્ષા જટા વહન્તોઽપિ ભુજઙ્ગદીર્ઘાઃ ।
યૈરન્યકાર્યા મુનયોઽપિ ભગ્નાઃ કઃ કામસઞ્જ્ઞાન્ મૃગયેત શત્રૂન્ ॥ ૧૧।૧૭
ઉગ્રાયુધશ્ચોગ્રધૃતાયુધોઽપિ યેષાં કૃતે મૃત્યુમવાપ ભીષ્માત્ ।
ચિન્તાપિ તેષામશિવા વધાય તદ્વૃત્તિનાં કિં પુનરવ્રતાનામ્ ॥ ૧૧।૧૮
આસ્વાદમલ્પં વિષયેષુ મત્વા સંયોજનોત્કર્ષમતૃપ્તિમેવ ।
સદ્ભ્યશ્ચ ગર્હાં નિયતં ચ પાપં કઃ કામસઞ્જ્ઞં વિષમાસસાદ ॥ ૧૧।૧૯
કૃષ્યાદિભિર્ધર્મભિરન્વિતાનાં કામાત્મકાનાં ચ નિશમ્ય દુઃખમ્ ।
સ્વાસ્થ્યં ચ કામેષ્વકુતૂહલાનાં કામાન્ વિહાતું ક્ષમમાત્મવદ્ભિઃ ॥ ૧૧।૨૦
જ્ઞેયા વિપત્કામિનિ કામસમ્પત્સિદ્ધેષુ કામેષુ મદં હ્યુપૈતિ ।
મદાદકાર્યં કુરુતે ન કાર્યં યેન ક્ષતો દુર્ગતિમભ્યુપૈતિ ॥ ૧૧।૨૧
યત્નેન લબ્ધાઃ પરિરક્ષિતાશ્ચ યે વિપ્રલભ્ય પ્રતિયાન્તિ ભૂયઃ ।
તેષ્વાત્મવાન્ યાચિતકોપમેષુ કામેષુ વિદ્વાનિહ કો રમેત ॥ ૧૧।૨૨
અન્વિષ્ય ચાદાય ચ જાતતર્ષા યાનત્યજન્તઃ પરિયાન્તિ દુઃખમ્ ।
લોકે તૃણોલ્કાસદૃશેષુ તેષુ કામેષુ કસ્યાત્મવતો રતિઃ સ્યાત્ ॥ ૧૧।૨૩
અનાત્મવન્તો હૃદિ યૈર્વિદષ્ટા વિનાશમર્છન્તિ ન યાન્તિ શર્મ ।
ક્રુદ્ધોગ્રસર્પપ્રતિમેષુ તેષુ કામેષુ કસ્યાત્મવતો રતિઃ સ્યાત્ ॥ ૧૧।૨૪
અસ્થિ ક્ષુધાર્ત્તા ઇવ સારમેયા ભુક્ત્વાપિ યાન્નૈવ ભવન્તિ તૃપ્તાઃ ।
જીર્ણાસ્થિકઙ્કાલસમેષુ તેષુ કામેષુ કસ્યાત્મવતો રતિઃ સ્યાત્ ॥ ૧૧।૨૫
યે રાજચૌરોદકપાવકેભ્યઃ સાધારણત્વાજ્જનયન્તિ દુઃખમ્ ।
તેષુ પ્રવિદ્ધામિષસન્નિભેષુ કામેષુ કસ્યાત્મવતો રતિઃ સ્યાત્ ॥ ૧૧।૨૬
યત્ર સ્થિતાનામભિતો વિપત્તિઃ શત્રોઃ સકાશાદપિ બાન્ધવેભ્યઃ ।
હિંસ્રેષુ તેષ્વાયતનોપમેષુ કામેષુ કસ્યાત્મવતો રતિઃ સ્યાત્ ॥ ૧૧।૨૭
ગિરૌ વને ચાપ્સુ ચ સાગરે ચ યદ્ભ્રંશમર્ચ્છન્ત્યભિલઙ્ઘમાનાઃ ।
તેષુ દ્રુમપ્રાગ્રફલોપમેષુ કામેષુ કસ્યાત્મવતો રતિઃ સ્યાત્ ॥ ૧૧।૨૮
તીર્થૈઃ પ્રયત્નૈર્વિવિધૈરવાપ્તાઃ ક્ષણેન યે નાશમિહ પ્રયાન્તિ ॥ ૧૧।૨૯
સ્વપ્નોપભોગપ્રતિમેષુ તેષુ કામેષુ કસ્યાત્મવતો રતિઃ સ્યાત્ ।
યાનર્ચયિત્વાપિ ન યાન્તિ શર્મ વિવર્ધયિત્વા પરિપાલયિત્વા ।
અઙ્ગારકર્ષપ્રતિમેષુ તેષુ કામેષુ કસ્યાત્મવતો રતિઃ સ્યાત્ ॥ ૧૧।૩૦

વિનાશમીયુઃ કુરવો યદર્થં વૃષ્ણ્યન્ધકા મૈથિલદણ્ડકાશ્ચ ।
શૂલાસિકાષ્ઠપ્રતિમેષુ તેષુ કામેષુ કસ્યાત્મવતો રતિઃ સ્યાત્ ॥ ૧૧।૩૧
સુન્દોપસુન્દાવસુરૌ યદર્થમન્યોન્યવૈરપ્રસૃતૌ વિનષ્ટૌ ।
સૌહાર્દવિશ્લેષકરેષુ તેષુ કામેષુ કસ્યાત્મવતો રતિઃ સ્યાત્ ॥ ૧૧।૩૨
કામાન્ધસઙ્જ્ઞાઃ કૃપયા વ કે ચ ક્રવ્યાત્સુ નાત્માનમિહોત્સૃજન્તિ ।
સપત્નભૂતેષ્વશિવેષુ તેષુ કામેષુ કસ્યાત્મવતો રતિઃ સ્યાત્ ॥ ૧૧।૩૩
કામાન્ધસઙ્જ્ઞઃ કૃપણં કરોતિ પ્રાપ્નોતિ દુઃખં વધબન્ધનાદિ ।
કામાર્થમાશાકૃપણસ્તપસ્વી મૃત્યુશ્રમં ચાર્હતિ જીવલોકે ॥ ૧૧।૩૪
ગીતૈર્હ્રિયન્તે હિ મૃગા વધાય રૂપાર્થમગ્નૌ શલભાઃ પતન્તિ ।
મત્સ્યો ગિરત્યાયસમામિષાર્થી તસ્માદનર્થં વિષયાઃ ફલન્તિ ॥ ૧૧।૩૫
કામાસ્તુ ભોગા ઇતિ યન્મતં સ્યાદ્ભોગ્યા ન કેચિત્પરિગણ્યમાનાઃ ।
વસ્ત્રાદયો દ્રવ્યગુણા હિ લોકે દુઃખપ્રતીકાર ઇતિ પ્રધાર્યાઃ ॥ ૧૧।૩૬
ઇષ્ટં હિ તર્ષપ્રશમાય તોયં ક્ષુન્નાશહેતોરશનં તથૈવ ।
વાતાતપામ્બ્વાવરણાય વેશ્મ કૌપીનશીતાવરણાય વાસઃ ॥ ૧૧।૩૭
નિદ્રાવિઘાતાય તથૈવ શય્યા યાનં તથાધ્વશ્રમનાશનાય ।
તથાસનં સ્થાનવિનોદનાય સ્નાનં મૃજારોગ્યબલાશ્રયાય ॥ ૧૧।૩૮
દુઃખપ્રતીકારનિમિત્તભૂતાસ્તસ્માત્પ્રજાનાં વિષયા ન ભોગ્યાઃ ।
અશ્નામિ ભોગાનિતિ કોઽભ્યુપેયાત્પ્રાજ્ઞઃ પ્રતીકારવિધૌ પ્રવૃત્તાન્ ॥ ૧૧।૩૯
યઃ પિત્તદાહેન વિદહ્યમાનઃ શીતક્રિયાં ભોગ ઇતિ વ્યવસ્યેત્ ।
દુઃખપ્રતીકારવિધૌ પ્રવૃત્તઃ કામેષુ કુર્યાત્સ હિ ભોગસઙ્જ્ઞામ્ ॥ ૧૧।૪૦
કામેષ્વનૈકાન્તિકતા ચ યસ્માદતોઽપિ મે તેષુ ન ભોગસઙ્જ્ઞા ।
ય એવ ભાવા હિ સુખં દિશન્તિ ત એવ દુઃખં પુનરાવહન્તિ ॥ ૧૧।૪૧
ગુરૂણિ વાસાંસ્યગુરૂણિ ચૈવ સુખાય શીતે હ્યસુખાય ઘર્મે ।
ચન્દ્રાંશવશ્ચન્દનમેવ ચોષ્ણે સુખાય દુઃખાય ભવન્તિ શીતે ॥ ૧૧।૪૨
દ્વન્દ્વાનિ સર્વસ્ય યતઃ પ્રસક્તાન્યલાભલાભપ્રભૃતીનિ લોકે ।
અતોઽપિ નૈકાન્તસુખોઽસ્તિ કશ્ચિન્નૈકાન્તદુઃખઃ પુરુષઃ પ્રિઠવ્યામ્ ॥ ૧૧।૪૩
દૃષ્ટ્વા ચ મિશ્રાં સુખદુઃકતાં મે રાજ્યં ચ દાસ્યં ચ મતં સમાનમ્ ।
નિત્યં હસત્યેવ હિ નૈવ રાજા ન ચાપિ સન્તપ્યત એવ દાસઃ ॥ ૧૧।૪૪
આજ્ઞા નૃપત્વેઽભ્યધિકેતિ યસ્માત્મહાન્તિ દુઃખાન્યત એવ રાજ્ઞઃ ।
આસઙ્ગકાષ્ઠપ્રતિમો હિ રાજા લોકસ્ય હેતોઃ પરિખેદમેતિ ॥ ૧૧।૪૫
રાજ્યે નૃપસ્ત્યાગિનિ વહુમિત્રે વિશ્વાસમાગચ્છતિ ચેદ્વિપન્નઃ ।
અથાપિ વિશ્રમ્ભમુપૈતિ નેહ કિં નામ સૌખ્યં ચકિતસ્ય રાજ્ઞઃ ॥ ૧૧।૪૬

યદા ચ જિત્વાપિ મહીં સમગ્રાં વાસાય દૃષ્ટં પુરમેકમેવ ।
તત્રાપિ ચૈકં ભવનં નિષેવ્યં શ્રમઃ પરાર્થે નનુ રાજભાવઃ ॥ ૧૧।૪૭
રાજ્યોઽપિ વાસે યુગમેકમેવ ક્ષુત્સન્નિરોધાય તથાન્નમાત્રા ।
શય્યા તથૈકાસનમેકમેવ શેષા વિશેષા નૃપતેર્મદાય ॥ ૧૧।૪૮
તુષ્ટ્યર્થમેતચ્ચ ફલં યદીષ્ટમૃતેઽપિ રાજ્યાન્મમ તુષ્ટિરસ્તિ ।
તુષ્ટૌ ચ સત્યાં પુરુષસ્ય લોકે સર્વે વિશેષા નનુ નિર્વિશેષાઃ ॥ ૧૧।૪૯
તન્નાસ્તિ કામાન્ પ્રતિ સમ્પ્રતાર્યઃ ક્ષેમે શિવં માર્ગમનુપ્રપન્નઃ ।
સ્મૃત્વા સુહૃત્ત્વં તુ પુનઃ પુનર્માં બ્રૂહિ પ્રતિજ્ઞાં ખલુ પાલયન્તિ ॥ ૧૧।૫૦
ન હ્યસ્મ્યમર્ષેણ વનપ્રવિષ્ટો ન શત્રુબાણૈરવધૂતમૌલિઃ ।
કૃતસ્પૃહો નાપિ ફલાધિકેભ્યો ગૃહ્ણામિ નૈતદ્વચનં યતસ્તે ॥ ૧૧।૫૧
યો દન્દશૂકં કુપિતં ભુજઙ્ગં મુક્ત્વા વ્યવસ્યેદ્ધિ પુનર્ગ્રહીતુમ્ ।
દાહાત્મિકાં વા જ્વલિતાં તૃણોલ્કાં સન્ત્યજ્ય કામાન્સ પુનર્ભજેત ॥ ૧૧।૫૨
અન્ધાય યશ્ચ સ્પૃહયેદનન્ધો બદ્ધાય મુક્તો વિધનાય વાઢ્યઃ ।
ઉન્મત્તચિત્તાય ચ કલ્યચિત્તઃ સ્પૃહાં સ કુર્યાદ્વિષયાત્મકાય ॥ ૧૧।૫૩
ભિક્ષોપભોગી વર નાનુકમ્પ્યઃ કૃતી જરામૃત્યુભયં તિતીર્ષુઃ ।
ઇહોત્તમં શાન્તિસુખં ચ યસ્ય પરત્ર દુઃખાનિ ચ સંવૃતાનિ ॥ ૧૧।૫૪
લક્ષ્મ્યાં મહત્યામપિ વર્તમાનસ્તૃષ્ણાભિભૂતસ્ત્વનુકમ્પિતવ્યઃ ।
પ્રાપ્નોતિ યઃ શાન્તિસુખં ન ચેહ પરત્ર દુઃખં પ્રતિગૃહ્યતે ચ ॥ ૧૧।૫૫
એવં તુ વક્તું ભવતોઽનુરૂપં સત્ત્વસ્ય વૃત્તસ્ય કુલસ્ય ચૈવ ।
મમાપિ વોઢું સદૃશં પ્રતિજ્ઞાં સત્ત્વસ્ય વૃત્તસ્ય કુલસ્ય ચૈવ ॥ ૧૧।૫૬
અહં હિ સંસારરસેન વિદ્ધો વિનિઃસૃતઃ શાન્તમવાપ્તુકામઃ ।
નેચ્છેયમાપ્તું ત્રિદિવેઽપિ રાજ્યં નિરામયં કિં વત માનુષેષુ ॥ ૧૧।૫૭
ત્રિવર્ગસેવાં નૃપ યત્તુ કૃત્સ્નતઃ પરો મનુષ્યાર્થ ઇતિ ત્વમાત્થ મામ્ ।
અનર્થ ઇત્યાત્થ મમાર્થદર્શનં ક્ષયી ત્રિવર્ગો હિ ન ચાપિ તર્પકઃ ॥ ૧૧।૫૮
પદે તુ યસ્મિન્ન જરા ન ભીરુતા ન જન્મ નૈવોપરમો ન વાધયઃ ।
તમેવ મન્યે પુરુષાર્થમુત્તમં ન વિદ્યતે યત્ર પુનઃ પુનઃ ક્રિયા ॥ ૧૧।૫૯
યદપ્યવોચઃ પરિપાલ્યતાં જરા નવં વયો ગચ્છતિ વિક્રિયામિતિ ।
અનિશ્ચયોઽયં ચપલં હિ દૃશ્યતે જરાપ્યધીરા ધૃતિમચ્ચ યૌવનમ્ ॥ ૧૧।૬૦
સ્વકર્મદક્ષશ્ચ યદા તુ કો જગદ્વયઃસુ સર્વેષુ ચ સંવિકર્ષતિ ।
વિનાશકાલે કથમવ્યવસ્થિતે જરા પ્રતીક્ષ્યા વિદુષા શમેપ્સુના ॥ ૧૧।૬૧
જરાયુધો વ્યાધિવિકીર્ણસાયકો યદાન્તકો વ્યાધ ઇવાશ્રિતઃ સ્થિતઃ ।
પ્રજામૃગાન્ ભાગ્યવનાશ્રિતાંસ્તુદન્ વયઃપ્રકર્ષં પ્રતિ કો મનોરથઃ ॥ ૧૧।૬૨

સુતો યુવા વા સ્થવિરોऽથવા શિશુસ્તથા ત્વરાવાનિહ કર્તુમર્હતિ ।
યથા ભવેદ્ધર્મવતઃ કૃપાત્મનઃ પ્રવૃત્તિરિષ્ટા વિનિવૃત્તિરેવ વા ॥ ૧૧।૬૩
યદાત્થ વા દીપ્તફલાં કુલોચિતાં કુરુષ્વ ધર્માય મખક્રિયામિતિ ।
નમો મખેભ્યો ન હિ કામયે સુખં પરસ્ય દુઃખક્રિયયાપદિશ્યતે ॥ ૧૧।૬૪
પરં હિ હન્તું વિવશં ફલેપ્સયા ન યુક્તરૂપં કરુણાત્મનઃ સતઃ ।
ક્રતોઃ ફલં યદ્યપિ શાશ્વતં ભવેત્ તથાપિ કૃત્વા કિમુપક્ષયાત્મકમ્ ॥ ૧૧।૬૫
ભવેચ્ચ ધર્મો યદિ નાપરો વિધિર્વ્રતેન શીલેન મનઃશમેન વા ।
તથાપિ નૈવાર્હતિ સેવિતું ક્રતું વિશસ્ય યસ્મિન્ પરમુચ્યતે ફલમ્ ॥ ૧૧।૬૬
ઇહાપિ તાવત્પુરુષસ્ય તિષ્ઠતઃ પ્રવર્તતે યત્પરહિંસયા સુખમ્ ।
તદપ્યનિષ્ટં સઘૃણસ્ય ધીમતો ભવાન્તરે કિં વત યન્ન દૃશ્યતે ॥ ૧૧।૬૭
ન ચ પ્રતાર્યોऽસ્મિ ફલપ્રવૃત્તયે ભવેષુ રાજન્ રમતે ન મે મનઃ ।
લતા ઇવામ્ભોધરવૃષ્ટિતાડિતાઃ પ્રવૃત્તયઃ સર્વગતા હિ ચઞ્ચલા ॥ ૧૧।૬૮
ઇહાગતશ્ચાહમિતો દિદૃક્ષયા મુનેરરાડસ્ય વિમોક્ષવાદિનઃ ।
પ્રયામિ ચાદ્યૈવ નૃપાસ્તુ તે શિવં વચઃ ક્ષમેથાઃ શમતત્ત્વનિષ્ઠુરમ્ ॥ ૧૧।૬૯
અથેન્દ્રવદ્દિવ્યવ શશ્વદર્કવદ્ગુણૈરવ શ્રેય ઇહાવ ગામવ ।
અવાયુરાર્યૈરવ સત્સુતાન્ અવ શ્રિયશ્ચ રાજન્નવ ધર્મમાત્મનઃ ॥ ૧૧।૭૦
હિમારિકેતૂદ્ભવસમ્પ્લવાન્તરે યથા દ્વિજો યાતિ વિમોક્ષયંસ્તનુમ્ ।
હિમારિશત્રું ક્ષયશત્રુઘાતિનસ્તથાન્તરે યાહિ વિમોચયન્મનઃ ॥ ૧૧।૭૧
નૃપોऽબ્રવીત્સાઞ્જલિરાગતસ્પૃહો યથેષ્ટમાપ્નોતિ ભવાનવિઘ્નતઃ ।
અવાપ્ય કાલે કૃતકૃત્યતામિમાં મમાપિ કાર્યો ભવતા ત્વનુગ્રહઃ ॥ ૧૧।૭૨
સ્થિરં પ્રતિજ્ઞાય તથેતિ પાર્થિવે તતઃ સ વૈશ્વન્તરમાશ્રમં યયૌ ।
પરિવ્રજન્તં સમુદીક્ષ્ય વિસ્મિતો નૃપોऽપિ ચ પ્રાપુરિમં ગિરિં વ્રજન્ ॥ ૧૧।૭૩
ઇતિ શ્રીબુદ્ધચરિતે મહાકાવ્યેऽશ્વઘોષકૃતે કામવિગર્હણો નામૈકાદશઃ સર્ગઃ ॥ ૧૧ ॥

Book XII [અરાડદર્શનો]
તતઃ શમવિહારસ્ય મુનેરિક્ષ્વાકુચન્દ્રમાઃ ।
અરાડસ્યાશ્રમં ભેજે વપુષા પૂરયન્નિવ ॥ ૧૨।૧
સ કાલામસગોત્રેણ તેનાલોક્યૈવ દૂરતઃ ।
ઉચ્ચૈઃ સ્વાગતમિત્યુક્તઃ સમીપમુપજગ્મિવાન્ ॥ ૧૨।૨
તાવુભૌ ન્યાયતઃ પૃષ્ટ્વા ધાતુસામ્યં પરસ્પરમ્ ।
દારવ્યોર્મેધ્યયોર્વૃષ્યોઃ શુચૌ દેશે નિષીદતુઃ ॥ ૧૨।૩

તમાસીનં નૃપસુતં સોઽબ્રવીન્મુનિસત્તમઃ ।
બહુમાનવિશાલાભ્યાં દર્શનાભ્યાં પિબન્નિવ ॥ ૧૨।૪
વિદિતં મે યથા સૌમ્ય નિષ્ક્રાન્તો ભવનાદસિ ।
છિત્ત્વા સ્નેહમયં પાશં પાશં દૃપ્ત ઇવ દ્વિપઃ ॥ ૧૨।૫
સર્વથા ધૃતિમચ્ચૈવ પ્રાજ્ઞં ચૈવ મનસ્તવ ।
યસ્ત્વં પ્રાપ્તઃ શ્રિયં ત્યક્ત્વા લતાં વિષફલામિવ ॥ ૧૨।૬
નાશ્ચર્યં જીર્ણવયસો યજ્જગ્મુઃ પાર્થિવા વનમ્ ।
અપત્યેભ્યઃ શ્રિયં દત્ત્વા ભુક્તોચ્છિષ્ટામિવ સ્રજમ્ ॥ ૧૨।૭
ઇદં મે મતમાશ્ચર્યં નવે વયસિ યદ્ભવાન્ ।
અભુક્ત્વૈવ શ્રિયં પ્રાપ્તઃ સ્થિતો વિષયગોચરે ॥ ૧૨।૮
તદ્વિજ્ઞાતુમિમં ધર્મં પરમં ભાજનં ભવાન્ ।
જ્ઞાનપૂર્વમધિષ્ઠાય શીઘ્રં દુઃખાર્ણવં તર ॥ ૧૨।૯
શિષ્યે યદ્યપિ વિજ્ઞાતે શાસ્ત્રં કાલેન વર્તતે ।
ગામ્ભીર્યાદ્વ્યવસાયાચ્ચ સુપરીક્ષ્યો ભવાન્ મમ ॥ ૧૨।૧૦
ઇતિ વાક્યમરાડસ્ય વિજ્ઞાય સ નરાધિપઃ ।
બભૂવ પરમપ્રીતઃ પ્રોવાચોત્તરમેવ ચ ॥ ૧૨।૧૧
વિરક્તસ્યાપિ યદિદં સૌમુખ્યં ભવતઃ પરમ્ ।
અકૃતાર્થોઽપ્યનેનાસ્મિ કૃતાર્થ ઇવ સમ્પ્રતિ ॥ ૧૨।૧૨
દિદૃક્ષુરિવ હિ જ્યોતિર્યિયાસુરિવ દૈશિકમ્ ।
ત્વદ્દર્શનાદહં મન્યે તિતીર્ષુરિવ ચ પ્લવમ્ ॥ ૧૨।૧૩
તસ્માદર્હસિ તદ્વક્તું વક્તવ્યં યદિ મન્યસે ।
જરામરણરોગેભ્યો યથાયં પરિમુચ્યતે ॥ ૧૨।૧૪
ઇત્યરાડઃ કુમારસ્ય માહાત્મ્યાદેવ ચોદિતઃ ।
સઙ્ક્ષિપ્તં કથયાં ચક્રે સ્વસ્ય શાસ્ત્રસ્ય નિશ્ચયમ્ ॥ ૧૨।૧૫
શ્રૂયતામયમસ્માકં સિદ્ધાન્તઃ શ‌ૃણ્વતાં વર ।
યથા ભવતિ સંસારો યથા વૈ પરિવર્તતે ॥ ૧૨।૧૬
પ્રકૃતિશ્ચ વિકારશ્ચ જન્મ મૃત્યુર્જરૈવ ચ ।
તત્તાવત્સત્ત્વમિત્યુક્તં સ્થિરસત્ત્વ પરેહિ નઃ ॥ ૧૨।૧૭
તત્ર તુ પ્રકૃતિર્નામ વિદ્ધિ પ્રકૃતિકોવિદ ।
પઞ્ચ ભૂતાન્યહઙ્કારં બુદ્ધિમવ્યક્તમેવ ચ ॥ ૧૨।૧૮
વિકાર ઇતિ બુદ્ધિં તુ વિષયાનિન્દ્રિયાણિ ચ ।
પાણિપાદં ચ વાદં ચ પાયૂપસ્થં તથા મનઃ ॥ ૧૨।૧૯

અસ્ય ક્ષેત્રસ્ય વિજ્ઞાનાત્ ક્ષેત્રજ્ઞ ઇતિ સઞ્જ્ઞિ ચ ।
ક્ષેત્રજ્ઞ ઇતિ ચાત્માનં કથયન્ત્યાત્મચિન્તકાઃ ॥ ૧૨।૨૦
સશિષ્યઃ કપિલશ્ચેહ પ્રતિબુદ્ધ ઇતિ સ્મૃતિઃ ।
સપુત્રઃ પ્રતિબુદ્ધશ્ચ પ્રજાપતિરિહોચ્યતે ॥ ૧૨।૨૧
જાયતે જીર્યતે ચૈવ બુધ્યતે મ્રિયતે ચ યત્ ।
તદ્વ્યક્તમિતિ વિજ્ઞેયમવ્યક્તં તુ વિપર્યયાત્ ॥ ૧૨।૨૨
અજ્ઞાનં કર્મ તૃષ્ણા ચ જ્ઞેયાઃ સંસારહેતવઃ ।
સ્થિતોઽસ્મિંસ્ત્રિતયે યસ્તુ તત્સત્ત્વં નાભિવર્તતે ॥ ૧૨।૨૩
વિપ્રત્યયાદહઙ્કારાત્સન્દેહાદભિસમ્પ્લવાત્ ।
અવિશેષાનુપાયાભ્યાં સઙ્ગાદભ્યવપાતતઃ ॥ ૧૨।૨૪
તત્ર વિપ્રત્યયો નામ વિપરીતં પ્રવર્તતે ।
અન્યથા કુરુતે કાર્યં મન્તવ્યં મન્યતેઽન્યથા ॥ ૧૨।૨૫
બ્રવીમ્યહમહં વેદ્મિ ગચ્છામ્યહમહં સ્થિતઃ ।
ઇતીહૈવમહઙ્કારસ્ત્વનહઙ્કાર વર્તતે ॥ ૧૨।૨૬
યસ્તુ ભાવેન સન્દિગ્ધાનેકીભાવેન પશ્યતિ ।
મૃત્પિણ્ડવદસન્દેહ સન્દેહઃ સ ઇહોચ્યતે ॥ ૧૨।૨૭
ય એવાહં સ એવેદં મનો બુદ્ધિશ્ચ કર્મ ચ ।
યશ્ચૈવં સ ગણઃ સોઽહમિતિ યઃ સોઽભિસમ્પ્લવઃ ॥ ૧૨।૨૮
અવિશેષં વિશેષજ્ઞ પ્રતિબુદ્ધાપ્રબુદ્ધયોઃ ।
પ્રકૃતીનાં ચ યો વેદ સોઽવિશેષ ઇતિ સ્મૃતઃ ॥ ૧૨।૨૯
નમસ્કારવષટ્કારૌ પ્રોક્ષણાભ્યુક્ષણાદયઃ ।
અનુપાય ઇતિ પ્રાજ્ઞૈરુપાયજ્ઞ પ્રવેદિતઃ ॥ ૧૨।૩૦
સજ્જતે યેન દુર્મેધા મનોવાક્કર્મબુદ્ધિભિઃ ।
વિષયેષ્વનભિષ્વઙ્ગ સોઽભિષ્વઙ્ગ ઇતિ સ્મૃતઃ ॥ ૧૨।૩૧
મમેદમહમસ્યેતિ યદ્દુઃખમભિમન્યતે ।
વિજ્ઞેયોઽભ્યવપાતઃ સ સંસારે યેન પાત્યતે ॥ ૧૨।૩૨
ઇત્યવિદ્યા હિ વિદ્વાંસઃ પઞ્ચપર્વા સમીહતે ।
તમો મોહં મહામોહં તામિસ્રદ્વયમેવ ચ ॥ ૧૨।૩૩
તત્રાલસ્યં તમો વિદ્ધિ મોહં મૃત્યું ચ જન્મ ચ ।
મહામોહસ્ત્વસમ્મોહ કામ ઇત્યવગમ્યતામ્ ॥ ૧૨।૩૪
યસ્માદત્ર ચ ભૂતાનિ પ્રમુહ્યન્તિ મહાન્ત્યપિ ।
તસ્માદેષ મહાબાહો મહામોહ ઇતિ સ્મૃતઃ ॥ ૧૨।૩૫

તામિસ્રમિતિ ચાક્રોધ ક્રોધમેવાધિકુર્વતે ।
વિષાદં ચાન્ધતામિસ્રમવિષાદ પ્રચક્ષતે ॥ ૧૨।૩૬
અનયાવિદ્યયા બાલઃ સંયુક્તઃ પઞ્ચપર્વયા ।
સંસારે દુઃખભૂયિષ્ઠે જન્મસ્વભિનિષિચ્યતે ॥ ૧૨।૩૭
દ્રષ્ટા શ્રોતા ચ મન્તા ચ કાર્યં કરણમેવ ચ ।
અહમિત્યેવમાગમ્ય સંસારે પરિવર્તતે ॥ ૧૨।૩૮
ઇત્યેભિર્હેતુભિર્ધીમન્ તમઃસ્રોતઃ પ્રવર્તતે ।
હેત્વભાવે ફલાભાવ ઇતિ વિજ્ઞાતુમર્હસિ ॥ ૧૨।૩૯
તત્ર સમ્યગ્મતિર્વિદ્યાન્મોક્ષકામ ચતુષ્ટયમ્ ।
પ્રતિબુદ્ધાપ્રબુદ્ધૌ ચ વ્યક્તમવ્યક્તમેવ ચ ॥ ૧૨।૪૦
યથાવદેતદ્વિજ્ઞાય ક્ષેત્રજ્ઞો હિ ચતુષ્ટયમ્ ।
આર્જવં જવતાં હિત્વા પ્રાપ્નોતિ પદમક્ષરમ્ ॥ ૧૨।૪૧
ઇત્યર્થં બ્રાહ્મણા લોકે પરમબ્રહ્મવાદિનઃ ।
બ્રહ્મચર્યં ચરન્તીહ બ્રાહ્મણાન્ વાસયન્તિ ચ ॥ ૧૨।૪૨
ઇતિ વાક્યમિદં શ્રુત્વા મુનેસ્તસ્ય નૃપાત્મજઃ ।
અભ્યુપાયં ચ પપ્રચ્છ પદમેવ ચ નૈષ્ઠિકમ્ ॥ ૧૨।૪૩
બ્રહ્મચર્યમિદં ચર્યં યથા યાવચ્છ યત્ર ચ ।
ધર્મસ્યાસ્ય ચ પર્યન્તં ભવાન્ વ્યાખ્યાતુમર્હતિ ॥ ૧૨।૪૪
ઇત્યરાડો યથાશાસ્ત્રં વિસ્પષ્ટાર્થં સમાસતઃ ।
તમેવાન્યેન કલ્પેન ધર્મમસ્મૈ વ્યભાષત ॥ ૧૨।૪૫
અયમાદૌ ગૃહાન્મુક્ત્વા ભૈક્ષાકં લિઙ્ગમાશ્રિતઃ ।
સમુદાચારવિસ્તીર્ણં શીલમાદાય વર્તતે ॥ ૧૨।૪૬
સન્તોષં પરમાસ્થાય યેન તેન યતસ્તતઃ ।
વિવિક્તં સેવતે વાસં નિર્દ્વન્દ્વઃ શાસ્ત્રવિત્કૃતી ॥ ૧૨।૪૭
તતો રાગાદ્ભયં દૃષ્ટ્વા વૈરાગ્યાચ્ચ પરં શિવમ્ ।
નિગૃહ્ણન્નિન્દ્રિયગ્રામં યતતે મનસઃ શ્રમે ॥ ૧૨।૪૮
અથો વિવિક્તં કામેભ્યો વ્યાપાદાદિભ્ય એવ ચ ।
વિવેકજમવાપ્નોતિ પૂર્વધ્યાનં વિતર્કવત્ ॥ ૧૨।૪૯
તચ્ચ ધ્યાનં સુખં પ્રાપ્ય તત્તદેવ વિતર્કયન્ ।
અપૂર્વસુખલાભેન હ્રિયતે બાલિશો જનઃ ॥ ૧૨।૫૦
શમેનૈવંવિધેનાયં કામદ્વેષવિગર્હિણા ।
બ્રહ્મલોકમવાપ્નોતિ પરિતોષેણ વઞ્ચિતઃ ॥ ૧૨।૫૧

જ્ઞાત્વા વિદ્વાન્ વિતર્કાંસ્તુ મનઃસઙ્ક્ષોભકારકાન્ ।
તદ્વિયુક્તમવાપ્નોતિ ધ્યાનં પ્રીતિસુખાન્વિતમ્ ॥ ૧૨।૫૨
હ્રિયમાણસ્તયા પ્રીત્યા યો વિશેષં ન પશ્યતિ ।
સ્થાનં ભાસ્વરમાપ્નોતિ દેવેષ્વાભાસુરેષ્વપિ ॥ ૧૨।૫૩
યસ્તુ પ્રીતિસુખાત્તસ્માદ્વિવેચયતિ માનસમ્ ।
તૃતીયં લભતે ધ્યાનં સુખં પ્રીતિવિવર્જિતમ્ ॥ ૧૨।૫૪
તત્ર કેચિદ્વ્યવસ્યન્તિ મોક્ષ ઇત્યપિ માનિનઃ ।
સુખદુઃખપરિત્યાગાદવ્યાપારાચ્ચ ચેતસઃ ॥ ૧૨।૫૫ (૫૭)
યસ્તુ તસ્મિન્સુખે મગ્નો ન વિશેષાય યત્નવાન્ ।
શુભકૃત્સ્નૈઃ સ સામાન્યં સુખં પ્રાપ્નોતિ દૈવતૈઃ ॥ ૧૨।૫૬ (૫૫)
તાદૃશં સુખમાસાદ્ય યો ન રજ્યન્નુપેક્ષતે ।
ચતુર્થં ધ્યાનમાપ્નોતિ સુખદુઃખવિવર્જિતમ્ ॥ ૧૨।૫૭ (૫૬)
અસ્ય ધ્યાનસ્ય તુ ફલં સમં દેવૈર્બૃહત્ફલૈઃ ।
કથયન્તિ બૃહત્કાલં વૃહત્પ્રજ્ઞાપરીક્ષકાઃ ॥ ૧૨।૫૮
સમાધેર્વ્યુત્થિતસ્તસ્માદ્દૃષ્ટ્વા દોષાંશ્છરીરિણામ્ ।
જ્ઞાનમારોહતિ પ્રાજ્ઞઃ શરીરવિનિવૃત્તયે ॥ ૧૨।૫૯
તતસ્તદ્ધ્યાનમુત્સૃજ્ય વિશેષે કૃતનિશ્ચયઃ ।
કામેભ્ય ઇવ સત્પ્રાજ્ઞો રૂપાદપિ વિરજ્યતે ॥ ૧૨।૬૦
શરીરે ખાનિ યાન્યસ્ય તાન્યાદૌ પરિકલ્પયન્ ।
ઘનેષ્વપિ તતો દ્રવ્યેષ્વાકાશમધિમુચ્યતે ॥ ૧૨।૬૧
આકાશસમમાત્માનં સઙ્ક્ષિપ્ય ત્વપરો બુધઃ ।
તદૈવાનન્તતઃ પશ્યન્ વિશેષમધિગચ્છતિ ॥ ૧૨।૬૨
અધ્યાત્મકુશલેષ્વન્યો નિવર્ત્યાત્માનમાત્મના ।
કિઞ્ચિન્નાસ્તીતિ સમ્પશ્યન્નાકિઞ્ચન્ય ઇતિ સ્મૃતઃ ॥ ૧૨।૬૩
તતો મુઞ્જાદિષીકેવ શકુનિઃ પઞ્જરાદિવ ।
ક્ષેત્રજ્ઞો નિઃસૃતો દેહાન્મુક્ત ઇત્યભિધીયતે ॥ ૧૨।૬૪
એતત્તત્પરમં બ્રહ્મ નિર્લિઙ્ગં ધ્રુવમક્ષરમ્ ।
યન્મોક્ષ ઇતિ તત્ત્વજ્ઞાઃ કથયન્તિ મનીષિણઃ ॥ ૧૨।૬૫
ઇત્યુપાયશ્ચ મોક્ષશ્ચ મયા સન્દર્શિતસ્તવ ।
યદિ જ્ઞાતં યદિ રુચિર્ યથાવત્પ્રતિપદ્યતામ્ ॥ ૧૨।૬૬
જૈગીષવ્યોઽથ જનકો વૃદ્ધશ્ચૈવ પરાશરઃ ।
ઇમં પન્થાનમાસાદ્ય મુક્તા હ્યન્યે ચ મોક્ષિણઃ ॥ ૧૨।૬૭

ઇતિ તસ્ય સ તદ્વાક્યં ગૃહીત્વા ન વિચાર્ય ચ ।
પૂર્વહેતુબલપ્રાપ્તઃ પ્રત્યુત્તરમુવાચ સઃ ॥ ૧૨।૬૮
શ્રુતં જ્ઞાનમિદં સૂક્ષ્મં પરતઃ પરતઃ શિવમ્ ।
ક્ષેત્રેષ્વસ્યાપરિત્યાગાદવૈમ્યેતદનૈષ્ઠિકમ્ ॥ ૧૨।૬૯
વિકારપ્રકૃતિભ્યો હિ ક્ષેત્રજ્ઞં મુક્તમપ્યહમ્ ।
મન્યે પ્રસવધર્માણં વીજધર્માણમેવ ચ ॥ ૧૨।૭૦
વિશુદ્ધો યદ્યપિ હ્યાત્મા નિર્મુક્ત ઇતિ કલ્પ્યતે । (અબ્ = ૧૨।૭૧અબ્)
ભૂયઃ પ્રત્યયસદ્ભાવાદમુક્તઃ સ ભવિષ્યતિ ॥ ૧૨।૭૧
ઋતુભૂમ્યમ્બુવિરહાદ્યથા બીજં ન રોહતિ ।
રોહતિ પ્રત્યયૈસ્તૈસ્તૈસ્તદ્વત્સોઽપિ મતો મમ ॥ ૧૨।૭૨
યત્કર્માજ્ઞાનતૃષ્ણાનાં ત્યાગાન્મોક્ષશ્ચ કલ્પ્યતે ।
અત્યન્તસ્તત્પરિત્યાગઃ સત્યાત્મનિ ન વિદ્યતે ॥ ૧૨।૭૧ (ચ્દ્ = ૧૨।૭૩ચ્દ્)
હિત્વા હિત્વા ત્રયમિદં વિશેષસ્તૂપલભ્યતે ।
આત્મનસ્તુ સ્થિતિર્યત્ર તત્ર સૂક્ષ્મમિદં ત્રયમ્ ॥ ૧૨। ૭૨ (૧૨।૭૪)
સૂક્ષ્મત્વાચ્ચૈવ દોષાણામવ્યાપારાચ્છ ચેતસઃ ।
દીર્ઘત્વાદાયુષશ્ચૈવ મોક્ષસ્તુ પરિકલ્પ્યતે ॥ ૧૨।૭૩ (૧૨।૭૫)
અહઙ્કારપરિત્યાગો યશ્ચૈષ પરિકલ્પ્યતે ।
સત્યાત્મનિ પરિત્યાગો નાહઙ્કારસ્ય વિદ્યતે ॥ ૧૨।૭૪ (૧૨।૭૬)
સઙ્ખ્યાદિભિરમુક્તશ્ચ નિર્ગુણો ન ભવત્યયમ્ ।
તસ્માદસતિ નૈર્ગુણ્યે નાસ્ય મોક્ષોઽભિધીયતે ॥ ૧૨।૭૫ (૧૨।૭૭)
ગુણિનો હિ ગુણાનાં ચ વ્યતિરેકો ન વિદ્યતે ।
રૂપોષ્ણાભ્યાં વિરહિતો ન હ્યગ્નિરુપલભ્યતે ॥ ૧૨।૭૬ (૧૨।૭૮)
પ્રાગ્દેહાન્ન ભવેદ્દેહી પ્રાગ્ગુણેભ્યસ્તથા ગુણી ।
કસ્માદાદૌ વિમુક્તઃ સઞ્શરીરી બધ્યતે પુનઃ ॥ ૧૨।૭૭ (૧૨।૭૯)
ક્ષેત્રજ્ઞો વિશરીરશ્ચ જ્ઞો વા સ્યાદજ્ઞ એવ વા ।
યદિ જ્ઞો જ્ઞેયમસ્યાસ્તિ જ્ઞેયે સતિ ન મુચ્યતે ॥ ૧૨।૭૮ (૧૨।૮૦)
અથાજ્ઞ ઇતિ સિદ્ધો વઃ કલ્પિતેન કિમાત્મના ।
વિનાપિ હ્યાત્મનાજ્ઞાનં પ્રસિદ્ધં કાષ્ઠકુડ્યવત્ ॥ ૧૨।૭૯ (૧૨।૮૧)
પરતઃ પરતસ્ત્યાગો યસ્માત્તુ ગુણવાન્ સ્મૃતઃ ।
તસ્માત્સર્વપરિત્યાગાન્મન્યે કૃત્સ્નાં કૃતાર્થતામ્ ॥ ૧૨।૮૦ (૧૨।૮૨)
ઇતિ ધર્મમરાડસ્ય વિદિત્વા ન તુતોષ સઃ ।
અકૃત્સ્નમિતિ વિજ્ઞાય તતઃ પ્રતિજગામ હ ॥ ૧૨।૮૧ (૧૨।૮૩)

વિશેષમથ શુશ્રૂષુરુદ્રકસ્યાશ્રમં યયૌ ।
આત્મગ્રાહાચ્ચ તસ્યાપિ જગૃહે ન સ દર્શનમ્ ॥ ૧૨।૮૨ (૧૨।૮૪)
સઞ્જ્ઞાસઞ્જ્ઞિત્વયોર્દોષં જ્ઞાત્વા હિ મુનિરુદ્રકઃ ।
આકિઞ્ચિન્યાત્પરં લેભે સઞ્જ્ઞાસઞ્જ્ઞાત્મિકાં ગતિમ્ ॥ ૧૨।૮૩ (૧૨।૮૫)
યસ્માચ્ચાલમ્બને સૂક્ષ્મે સઞ્જ્ઞાસઞ્જ્ઞે તતઃ પરમ્ ।
નાસઞ્જ્ઞી નૈવ સઞ્જ્ઞીતિ તસ્માત્તત્ર ગતસ્પૃહઃ ॥ ૧૨।૮૪ (૧૨।૮૬)
યતશ્ચ બુદ્ધિસ્તત્રૈવ સ્થિતાન્યત્રાપ્રચારિણી ।
સૂક્ષ્માપાદિ તતસ્તત્ર નાસઞ્જ્ઞિત્વં ન સઞ્જ્ઞિતા ॥ ૧૨।૮૫ (૧૨।૮૭)
યસ્માચ્ચ તમપિ પ્રાપ્ય પુનરાવર્તતે જગત્ ।
બોધિસત્ત્વઃ પરં પ્રેપ્સુસ્તસ્માદુદ્રકમત્યજત્ ॥ ૧૨।૮૬ (૧૨।૮૮)
તતો હિત્વાશ્રમં તસ્ય શ્રેયોઽર્થી કૃતનિશ્ચયઃ ।
ભેજે ગયસ્ય રાજર્ષેર્નગરીસઞ્જ્ઞમાશ્રમમ્ ॥ ૧૨।૮૭ (૧૨।૮૯)
અથ નૈરઞ્જનાતીરે શુચૌ શુચિપરાક્રમઃ ।
ચકાર વાસમેકાન્તવિહારાભિવ્રતી મુનિઃ ॥ ૧૨।૮૮ (૧૨। ૯૦)
<xxx> તત્પૂર્વં પઞ્ચેન્દ્રિયવશોદ્ધતાન્ ।
તપઃ <xx> વ્રતિનો ભિક્ષૂન્ પઞ્ચ નિરૈક્ષત ॥ (૧૨।૯૧)
પઞ્ચોપતસ્થુર્દૃષ્ટ્વાત્ર ભિક્ષવસ્તં મુમુક્ષવઃ ।
પુણ્યાર્જિતધનારોગ્યમિન્દ્રિયાર્થા ઇવેશ્વરમ્ ॥ ૧૨।૮૯ (૧૨।૯૨)
સમ્પૂજ્યમાનસ્તૈઃ પ્રહ્વૈર્વિનયાનતમૂર્તિભિઃ ।
તદ્વંશસ્થાયિભિઃ શિષ્યૈર્લોલૈર્મન ઇવેન્દ્રિયૈઃ ॥ ૧૨।૯૦ (૧૨।૯૩)
મૃત્યુજન્માન્તકરણે સ્યાદુપાયોઽયમિત્યથ ।
દુષ્કરાણિ સમારેભે તપાંસ્યનશનેન સઃ ॥ ૧૨।૯૧ (૧૨।૯૪)
ઉપવાસવિધીન્ નેકાન્ કુર્વન્ નરદુરાચરાન્ ।
વર્ષાણિ ષટ્કર્મપ્રેપ્સુરકરોત્કાર્શ્યમાત્મનઃ ॥ ૧૨।૯૨ (૧૨।૯૫)
અન્નકાલેષુ ચૈકૈકૈઃ સકોલતિલતણ્ડુલૈઃ ।
અપારપારસંસારપારં પ્રેપ્સુરપારયત્ ॥ ૧૨।૯૩ (૧૨।૯૬)
દેહાદપચયસ્તેન તપસા તસ્ય યઃ કૃતઃ ।
સ એવોપચયો ભૂયસ્તેજસાસ્ય કૃતોઽભવત્ ॥ ૧૨।૯૪ (૧૨।૯૭)
કૃશોઽપ્યકૃશકીર્તિશ્રીર્હ્લાદં ચક્રેઽન્યચક્ષુષમ્ ।
કુમુદાનામિવ શરચ્છુક્લપક્ષાદિચન્દ્રમાઃ ॥ ૧૨।૯૫ (૧૨।૯૮)
ત્વગસ્થિશેષો નિઃશેષૈર્મેદઃપિશિતશોણિતૈઃ ।
ક્ષીણોઽપ્યક્ષીણગામ્ભીર્યઃ સમુદ્ર ઇવ સ વ્યભાત્ ॥ ૧૨।૯૬ (૧૨।૯૯)

અથ કષ્ટતપઃસ્પષ્ટવ્યર્થક્લિષ્ટતનુર્મુનિઃ ।
ભવભીરુરિમાં ચક્રે બુદ્ધિં બુદ્ધત્વકાઙ્ક્ષયા ॥ ૧૨।૯૭ (૧૨।૧૦૦)
નાયં ધર્મો વિરાગાય ન બોધાય ન મુક્તયે ।
જમ્બુમૂલે મયા પ્રાપ્તો યસ્તદા સ વિધિર્ધ્રુવઃ ॥ ૧૨।૯૮ (૧૨।૧૦૧)
ન ચાસૌ દુર્બલેનામું શક્યમિત્યાગતાદરઃ ।
શરીરબલવૃદ્ધ્યર્થમિદં ભૂયોઽન્વચિન્તયત્ ॥ ૧૨।૯૯ (૧૨।૧૦૨)
ક્ષુત્પિપાસાશ્રમક્લાન્તઃ શ્રમાદસ્વસ્થમાનસઃ ।
પ્રાપ્નુયાન્મનસાવાપ્યં ફલં કથમનિર્વૃતઃ ॥ ૧૨।૧૦૦ (૧૨।૧૦૩)
નિર્વૃતિઃ પ્રાપ્યતે સમ્યક્સતતેન્દ્રિયતર્પણાત્ ।
સન્તર્પિતેન્દ્રિયતયા મનઃસ્વાસ્થ્યમવાપ્યતે ॥ ૧૨।૧૦૧ (૧૨।૧૦૪)
સ્વસ્થપ્રસન્નમનસઃ સમાધિરુપપદ્યતે ।
સમાધિયુક્તચિત્તસ્ય ધ્યાનયોગઃ પ્રવર્તતે ॥ ૧૨।૧૦૨ (૧૨।૧૦૫)
ધ્યાનપ્રવર્તનાદ્ધર્માઃ પ્રાપ્યન્તે યૈરવાપ્યતે ।
દુર્લભં શાન્તમજરં પરં તદમૃતં પદમ્ ॥ ૧૨।૧૦૩ (૧૨।૧૦૬)
તસ્માદાહારમૂલોઽયમુપાય ઇતિનિશ્ચયઃ ।
અસૂરિકરણે ધીરઃ કૃત્વામિતમતિર્મતિમ્ ॥ ૧૨।૧૦૪ (૧૨।૧૦૭)
સ્નાતો નૈરઞ્જનાતીરાદુત્તતાર શનૈઃ કૃશઃ ।
ભક્ત્યાવનતશાખાગ્રૈર્દત્તહસ્તસ્તટદ્રુમૈઃ ॥ ૧૨।૧૦૫ (૧૨।૧૦૮)
અથ ગોપાધિપસુતા દૈવતૈરભિચોદિતા ।
ઉદ્ભૂતહૃદયાનન્દા તત્ર નન્દબલાગમત્ ॥ ૧૨।૧૦૬ (૧૨।૧૦૯)
સિતશઙ્ખોજ્જ્વલભુજા નીલકમ્બલવાસિની ।
સફેણમાલાનીલામ્બુર્યમુનેવ સરિદ્વરા ॥ ૧૨।૧૦૭ (૧૨।૧૧૦)
સા શ્રદ્ધાવર્ધિતપ્રીતિર્વિકસલ્લોચનોત્પલા ।
શિરસા પ્રણિપત્યૈનં ગ્રાહયામાસ પાયસમ્ ॥ ૧૨।૧૦૮ (૧૨।૧૧૧)
કૃત્વા તદુપભોગેન પ્રાપ્તજન્મફલાં સ તામ્ ।
બોધિપ્રાપ્તૌ સમર્થોઽભૂત્સન્તર્પિતષડિન્દ્રિયઃ ॥ ૧૨।૧૦૯ (૧૨।૧૧૨)
પર્યાપ્તાપ્યાનમૂર્તશ્ચ સાર્ધં સુયશસા મુનિઃ ।
કાન્તિધૈર્યૈકભારૈકઃ શશાઙ્કાર્ણવવલ્બભૌ ॥ ૧૨।૧૧૦ (૧૨।૧૧૩)
આવૃત્ત ઇતિ વિજ્ઞાય તં જહુઃ પઞ્ચભિક્ષવઃ ।
મનીષિણમિવાત્માનં નિર્મુક્તં પઞ્ચધાતવઃ ॥ ૧૨।૧૧૧ (૧૨।૧૧૪)
વ્યવસાયદ્વિતીયોઽથ શાદ્વલાસ્તીર્ણભૂતલમ્ ।
સોઽશ્વત્થમૂલં પ્રયયૌ બોધાય કૃતનિશ્ચયઃ ॥ ૧૨।૧૧૨ (૧૨।૧૧૫)

તતસ્તદાનીં ગજરાજવિક્રમઃ પદસ્વનેનાનુપમેન બોધિતઃ ।
મહામુનેરાગતબોધિનિશ્ચયો જગાદ કાલો ભુજગોત્તમઃ સ્તુતિમ્ ॥ ૧૨।૧૧૩ (૧૨।૧૧૬)
યથા મુને ત્વચ્ચરણાવપીડિતા મુહુર્મુહુર્નિષ્ટનતીવ મેદિની ।
યથા ચ તે રાજતિ સૂર્યવત્પ્રભા ધ્રુવં ત્વમિષ્ટં ફલમદ્ય ભોક્ષ્યસે ॥ ૧૨।૧૧૪ (૧૨।૧૧૭)
યથા ભ્રમન્ત્યો દિવિ વાયપઙ્ક્તયઃ પ્રદક્ષિણં ત્વાં કમલાક્ષ કુર્વતે ।
યથા ચ સૌમ્યા દિવિ વાન્તિ વાયવસ્ત્વમદ્ય બુદ્ધો નિયતં ભવિષ્યસિ ॥ ૧૨।૧૧૫ (૧૨।૧૧૮)
તતો ભુજઙ્ગપ્રવરેણ સંસ્તુતસ્તૃણાન્યુપાદાય શુચીનિ લાવકાત્ ।
કૃતપ્રતિજ્ઞો નિષસાદ બોધયે મહાતરોર્મૂલમુપાશ્રિતઃ શુચેઃ ॥ ૧૨।૧૧૬ (૧૨।૧૧૯)
તતઃ સ પર્યઙ્કમકમ્પ્યમુત્તમં બબન્ધ સુપ્તોરગભોગપિણ્ડિતમ્ ।
ભિનદ્મિ તાવદ્ભુવિ નૈતદાસનં ન યામિ તાવત્કૃતકૃત્યતામિતિ ॥ ૧૨।૧૧૭ (૧૨।૧૨૦)
તતો યયુર્મુદમતુલાં દિવૌકસો વવાસિરે ન મૃગગના ન પક્ષિણઃ ।
ન સસ્વનુર્વનતરવોઽનિલાહતાઃ કૃતાસને ભગવતિ નિશ્ચલાત્મનિ ॥ ૧૨।૧૧૮ (૧૨।૧૨૧)
ઇતિ શ્રીબુદ્ધચરિતે મહાકાવ્યેઽશ્વઘોષકૃતેઽરાડદર્શનો નામ દ્વાદશઃ સર્ગઃ ॥ ૧૨ ॥

## Book XIII [મારવિજયો]

તસ્મિન્શ્ચ બોધાય કૃતપ્રતિજ્ઞે રાજર્ષિવંશપ્રભવે મહાર્ષૌ ।
તત્રોપવિષ્ટે પ્રજહર્ષ લોકસ્તત્રાસ સદ્ધર્મરિપુસ્તુ મારઃ ॥ ૧૩।૧
યં કામદેવં પ્રવદન્તિ લોકે ચિત્રાયુધં પુષ્પશરં તથૈવ ।
કામપ્રચારાધિપતિં તમેવ મોક્ષદ્વિષં મારમુદાહરન્તિ ॥ ૧૩।૨
તસ્યાત્મજા વિભ્રમહર્ષદર્પાસ્તિસ્રો રતિપ્રીતિતૃષશ્ચ કન્યાઃ ।
પપ્રચ્છુરેનં મનસો વિકારં સ તાંશ્ચ તાશ્ચૈવ વચો બભાષે ॥ ૧૩।૩
અસૌ મુનિર્નિશ્ચયવર્મ બિભ્રત્ સત્ત્વાયુધં બુદ્ધિશરં વિકૃષ્ય ।
જિગીષુરાસ્તે વિષયાન્મદીયાન્ તસ્માદયં મે મનસો વિષાદઃ ॥ ૧૩।૪
યદિ હ્યસૌ મામભિભૂય યાતિ લોકાય ચાખ્યાત્યપવર્ગમાર્ગમ્ ।
શૂન્યસ્તતોઽયં વિષયો મમાદ્ય વૃત્તાચ્ચ્યુતસ્યેવ વિદેહભર્તુઃ ॥ ૧૩।૫
તદ્યાવદેવૈષ ન લબ્ધચક્ષુર્મદ્ગોચરે તિષ્ઠતિ યાવદેવ ।
યાસ્યામિ તાવદ્વ્રતમસ્ય ભેત્તું સેતું નદીવેગ ઇવાભિવૃદ્ધઃ ॥ ૧૩।૬
તતો ધનુઃ પુષ્પમયં ગૃહીત્વા શરાંસ્તથા મોહકરાંશ્ચ પઞ્ચ ।
સોઽશ્વત્થમૂલં સસુતોઽભ્યગચ્છદસ્વાસ્થ્યકારી મનસઃ પ્રજાનામ્ ॥ ૧૩।૭
અથ પ્રશાન્તં મુનિમાસનસ્થં પારં તિતીર્ષું ભવસાગરસ્ય ।
વિષજ્ય સવ્યં કરમાયુધાગ્રે ક્રીડઞ્શરેણેદમુવાચ મારઃ ॥ ૧૩।૮

ઉત્તિષ્ઠ ભોઃ ક્ષત્રિય મૃત્યુભીત વરસ્વ ધર્મં ત્યજ મોક્ષધર્મમ્ ।
વાણૈશ્ચ [યજ્ઞૈશ્ચ] વિનીય લોકાન્ લોકાન્ પરાન્ પ્રાપ્નુહિ વાસવસ્ય ॥ ૧૩।૯
પન્થા હિ નિર્યાતુમયં યશસ્યો યો વાહિતઃ પૂર્વતમૈર્નરેન્દ્રૈઃ ।
જાતસ્ય રાજર્ષિકુલે વિશાલે ભૈક્ષાકમશ્લાઘ્યમિદં પ્રપત્તુમ્ ॥ ૧૩।૧૦
અથાદ્ય નોત્તિષ્ઠસિ નિશ્ચિતાત્મા ભવ સ્થિરો મા વિમુચઃ પ્રતિજ્ઞામ્ ।
મયોદ્યતો હ્યેષ શરઃ સ એવ યઃ સૂર્યકે મીનરિપૌ વિમુક્તઃ ॥ ૧૩।૧૧
પૃષ્ટઃ સ ચાનેન કથઞ્ચિદૈડઃ સોમસ્ય નપ્તાપ્યભવદ્વિચિત્તઃ ।
સ ચાભવચ્છાન્તનુરસ્વતન્ત્રઃ ક્ષીણે યુગે કિં વત દુર્બલોઽન્યઃ ॥ ૧૩।૧૨
તત્ક્ષિપ્રમુત્તિષ્ઠ લભસ્વ સઞ્જ્ઞાં વાણો હ્યયં તિષ્ઠતિ લેલિહાનઃ ।
પ્રિયાભિધેયેષુ રતિપ્રિયેષુ યં ચક્રવાકેષ્વપિ નોત્સૃજામિ ॥ ૧૩।૧૩
ઇત્યેવમુક્તોઽપિ યદા નિરાસ્થો નૈવાસનં શાક્યમુનિર્બિભેદ ।
શરં તતોઽસ્મૈ વિસસર્જ મારઃ કન્યાશ્ચ કૃત્વા પુરતઃ સુતાંશ્ચ ॥ ૧૩।૧૪
તસ્મિંસ્તુ વાણેઽપિ સ વિપ્રમુક્તે ચકાર નાસ્થાં ન ધૃતેશ્ચચાલ ।
દૃષ્ટ્વા તથૈનં વિષસાદ મારશ્ચિન્તાપરીતશ્ચ શનૈર્જગાદ ॥ ૧૩।૧૫
શૈલેન્દ્રપુત્રીં પ્રતિ યેન વિદ્ધો દેવોઽપિ શમ્ભુશ્ચલિતો બભૂવ ।
ન ચિન્તયત્યેષ તમેવ વાણં કિં સ્યાદચિત્તો ન શરઃ સ એષઃ ॥ ૧૩।૧૬
તસ્માદયં નાર્હતિ પુષ્પવાણં ન હર્ષણં નાપિ રતેર્નિયોગમ્ ।
અર્હત્યયં ભૂતગણૈરશેષૈઃ સન્ત્રાસનાતર્જનતાડનાનિ ॥ ૧૩।૧૭
સસ્માર મારશ્ચ તતઃ સ્વસૈન્યં વિધ્વંસનં શાક્યમુનેશ્ચિકીર્ષન્ ।
નાનાશ્રયાશ્ચાનુચરાઃ પરીયુઃ શરદ્રુમપ્રાસગદાસિહસ્તાઃ ॥ ૧૩।૧૮
વરાહમીનાશ્વખરોષ્ટ્રવક્ત્રા વ્યાઘ્રર્ક્ષસિંહદ્વિરદાનનાશ્ચ ।
એકેક્ષણા નૈકમુખાસ્ત્રિશીર્ષા લમ્બોદરાશ્ચૈવ પૃષોદરાશ્ચ ॥ ૧૩।૧૯
અજાસુ સક્તા ઘટજાનવશ્ચ દંષ્ટ્રાયુધાશ્ચૈવ નખાયુધાશ્ચ ।
કબન્ધહસ્તા બહુમૂર્તયશ્ચ ભગ્નાર્ધવક્ત્રાશ્ચ મહામુખાશ્ચ ॥ ૧૩।૨૦
તામ્રારુણા લોહિતવિન્દુચિત્રાઃ ખટ્વાઙ્ગહસ્તા હરિધૂમ્રકેશાઃ ।
લમ્બસ્રજો વારણલંબકર્ણાશ્ચર્માંબરાશ્ચૈવ નિરંબરાશ્ચ ॥ ૧૩।૨૧
શ્વેતાર્ધવક્ત્રા હરિતાર્ધકાયાસ્તામ્રાશ્ચ ધૂમ્રા હરયોઽસિતાશ્ચ ।
વ્યાડોત્તરાસઙ્ગભુજાસ્તથૈવ પ્રઘુષ્ટઘણ્ટાકુલમેખલાશ્ચ ॥ ૧૩।૨૨
તાલપ્રમાણાશ્ચ ગૃહીતશૂલા દંષ્ટ્રાકરાલાશ્ચ શિશુપ્રમાણાઃ ।
ઉરભ્રવક્ત્રાશ્ચ વિહઙ્ગમાશ્ચ માર્જારવક્ત્રાશ્ચ મનુષ્યકાયાઃ ॥ ૧૩।૨૩
પ્રકીર્ણકેશાઃ શિખિનોઽર્ધમુણ્ડા રજ્જ્વમ્બરા વ્યાકુલવેષ્ટનાશ્ચ ।
પ્રહૃષ્ટવક્ત્રા ભૃકુટીમુખાશ્ચ તેજોહરાશ્ચૈવ મનોહરાશ્ચ ॥ ૧૩।૨૪

કેચિદ્વ્રજન્તો ભૃશમાવવલ્ગુરન્યોઽન્યમાપુપ્લુવિરે તથાન્યે ।
ચિક્રીડુરાકાશગતાશ્ચ કેચિત્કેચિચ્ચ ચેરુસ્તરુમસ્તકેષુ ॥ ૧૩।૨૫
નનર્ત કશ્ચિદ્ભ્રમયંસ્ત્રિશૂલં કશ્ચિદ્ધ પુસ્ફૂર્જ ગદાં વિકર્ષન્ ।
હર્ષેણ કશ્ચિદ્વૃષવન્નનર્ત કશ્ચિત્પ્રજજ્વાલ તનૂરુહેભ્યઃ ॥ ૧૩।૨૬
એવંવિધા ભૂતગણાઃ સમન્તાત્તદ્બોધિમૂલં પરિવાર્ય તસ્થુઃ ।
જિઘૃક્ષવશ્ચૈવ જિઘાંસવશ્ચ ભર્તુર્નિયોગં પરિપાલયન્તઃ ॥ ૧૩।૨૭
તં પ્રેક્ષ્ય મારસ્ય ચ પૂર્વરાત્રે શાક્યર્ષભસ્યૈવ ચ યુદ્ધકાલમ્ ।
ન દ્યૌશ્ચકાશે પૃથિવી ચકમ્પે પ્રજજ્વલુશ્ચૈવ દિશઃ સશબ્દાઃ ॥ ૧૩।૨૮
વિષ્વગ્વવૌ વાયુરુદીર્ણવેગસ્તારા ન રેજુર્ન બભૌ શશાઙ્કઃ ।
તમશ્ચ ભૂયો વિતતાર રાત્રેઃ સર્વે ચ સઞ્ચુક્ષુભિરે સમુદ્રાઃ ॥ ૧૩।૨૯
મહીભૃતો ધર્મપરાશ્ચ નાગા મહામુનેર્વિઘ્નમમૃષ્યમાણાઃ ।
મારં પ્રતિ ક્રોધવિવૃત્તનેત્રા નિઃશશ્વસુશ્ચૈવ જજૃમ્ભિરે ચ ॥ ૧૩।૩૦
શુદ્ધાધિવાસા વિબુધર્ષયસ્તુ સદ્ધર્મસિદ્ધ્યર્થમિવ પ્રવૃત્તાઃ ।
મારેઽનુકમ્પાં મનસા પ્રચક્રુર્વિરાગભાવાત્તુ ન રોષમીયુઃ ॥ ૧૩।૩૧
તદ્બોધિમૂલં સમવેક્ષ્ય કીર્ણં હિંસાત્મના મારબલેન તેન ।
ધર્માત્મભિર્લોકવિમોક્ષકામૈર્બભૂવ હાહાકૃતમન્તરીક્ષમ્ ॥ ૧૩।૩૨
ઉપપ્લુતં ધર્મવિદસ્તુ તસ્ય દૃષ્ટ્વા સ્થિતં મારબલં મહાર્ષિઃ ।
ન ચુક્ષુભે નાપિ યયૌ વિકારં મધ્યે ગવાં સિંહ ઇવોપવિષ્ટઃ ॥ ૧૩।૩૩
મારસ્તતો ભૂતચમૂમુદીર્ણામાજ્ઞાપયામાસ ભયાય તસ્ય ।
સ્વૈઃ સ્વૈઃ પ્રભાવૈરથ સાસ્ય સેના તદ્ધૈર્યભેદાય મતિં ચકાર ॥ ૧૩।૩૪
કેચિચ્છલન્નૈકવિલમ્બિજિહ્વાસ્તીક્ષ્ણોગ્રદંષ્ટ્રા હરિમણ્ડલાક્ષાઃ ।
વિદારિતાસ્યાઃ સ્થિરશઙ્કુકર્ણાઃ સન્ત્રાસયન્તઃ કિલ નામ તસ્થુઃ ॥ ૧૩।૩૫
તેભ્યઃ સ્થિતેભ્યઃ સ તથાવિધેભ્યઃ રૂપેણ ભાવેન ચ દારુણેભ્યઃ ।
ન વિવ્યથે નોદ્વિવિજે મહાર્ષિઃ ક્રીડન્ સુબાલેભ્ય ઇવોદ્ધતેભ્યઃ ॥ ૧૩।૩૬
કશ્ચિત્તતો રૌદ્રવિવૃત્તદૃષ્ટિસ્તસ્મૈ ગદામુદ્યમયાઞ્ચકાર ।
તસ્તમ્ભ બાહુઃ સગદસ્તતોઽસ્ય પુરન્દરસ્યેવ પુરા સવજ્રઃ ॥ ૧૩।૩૭
કેચિત્સમુદ્યમ્ય શિલાસ્તરૂંશ્ચ વિષેહિરે નૈવ મુનૌ વિમોક્તુમ્ ।
પેતુઃ સવૃક્ષાઃ સશિલાસ્તથૈવ વજ્રાવભગ્ના ઇવ વિન્ધ્યપાદાઃ ॥ ૧૩।૩૮
કૈશ્ચિત્સમુત્પત્ય નભો વિમુક્તાઃ શિલાશ્ચ વૃક્ષાશ્ચ પરશ્વધાશ્ચ ।
તસ્થુર્નભસ્યેવ ન ચાવપેતુઃ સન્ધ્યાભ્રપાદા ઇવ નૈકવર્ણાઃ ॥ ૧૩।૩૯
ચિક્ષેપ તસ્યોપરિ દીપ્તમન્યઃ કડઙ્ગરં પર્વતશૃઙ્ગમાત્રમ્ ।
યન્મુક્તમાત્રં ગગનસ્થમેવ તસ્યાનુભાવાચ્છતધા બભૂવ ॥ ૧૩।૪૦

કશ્ચિજ્જ્વલન્નર્ક ઇવોદિતઃ ખાદઙ્ગારવર્ષં મહદુત્સસર્જ ।
ચૂર્ણાનિ ચામીકરકન્દરાણાં કલ્પાત્યયે મેરુરિવ પ્રદીપ્તઃ ॥ ૧૩।૪૧
તદ્બોધિમૂલે પ્રવિકીર્યમાણમઙ્ગારવર્ષં તુ સવિસ્ફુલિઙ્ગમ્ ।
મૈત્રીવિહારાદૃષિસત્તમસ્ય બભૂવ રક્તોત્પલપત્રવર્ષઃ ॥ ૧૩।૪૨
શરીરચિત્તવ્યસનાતપૈસ્તૈરેવંવિધૈસ્તૈશ્ચ નિપાત્યમાનૈઃ ।
નૈવાસનાચ્ચાક્યમુનિશ્ચચાલ સ્વં નિશ્ચયં બન્ધુમિવોપગુહ્ય ॥ ૧૩।૪૩
અથાપરે નિર્જગલુર્મુખેભ્યઃ સર્પાન્વિજીર્ણેભ્ય ઇવ દ્રુમેભ્યઃ ।
તે મન્ત્રબદ્ધા ઇવ તત્સમીપે ન શશ્વસુર્નોત્સસૃજુર્ન ચેલુઃ ॥ ૧૩।૪૪
ભૂત્વાપરે વારિધરા વૃહન્તઃ સવિદ્યુતઃ સાશનિચણ્ડઘોષાઃ ।
તસ્મિન્ દ્રુમે તત્યજુરશ્મવર્ષં તત્પુષ્પવર્ષં રુચિરં બભૂવ ॥ ૧૩।૪૫
ચાપેઽથ વાણો નિહિતોઽપરેણ જજ્વાલ તત્રૈવ ન નિષ્પપાત ।
અનીશ્વરસ્યાત્મનિ ધૂર્યમાણો દુર્મર્ષણસ્યેવ નરસ્ય મન્યુઃ ॥ ૧૩।૪૬
પઞ્ચેષવોઽન્યેન તુ વિપ્રમુક્તાસ્તસ્થુર્નયત્યેવ મુનૌ ન પેતુઃ ।
સંસારભીરોર્વિષયપ્રવૃત્તૌ પઞ્ચેન્દ્રિયાણીવ પરીક્ષકસ્ય ॥ ૧૩।૪૭
જિઘાંસયાન્યઃ પ્રસસાર રુષ્ટો ગદાં ગૃહીત્વાભિમુખો મહાર્ષેઃ ।
સોઽપ્રાપ્તકાલો વિવશઃ પપાત દોષેષ્વિવાનર્થકરેષુ લોકઃ ॥ ૧૩।૪૮
સ્ત્રી મેઘકાલી તુ કપાલહસ્તા કર્તું મહાર્ષેઃ કિલ મોહચિત્તમ્ ।
બભ્રામ તત્રાનિયતં ન તસ્થૌ ચલાત્મનો બુદ્ધિરિવાગમેષુ ॥ ૧૩।૪૯
કશ્ચિત્પ્રદીપ્તં પ્રણિધાય ચક્ષુર્નેત્રાગ્નિનાશીવિષવદ્દિધક્ષુઃ ।
તત્રૈવ નાસીત્તમૃષિં દદર્શ કામાત્મકઃ શ્રેય ઇવોપદિષ્ટમ્ ॥ ૧૩।૫૦
ગુર્વીં શિલામુદ્યમયંસ્તથાન્યઃ શશ્રામ મોઘં વિહતપ્રયત્નઃ ।
નિઃશ્રેયસં જ્ઞાનસમાધિગમ્યં કાયક્લમૈર્ધર્મમિવાપ્તુકામઃ ॥ ૧૩।૫૧
તરક્ષુસિંહાકૃતયસ્તથાન્યે પ્રણેદુરુચ્ચૈર્મહતઃ પ્રણાદાન્ ।
સત્ત્વાનિ યૈઃ સઞ્ચુકુચુઃ સમન્તાદ્વજ્રાહતા દ્યૌઃ ફલતીતિ મત્વા ॥ ૧૩।૫૨
મૃગા ગજાશ્ચાર્ત્તરવાન્ સૃજન્તો વિદુદ્રુવુશ્ચૈવ નિલિલ્યિરે ચ ।
રાત્રૌ ચ તસ્યામહનીવ દિગ્ભ્યઃ ખગા રુવન્તઃ પરિપેતુરાર્ત્તાઃ ॥ ૧૩।૫૩
તેષાં પ્રણાદૈસ્તુ તથાવિધૈસ્તૈઃ સર્વેષુ ભૂતેષ્વપિ કમ્પિતેષુ ।
મુનિર્ન તત્રાસ ન સઞ્ચુકોચ રવૈર્ગરુત્માનિવ વાયસાનામ્ ॥ ૧૩।૫૪
ભયાવહેભ્યઃ પરિષદ્ગણેભ્યો યથા યથા નૈવ મુનિર્બિભાય ।
તથા તથા ધર્મભૃતાં સપત્નઃ શોકાચ્ચ રોષાચ્છ સસાર મારઃ ॥ ૧૩।૫૫
ભૂતં તતઃ કિઞ્ચિદદૃશ્યરૂપં વિશિષ્ટરૂપં ગગનસ્થમેવ ।
દૃષ્ટ્વાર્ષયે દ્રુગ્ધમવૈરરુષ્ટં મારં બભાષે મહતા સ્વરેણ ॥ ૧૩।૫૬

મોઘં શ્રમં નાર્હસિ માર કર્તું હિંસ્રાત્મતામુત્સૃજ ગચ્છ શર્મ ।
નૈષ ત્વયા કમ્પયિતું હિ શક્યો મહાગિરિર્મેરુરિવાનિલેન ॥ ૧૩।૫૭
અપ્યુષ્ણભાવં જ્વલનઃ પ્રજહ્યાદાપો દ્રવત્વં પૃથિવી સ્થિરત્વમ્ ।
અનેકકલ્પાચિતપુણ્યકર્મા ન ત્વેવ જહ્યાદ્વ્યવસાયમેષઃ ॥ ૧૩।૫૮
યો નિશ્ચયો હ્યસ્ય પરાક્રમશ્ચ તેજશ્ચ યદ્યા ચ દયા પ્રજાસુ ।
અપ્રાપ્ય નોત્થાસ્યતિ તત્ત્વમેષ તમાંસ્યહત્વેવ સહસ્રરશ્મિઃ ॥ ૧૩।૫૯
કાષ્ઠં હિ મથ્નન્ લભતે હુતાશં ભૂમિં ખનન્ વિન્દતિ ચાપિ તોયમ્ ।
નિર્બન્ધિનઃ કિઞ્ચ ન નાસ્ય સાધ્યં ન્યાયેન યુક્તં ચ કૃતં ચ સર્વમ્ ॥ ૧૩।૬૦
તલ્લોકમાર્ત્તં કરુણાયમાનો રોગેષુ રાગાદિષુ વર્તમાનમ્ ।
મહાભિષગ્નાર્હતિ વિઘ્નમેષ જ્ઞાનૌષધાર્થં પરિખિદ્યમાનઃ ॥ ૧૩।૬૧
હૃતે ચ લોકે બહુભિઃ કુમાર્ગૈઃ સન્માર્ગમન્વિચ્છતિ યઃ શ્રમેણ ।
સ દૈશિકઃ ક્ષોભયિતું ન યુક્તં સુદેશિકઃ સાર્થ ઇવ પ્રનષ્ટે ॥ ૧૩।૬૨
સત્ત્વેષુ નષ્ટેષુ મહાન્ધકારૈર્જ્ઞાનપ્રદીપઃ ક્રિયમાણ એષઃ ।
આર્યસ્ય નિર્વાપયિતું ન સાધુ પ્રજ્વાલ્યમાનસ્તમસીવ દીપઃ ॥ ૧૩।૬૩
દૃષ્ટ્વા ચ સંસારમયે મહૌઘે મગ્નં જગત્પારમવિન્દમાનમ્ ।
યશ્ચેદમુત્તારયિતું પ્રવૃત્તઃ કશ્ચિન્નયેત્તસ્ય તુ પાપમાર્યઃ ॥ ૧૩।૬૪
ક્ષમાશિફો ધૈર્યવિગાઢમૂલશ્ચારિત્રપુષ્પઃ સ્મૃતિબુદ્ધિશાખઃ ।
જ્ઞાનદ્રુમો ધર્મફલપ્રદાતા નોત્પાટનં હ્યર્હતિ વર્ધમાનઃ ॥ ૧૩।૬૫
બદ્ધાં દૃઢૈશ્ચેતસિ મોહપાશૈર્યસ્ય પ્રજાં મોક્ષયિતું મનીષા ।
તસ્મિન્ જિઘાંસા તવ નોપપન્ના શ્રાન્તે જગદ્બન્ધનમોક્ષહેતોઃ ॥ ૧૩।૬૬
બોધાય કર્માણિ હિ યાન્યનેન કૃતાનિ તેષાં નિયતોઽદ્ય કાલઃ ।
સ્થાને તથાસ્મિન્નુપવિષ્ટ એષ યથૈવ પૂર્વે મુનયસ્તથૈવ ॥ ૧૩।૬૭
એષા હિ નાભિર્વસુધાતલસ્ય કૃત્સ્નેન યુક્તા પરમેણ ધામ્ના ।
ભૂમેરતોઽન્યોઽસ્તિ હિ ન પ્રદેશો વેશં સમાધેર્વિષયો હિતસ્ય ॥ ૧૩।૬૮
તન્મા કૃથાઃ શોકમુપેહિ શાન્તિં મા ભૂન્મહિમ્ના તવ માર માનઃ ।
વિશ્રમ્ભિતું ન ક્ષમમધ્રુવા શ્રીશ્ચલે પદે કિં પદમભ્યુપૈષિ ॥ ૧૩।૬૯
તતઃ સ સંશ્રુત્ય ચ તસ્ય તદ્વચો મહામુનેઃ પ્રેક્ષ્ય ચ નિષ્પ્રકમ્પતામ્ ।
જગામ મારો વિમના હતોદ્યમઃ શરૈર્જગચ્ચેતસિ યૈર્વિહન્યસે ॥ ૧૩।૭૦
ગતપ્રહર્ષા વિફલીકૃતશ્રમા પ્રવિદ્ધપાષાણકડઙ્ગરદ્રુમા ।
દિશઃ પ્રદુદ્રાવ તતોઽસ્ય સા ચમૂર્હતાશ્રયેવ દ્વિષતા દ્વિષચ્છમૂઃ ॥ ૧૩।૭૧
દ્રવતિ સપરપક્ષે નિર્જિતે પુષ્પકેતૌ
જયતિ જિતતમસ્કે નીરજસ્કે મહાર્ષૌ ।

યુવતિરિવ સહાસા દ્યૌશ્ચકાશે સચન્દ્રા
સુરભિ ચ જલગર્ભં પુષ્પવર્ષં પપાત ॥ ૧૩।૭૨
તથાપિ પાપીયસિ નિર્જિતે ગતે દિશઃ પ્રસેદુઃ પ્રબભૌ નિશાકરઃ ।
દિવો નિપેતુર્ભુવિ પુષ્પવૃષ્ટયો રરાજ યોષેવ વિકલ્મષા નિશા ॥ ૧૩।૭૩*
ઇતિ શ્રીબુદ્ધચરિતે મહાકાવ્યેઽશ્વઘોષકૃતે મારવિજયો નામ ત્રયોદશઃ સર્ગઃ ॥ ૧૩ ॥

Book XIV

તતો મારબલં જિત્વા ધૈર્યેણ ચ શમેન ચ ।
પરમાર્થં વિજિજ્ઞાસુઃ સ દધ્યૌ ધ્યાનકોવિદઃ ॥ ૧૪।૧
સર્વેષુ ધ્યાનવિધિષુ પ્રાપ્ય ચૈશ્વર્યમુત્તમમ્ ।
સસ્માર પ્રથમે યામે પૂર્વજન્મપરમ્પરામ્ ॥ ૧૪।૨
અમુત્રાહમયં નામ ચ્યુતસ્તસ્માદિહાગતઃ ।
ઇતિ જન્મસહસ્રાણિ સસ્મારાનુભવન્નિવ ॥ ૧૪।૩
સ્મૃત્વા જન્મ ચ મૃત્યું ચ તાસુ તાસૂપપત્તિષુ ।
તતઃ સત્ત્વેષુ કારુણ્યં ચકાર કરુણાત્મકઃ ॥ ૧૪।૪
કૃત્વેહ સ્વજનોત્સર્ગં પુનરન્યત્ર ચ ક્રિયાઃ ।
અત્રાણઃ ખલુ લોકોઽયં પરિભ્રમતિ ચક્રવત્ ॥ ૧૪।૫
ઇત્યેવં સ્મરતસ્તસ્ય બભૂવ નિયતાત્મનઃ ।
કદલીગર્ભનિઃસારઃ સંસાર ઇતિ નિશ્ચયઃ ॥ ૧૪।૬
દ્વિતીયે ત્વાગતે યામે સોઽદ્વિતીયપરાક્રમઃ ।
દિવ્યં ચક્ષુઃ પરં લેભે સર્વચક્ષુષ્મતાં વરઃ ॥ ૧૪।૭
તતસ્તેન સ દિવ્યેન પરિશુદ્ધેન ચક્ષુષા ।
દદર્શ નિખિલં લોકમાદર્શ ઇવ નિર્મલે ॥ ૧૪।૮
સત્ત્વાનાં પશ્યતસ્તસ્ય નિકૃષ્ટોત્કૃષ્ટકર્મણામ્ ।
પ્રચ્યુતિં ચોપપત્તિં ચ વવૃધે કરુણાત્મતા ॥ ૧૪।૯
ઇમે દુષ્કૃતકર્માણઃ પ્રાણિનો યાન્તિ દુર્ગતિમ્ ।
ઇમેઽન્યે શુભકર્માણઃ પ્રતિષ્ઠન્તે ત્રિપિષ્ટપે ॥ ૧૪।૧૦
ઉપપન્નાઃ પ્રતિભયે નરકે ભૃશદારુણે ।
અમી દુઃખૈર્બહુવિધૈઃ પીડ્યન્તે કૃપણં વત ॥ ૧૪।૧૧
પાય્યન્તે ક્વથિતં કેચિદગ્નિવર્ણમયોરસમ્ ।
આરોપ્યન્તે રુવન્તોઽન્યે નિષ્ટપ્તસ્તમ્ભમાયસમ્ ॥ ૧૪।૧૨
પચ્યન્તે પિષ્ટવત્કેચિદયસ્કુમ્ભીષ્વવાઙ્મુખાઃ ।

દહ્યન્તે કરુણં કેચિદ્દીપ્તેષ્વઙ્ગારરાશિષુ ॥ ૧૪।૧૩
કેચિત્તીક્ષ્ણૈરયોદંષ્ટ્રૈર્ભક્ષ્યન્તે દારુણૈઃ શ્વભિઃ ।
કેચિદ્ધૃષ્ટૈરયસ્તુણ્ડૈર્વાયસૈરાયસૈરિવ ॥ ૧૪।૧૪
કેચિદ્દાહપરિશ્રાન્તાઃ શીતચ્છાયાભિકાઙ્ક્ષિણઃ ।
અસિપત્રં વનં નીલં બદ્ધા ઇવ વિશન્ત્યમી ॥ ૧૪।૧૫
પાટ્યન્તે દારુવત્ કેચિત્કુઠારૈર્બહુબાહવઃ ।
દુઃખેઽપિ ન વિપદ્યન્તે કર્મભિર્ધારિતાસવઃ ॥ ૧૪।૧૬
સુખં સ્યાદિતિ યત્કર્મ કૃતં દુઃખનિવૃત્તયે ।
ફલં તસ્યેદમવશૈર્દુઃખમેવોપભુજ્યતે ॥ ૧૪।૧૭
સુખાર્થમશુભં કૃત્વા ય એતે ભૃશદુઃખિતાઃ ।
આસ્વાદઃ સ કિમેતેષાં કરોતિ સુખમણ્વપિ ॥ ૧૪।૧૮
હસદ્ભિર્યત્કૃતં કર્મ કલુષં કલુષાત્મભિઃ ।
એતત્પરિણતે કાલે ક્રોશદ્ભિરનુભૂયતે ॥ ૧૪।૧૯
યદ્યેવ પાપકર્માણઃ પશ્યેયુઃ કર્મણાં ફલમ્ ।
વમેયુરુષ્ણરુધિરં મર્મસ્વભિહતા ઇવ ॥ ૧૪।૨૦
શારીરેભ્યોઽપિ દુઃખેભ્યો નારકેભ્યો મનસ્વિનઃ ।
અનાર્યૈઃ સહ સંવાસો મમ કૃચ્છ્રતમો મતઃ ॥ ૧૪।૨૧*
ઇમેઽન્યે કર્મભિશ્ચિત્રૈશ્ચિત્તવિસ્પન્દસમ્ભવૈઃ ।
તિર્યગ્યોનૌ વિચિત્રાયામુપપન્નાસ્તપસ્વિનઃ ॥ ૧૪।૨૨ (૧૪।૨૧)
માંસત્વગ્બાલદન્તાર્થં વૈરાદપિ મદાદપિ ।
હન્યન્તે કૃપણા યત્ર બન્ધૂનાં પશ્યતામપિ ॥ ૧૪।૨૩ (૧૪।૨૨)
અશક્નુવન્તોઽપ્યવશાઃ ક્ષુત્તર્ષશ્રમપીડિતાઃ ।
ગોઽશ્વભૂતાશ્ચ વાહ્યન્તે પ્રતોદક્ષતમૂર્તયઃ ॥ ૧૪।૨૪ (૧૪।૨૩)
વાહ્યન્તે ગજભૂતાશ્ચ બલીયાંસોઽપિ દુર્બલૈઃ ।
અઙ્કુશક્લિષ્ટમૂર્ધાનસ્તાડિતાઃ પાદપાર્ષ્ણિભિઃ ॥ ૧૪।૨૫ (૧૪।૨૪)
સત્સ્વપ્યન્યેષુ દુઃખેષુ દુઃખં યત્ર વિશેષતઃ ।
પરસ્પરવિરોધાચ્ચ પરાધીનતયૈવ ચ ॥ ૧૪।૨૬ (૧૪।૨૫)
ખસ્થાઃ ખસ્થૈર્હિ બાધ્યન્તે જલસ્થા જલચારિભિઃ ।
સ્થલસ્થાઃ સ્થલસંસ્થૈસ્તુ પ્રાપ્યન્તે ચેતરેતરૈઃ ॥ ૧૪।૨૭ (૧૪।૨૬)
ઉપપન્નાસ્તથા ચેમે માત્સર્યાક્રાન્તચેતસઃ ।
પિતૃલોકે નિરાલોકે કૃપણં ભુઞ્જતે ફલમ્ ॥ ૧૪।૨૮ (૧૪।૨૭)
સૂચીચ્છિદ્રોપમમુખાઃ પર્વતોપમકુક્ષયઃ ।

ક્ષુત્તર્ષજનિતૈર્દુઃખૈઃ પીડ્યન્તે દુઃખભાગિનઃ ॥ ૧૪।૨૯ (૧૪।૨૮)
પુરુષો યદિ જાનીત માત્સર્યસ્યેદૃશં ફલમ્ ।
સર્વથા શિવિવદ્દદ્યાચ્છરીરાવયવાનપિ ॥ ૧૪।૩૦ (૧૪।૩૦)
આશયા સમભિક્રાન્તા ધાર્યમાણાઃ સ્વકર્મભિઃ ।
લભન્તે ન હ્યમી ભોક્તું પ્રવૃદ્ધાન્યશુચીન્યપિ ॥ ૧૪।૩૧ (૧૪।૨૯)
ઇમેઽન્યે નરકં પ્રાપ્ય ગર્ભસઞ્જ્ઞેઽશુચિહ્રદે ।
ઉપપન્ના મનુષ્યેષુ દુઃખમર્છન્તિ જન્તવઃ ॥ ૧૪।૩૨ (૧૪।૩૧)

Anandajoti Bhikkhu
http://www.ancient-buddhist-texts.net/Texts-and-Translations/Buddhacarita/indextm

*Buddha's Biography by Ashvaghosha - Buddhacharita*
pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*